गुरुगङ्गेश्वरग्रन्थमालायाः पञ्चदशं षोडशं च पुष्पम्

शुक्लयजुर्वेदमाध्यन्दिनसंहितातृतीयाध्याय-समन्वयभाष्यम्

स्वामिश्रीगङ्गेश्वरोदासीनवर्यविनिर्मितम्

शतपथब्राह्मण-द्वितीयकाण्डम्

पण्डितप्रवर श्री मोतीलालशर्मणा निर्मितेन हिन्दीविज्ञानभाष्येण
श्री सुरजनदासस्वामिरचितेन हिन्दीभाषानुवादेन च
समलङ्कृतम्

तदिदं द्वयं
श्री सुरजनदासस्वामिना एम. ए. आचार्येण
सम्पादितम्

प्रथमावृत्तिः ५००

वि. सं. २०२९

मूल्यम्— रु. ३५-००

प्रकाशक –

स्वामी गोविन्दानन्द वेदान्ताचार्य,
मैनेजिंग ट्रस्टी,
योगेश्वर गुरु गङ्गेश्वर चैरिटेबल ट्रस्ट
१३, पार्क एरिया, गङ्गेश्वरधाम, करोलबाग, न्यू देहली–५

पुस्तक-प्राप्तिस्थान –

१. १३, पार्क एरिया, गङ्गेश्वरधाम, करोलबाग, न्यू देहली–५
२. श्रौतमुनि निवास, वृन्दावन (मथुरा)

मुद्रक –

साधना प्रेस
हाईकोर्ट रोड, जोधपुर

सम्पादकीय

वेद उपलब्ध विश्वसाहित्य में आदिग्रन्थ माना जाता है। यह भारतीय जनता की सभ्यता, संस्कृति, धर्म, विज्ञान आदि का मूलग्रन्थ है। इसीलिए 'वेदोऽखिलो धर्ममूलम्' (मनु. २।६)। 'वेदाद्धर्मो हि निर्बभौ (मनु २।१०); 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' (मनु. २।१३) इत्यादि वचन वेद को धर्म का मूल तथा धर्मज्ञान में सर्वोत्कृष्ट प्रमाण बतला रहे हैं। विश्व की प्रथम विश्ववारा[१] संस्कृति का निरूपण भी वेद में ही हुआ है। साक्षात्कृतधर्मा अर्थात् प्राकृतिक पदार्थों का साक्षात्कार करने वाले महर्षियों ने प्राकृतिक पदार्थों का साक्षात्कार कर जिन तत्त्वों का यथार्थ ज्ञान प्राप्त किया था उसी विज्ञान का निरूपण इन वैदिक ग्रन्थों में उपलब्ध होता है। प्रकृति के गूढ मौलिक तत्त्वों का स्वरूप-प्रतिपादन इनमें हुआ है। भारतीय महर्षियों ने आर्ष प्रतिभामय चक्षु द्वारा प्राकृतिक पदार्थों का यथार्थ-स्वरूप जान लिया था। इसीलिए उनके विषय में ये वचन उपलब्ध होते हैं 'ऋषयो नाम प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः।'[२] 'साक्षात्कृतधर्माणो हि ऋषयो बभूवुः'[३]।

'आविर्भूत-प्रकाशानामनुपप्लुत-चेतसाम्। अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥[४]

भगवान् मनु ने तो यहाँ तक लिखा है—

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥[५]
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ॥[६]
सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥[७]
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥[८] इति

मनु की यह गर्वोक्ति वस्तुतः गर्वोक्ति नहीं अपितु यथार्थोक्ति थी कि—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥[९]

ऐसे वेद का अध्ययन भारतीय बुद्धिजीवी के लिए अनिवार्य था। इसीलिए 'ब्राह्मणेन निष्कारणं धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'[१०] ऐसे वचन मिलते हैं। इसीलिए मनु ने कहा है—

१—'सा संस्कृतिः प्रथमा विश्ववारा' (यजुःसंहिता)
२—पातञ्जल महाभाष्य आह्निक १।
३—(निरुक्त अ. १ पा. ६)। ४—(वाक्यपदीय ब्रह्मकाण्ड ३७)। ५—मनुस्मृति १२।९४।
६—मनुस्मृति १२।९७। ७—मनुस्मृति १२।१००। ८—मनुस्मृति १२।१०२
९—मनुस्मृति २।२०। १०—पात. म. १ आ.।

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' मनु. २।१६८

ऐसे सर्वोत्कृष्ट वैदिकसाहित्य के बहुत से ग्रन्थ कालप्रभाव से कालकवलित हो गए तथा शेष ग्रन्थ भी भारतीय जनता के दुर्दैव तथा प्रमाददोष से अध्ययनाध्यापनपरिपाटी से बहिर्भूत हो गए। जिसके कारण भारतीयों का अमूल्य सर्वस्वभूत वैदिकविज्ञान विलुप्त हो गया तथा उस वैदिकविज्ञान और प्राकृतिक तत्त्वविज्ञान के प्रतिपादक ग्रन्थों के लिए 'गडरिये के गीत' शब्द का प्रयोग किया जाने लगा।

द्विसहस्राब्दियों से विलुप्त इस विज्ञान का विद्यावाचस्पति महामहोपदेशक स्वर्गीय गुरुवर्य श्री मधुसूदनजी ओझा ने विलुप्तावशिष्ट वैदिकग्रन्थों के आधार पर तथा अपनी विलक्षण प्रतिभा के बल पर पुनरुद्धार किया और उसे प्रकाश में लाने के लिए उन्होंने अनुमानतः छोटे-बड़े २०० ग्रन्थों का निर्माण किया। उन्होंने वैदिक संहिताओं तथा अन्य वैदिक ग्रन्थों की व्याख्या न कर विलुप्त वैदिक परिभाषाओं को प्रकाश में लाने का प्रधानतया प्रयास किया। किन्तु भारतीयों के दुर्दैव के कारण उनके सुपुत्र श्री प्रद्युम्नजी ओझा का स्वर्गवास होने पर उनके पुत्रों ने उस साहित्य का भी एक प्रकार से नाश कर दिया जिसकी सुरक्षा में स्वर्गीय श्री प्रद्युम्नजी ओझा ने अपना जीवन लगा दिया था।

वेदवीथीपथिक भरद्वाजकुलावतंस स्वर्गीय श्री मोतीलालजी ने स्वर्गीय श्री ओझाजी से वैदिक विज्ञान का परिश्रमपूर्वक अध्ययन कर तथा यावज्जीवन उसी का निष्ठापूर्वक परिशीलन करते हुए इस वैदिक-विज्ञान को राष्ट्रभाषा में जनता के समक्ष प्रस्तुत करने का श्लाघनीय प्रयास किया। उन्होंने अनुमानतः ८०,००० पृष्ठों का विशाल साहित्य लिखा। यह साहित्य प्रधानतया भगवद्गीता, उपनिषद् तथा शतपथब्राह्मण से सम्बन्धित है। वेदवीथीपथिक श्री शास्त्रीजी ने अपने साहित्य में स्वर्गीय गुरुवर्य श्री ओझाजी के सिद्धान्तों का ही जनसाधारण के लिए हिन्दी भाषा में निबन्धन किया है। ओझाजी द्वारा प्रतिपादित वैदिकविज्ञान को उन्होंने स्पष्ट करने का श्लाघनीय प्रयास किया है। उन ग्रन्थों में से बहुत से ग्रन्थ प्रकाशित हो चुके हैं। शतपथब्राह्मण के भी प्रथमकाण्ड का वैज्ञानिक भाष्य अन्त के तीन अध्यायों को छोड़कर प्रकाशित हो चुका है किन्तु द्वितीयकाण्ड से पञ्चमकाण्ड तक के शतपथब्राह्मण का हिन्दीविज्ञान भाष्य प्रकाशित नहीं हुआ है। षष्ठकाण्ड के २-३ अध्यायों को छोड़कर पञ्चमकाण्ड के बाद का उनका भाष्य उपलब्ध नहीं है। वे उसे लिख ही नहीं सके और दुर्दैव से असमय में ही निर्वाण प्राप्त कर गये। स्वर्गीय श्री मोतीलालजी के सुपुत्र श्री कृष्णचन्द्र शर्मा ने यह भाष्य चतुर्वेदरूप चतुःसमुद्र को एकत्र कर एक ग्रन्थ 'वेद भगवान्' के रूप में सुन्दर व शुद्धरूप में प्रकाशित कर जनताजनार्दन के समक्ष उपस्थित करने वाले तथा वेदविद्या के पुनः प्रचार व उद्धार में अपने जीवन को समर्पित करने वाले वेददर्शनाचार्य महामण्डलेश्वर स्वामी श्री गङ्गेश्वरानन्दजी महाराज की सेवा में प्रकाशनार्थ भेजा। उन्होने उसकी पाण्डुलिपि करवा कर प्रकाशित करना प्रारम्भ किया। यद्यपि यह कार्य अतिव्ययसाध्य तथा बहुश्रमसाध्य था फिर भी वेदविद्योद्धारव्रत में दीक्षित परोपकारैकव्रत महामण्डलेश्वरजी ने स्वर्गीय श्री मधुसूदनजी ओझा द्वारा आविष्कृत वेदव्याख्यासम्बन्धी वैज्ञानिक पद्धति की रक्षा के लिए इस कार्य का उत्तरदायित्व ग्रहण किया। उसके फलस्वरूप ही आज शतपथब्राह्मण का द्वितीयकाण्ड हिन्दी अनुवाद, हिन्दी विज्ञानभाष्य तथा शुक्लयजुःसंहिता के तृतीयाध्याय-समन्वयभाष्य के साथ प्रकाशित कर वेदानुरागियों के समक्ष प्रस्तुत किया जा रहा है।

इसका कारण यह है कि ब्राह्मणग्रन्थ विभिन्न यज्ञों की इतिकर्त्तव्यताओं व उनकी उपपत्तियों का प्रतिपादन करते हुए उन यज्ञों में विनियुक्त वेद के मन्त्रों की व्याख्या भी संक्षेप में प्रस्तुत करते हैं। शतपथब्राह्मण शुक्लयजुर्वेद की वाजसनेयिसंहिता का व्याख्यानभूत ग्रन्थ है अतः वह यज्ञों में तत्तत् थानों में विनियुक्त शुक्लयजुःसंहिता के मन्त्रों की व्याख्या प्रस्तुत करता है। किन्तु वह उस मन्त्र की व्याख्या खण्डशः तथा संक्षेप में प्रस्तुत करता है। सामान्य तौर से अध्ययन करने पर पूर्ण मन्त्र तथा उसके पूर्ण अर्थ के सम्यग्ज्ञान में कठिनता होती है। इस काठिन्य के परिहारार्थ शतपथब्राह्मण के जिस काण्ड में संहिता के जिन मन्त्रों का विनियोग हुआ है उन मन्त्रों को पूर्णतया उद्धृत कर उनकी पृथग् व्याख्या देना समुचित समझा गया। इसी दृष्टि से पूज्य महामण्डलेश्वरजी ने शतपथब्राह्मण के द्वितीयकाण्ड की व्याख्या से पूर्व उसमें विनियुक्त शुक्लयजुःसंहिता के तृतीयाध्याय के मन्त्रों को समन्वयभाष्यसहित प्रकाशित कर देना उचित समझा। इससे शतपथब्राह्मण के विषय को समझने में अत्यन्त सौकर्य होगा। मन्त्रों की व्याख्या में बहुत से पक्षों का पदर्शन इस समन्वयभाष्य में किया गया है जिससे वह विद्वानों के लिए अधिक रुचिकर व उपादेय बन सके।

इस प्रकाशन में सर्वप्रथम शुक्लयजुःसंहिता के तृतीयाध्याय का समन्वयभाष्य प्रकाशित किया गया है तदनन्तर हिन्दी अनुवाद व हिन्दी विज्ञानभाष्य के साथ शतपथब्राह्मण का द्वितीय काण्ड। इस क्रम का भी प्रधान कारण यही है कि समन्वयभाष्य मूलसंहिता पर है। मूल संहिता के मन्त्रों के अर्थज्ञान के बिना शतपथब्राह्मण को समझना कठिन है अतः उपादेय होने से तथा मूलसंहिता पर व्याख्यान होने से उसका संनिवेश प्रथम किया गया है तत्पश्चात् शतपथब्राह्मण का मूल, उसका हिन्दी अनुवाद और तदनन्तर उस पर विस्तृत हिन्दी विज्ञानभाष्य का संनिवेश किया गया है।

इसमें शुक्लयजुःसंहिता - तृतीयाध्याय - समन्वयभाष्य के प्रणेता वेददर्शनाचार्य महामण्डलेश्वर श्री गङ्गेश्वरानन्दजी महाराज स्वयं हैं। हिन्दी विज्ञानभाष्य के रचयिता वेदवीथीपथिक वैदिकविज्ञाननिष्णात स्वर्गीय पं० श्री मोतीलालजी शर्मा हैं और शतपथब्राह्मण का हिन्दी अनुवादक इन पंक्तियों का लेखक है। स्वर्गीय श्री मोतीलालजी ने शतपथब्राह्मण के प्रथमकाण्ड को हिन्दी अनुवाद व हिन्दी विज्ञानभाष्य के साथ ही प्रकाशित किया था उसी रीति का अनुसरण करते हुए इस काण्ड का भी हिन्दी अनुवादसहित प्रकाशन करना उचित समझा गया। किन्तु स्वर्गीय श्री मोतीलालजी ने इसका अनुवाद नहीं किया था अतः अनुवाद पूज्य महामण्डलेश्वरजी के आदेश से सम्पादक ने किया।

इस काण्ड का अनुवाद प्रथम काण्ड की तरह केवल अक्षरानुवादमात्र नहीं है किन्तु इसके हिन्दी विज्ञानभाष्य में प्रतिपादित उपपत्तियों का भी संक्षेप से दिग्दर्शन इस अनुवाद में किया गया है जिससे अनेक स्थलों पर अनुवादमात्र से भी उन विषयों का सामान्य ज्ञान हो सके।

हिन्दी विज्ञानभाष्य जिस रूप में था उसी रूप में उसका प्रकाशन पूज्य महामण्डलेश्वरजी के आदेश से किया गया है उसमें परिवर्तन नहीं किया गया है। कुछ स्थलों पर जहाँ भाष्य नहीं लिखा गया था उस भाग की व्याख्या अपनी बुद्धि के अनुसार सामान्य रूप से करदी गयी है।

हिन्दी विज्ञानभाष्य की पाण्डुलिपि करने में श्री प्रेमरत्न व्यास, श्री गोपीकिशन अग्रवाल, श्री शिवचरण गर्ग, श्री कैलाशचन्द्र त्रिपाठी, श्रीमती ऊर्मिला शुक्ला, श्री गणेशीलाल सुथार ने तथा समन्वयभाष्य

की पाण्डुलिपि करने में श्री दिनकर स्वामी तथा श्री बाबूलाल शर्मा ने पर्याप्त श्रम उठाया है, इसके लिए वे साधुवाद के पात्र हैं।

सावधानी रखते हुए भी इसके प्रकाशन में मेरी कार्यान्तरव्यासक्तता. प्रूफ - संशोधन तथा प्रेस की असावधानी से अशुद्धियां रह गयी हैं और कहीं-कहीं सामान्य अशुद्धि के कारण अर्थ का अनर्थ भी हो गया है। किन्तु अन्त में शुद्धिपत्र में ऐसी अशुद्धियों को शुद्ध कर दिया गया है। तथा ऐसी अशुद्धियाँ भी अधिक नहीं हैं। मेरी अल्पज्ञता के कारण जो अशुद्धियाँ अनुवाद व सम्पादन में रह गयी हैं उनका संशोधन तो विद्वान् पाठकों को स्वयं ही करना होगा, उनके विषय में विद्वानों से क्षमाप्रार्थना के अतिरिक्त अन्य कोई उपाय नहीं है।

इस ग्रन्थ के प्रकाशन का सम्पूर्ण व्ययभार गुरु गङ्गेश्वर चैरिटेबिल ट्रस्ट, देहली के मैनेजिंग ट्रस्टी श्री स्वामी गोविन्दानन्दजी वेदान्ताचार्य ने वहन किया है। यह उनके अनुपम वेदानुराग का परिचायक है। इसके लिए वे अनेकशः धन्यवाद के पात्र हैं।

यह ट्रस्ट वेद-प्रचार तथा अन्य शिक्षा सम्बन्धी कार्यों की पूर्ति में संलग्न है। इसके अन्तर्गत अनेक ग्रन्थों का प्रकाशन अब तक हो चुका है जिनकी सूची इस ग्रन्थ के अन्तिम पृष्ठ पर संलग्न है। शीघ्र ही इस ट्रस्ट द्वारा, अप्राकाशित अन्य वैदिकग्रन्थों का भी, प्रकाशन होने वाला है। इस प्रकार यह ट्रस्ट प्रधानतया अप्रकाशित वैदिकग्रन्थों के प्रकाशन, अव्याख्यात ब्राह्मणादि ग्रन्थों के व्याख्यान व भाष्य - निर्माण तथा वेदसम्बन्धी नवीन ग्रन्थों के निर्माणादि कार्यों में अपनी निधि का विनियोग कर एक अभूतपूर्व आदर्श प्रस्तुत कर रहा है।

महाशिवरात्रि
वि. सं. २०२६

विद्वद्विधेय
सुरजनदास स्वामी
रीडर, संस्कृतविभाग
जोधपुर विश्वविद्यालय

शुक्लयजुःसंहिता-

तृतीयाध्याय-

समन्वयभाष्यम्

शुक्लयजु:संहितातृतीयाध्याय-
समन्वयभाष्यम्

स्वान्तध्वान्तमपाकुर्वन् वेदविज्ञानभानुना ।
सर्वं समीहितं देयाद् रामानन्दपरेश्वरः ।।

शतपथब्राह्मणस्य एकपदिकानाम्नि द्वितीयकाण्डे षडध्यायाः सन्ति । प्रत्यध्यायं च ब्राह्मण-चतुष्टयम्, इति चतुर्विंशतिर्ब्राह्मणाः संभूयात्र वर्तन्ते । तानि च ब्राह्मणानि प्रकरणचतुष्टये विभक्तानि । तत्र तावत् सप्तभिर्ब्राह्मणैः प्रथममग्न्याधानप्रकरणम्, षड्भिर्ब्राह्मणैर्द्वितीयमग्नि-होत्रप्रकरणम्, ततो ब्राह्मणत्रयेण तृतीयमिष्टिप्रकरणम्, ततोऽष्टभिर्ब्राह्मणैरन्तिमं (चतुर्थं) चातुर्मास्यप्रकरणमभिहितम् ।

सम्प्रति प्रत्यध्यायं प्रतिब्राह्मणं प्रतिपाद्यानां विषयाणां निरूपणं विधीयते—तथाहि प्रथमाध्यायस्य प्रथमे सम्भारब्राह्मणे अग्न्याधानोपयोगिनामग्न्याधानप्राक्काले अनुष्ठेयानां पञ्चसम्भाराणाम्, द्वितीये ब्राह्मणेऽग्न्याधानोपयोगिनां नक्षत्राणाम्,तृतीये ब्राह्मणेऽग्न्याधानो-पयोगिनामृतूनाम्, चतुर्थे ब्राह्मणे चाग्न्याधानप्रयोगस्य प्रतिपादनम् ।

द्वितीयाध्यायस्य प्रथमे ब्राह्मणेऽग्न्याधानानन्तरकालिकस्य पूर्णाहुतिहोमस्य, द्वितीये ब्राह्मणे दक्षिणायाः, तृतीये ब्राह्मणे पुनराधानस्य,चतुर्थे च ब्राह्मणेऽग्निहोत्रस्य प्रतिपादनम् ।

तृतीयाध्यायस्य प्रथमे ब्राह्मणेऽग्निहोत्रहोमविधेः, द्वितीयतृतीयब्राह्मणयोरग्न्युपस्थानस्य, चतुर्थे ब्राह्मणे च बृहदुपस्थानस्य निरूपणम् ।

चतुर्थाध्यायस्य प्रथमे ब्राह्मणे क्षुल्लकोपस्थानस्य, द्वितीये ब्राह्मणे पिण्डपितृयज्ञस्य, तृतीये ब्राह्मणे आग्रयणेष्टेः, चतुर्थे च ब्राह्मणे वसिष्ठापरनामधेयस्य दाक्षायणेष्टेः प्रतिपादनम् ।

पञ्चमाध्यायस्य प्रथमे ब्राह्मणे चातुर्मास्ययागेषु वैश्वदेवेष्टेः, द्वितीये ब्राह्मणे वरुण-प्रघासेष्टेः, तृतीये ब्राह्मणे साकमेधेष्टेः, चतुर्थे च ब्राह्मणे साकमेधाङ्गभूतस्य महाहविर्यागस्य निरूपणम् ।

षष्ठाध्यायस्य प्रथमे ब्राह्मणे साकमेधाङ्गभूतायाः पित्र्येष्टेः, द्वितीये ब्राह्मणे त्र्यम्बकेष्टेः, तृतीये ब्राह्मणे शुनासीरीयेष्टेः, चतुर्थे च ब्राह्मणे वैश्वदेवादिचातुर्मास्येष्टीनां शेषभूतस्य सेतिकर्तव्यताकस्य परिवर्तनविधेः प्रतिपादनम् ।

शुक्लयजुर्संहितायास्तृतीयेऽध्याये तु अष्टौ कण्डिकाः आधानस्य (तत्र चाद्याः चतस्रः

समिदाधानस्य अन्त्याश्चतस्रस्तु अग्न्याधानस्य) द्वे कण्डिके अग्निहोत्रस्य, षड्विंशतिः कण्डिका बृहदुपस्थानस्य, चतस्रः कण्डिकाः क्षुल्लकोपस्थानस्य, तिस्रः कण्डिका गृहोपस्थानस्य, पञ्च कण्डिकाः वरुणप्रघासस्य, पञ्चदश कण्डिकाः (४९-६३) साङ्गसाकमेघस्य (तत्र द्वे दर्वीहोमस्य, षट् महापितृयज्ञस्य, सप्त च त्र्यम्बकेष्टेः) एवं संभूय त्रिषष्टिः कण्डिका वर्तन्ते।

वैश्वदेवेष्टेः शुनासीरीयेष्टेश्च कण्डिका काण्वयजुःसंहितायां नोपलभ्यन्त इति तदीयाः कण्डिकाः शाखान्तरीया इति प्रतीयते।

अत्रैकपदिकानाम्नि द्वितीये काण्डे शुक्लयजुर्वेदसंहितायास्तृतीयाध्यायमन्त्राणां विनियोगः। अतोऽत्र संहितातृतीयाध्यायमन्त्राणां व्याख्यानं देवयाज्यात्मयाजिसात्वतरूपपक्षत्रयम् आलम्ब्य प्रस्तूयते। वैज्ञानिकपक्षमालम्ब्यापि केषाञ्चन मन्त्राणां व्याख्यानं विधास्यते।

तत्र पूर्वं तृतीयाध्यायगतानामनुवाकानां निर्देशो विधीयते—

दशाऽनुवाकास्त्वध्याये तृतीयेऽर्थास्तु तेष्वमी।
आधानमग्निहोत्रं च[१-२-३]महोपस्थानमेव च[४] ॥१॥
क्षुल्लकोपस्थितिर्द्वाभ्यां[५-६] प्रघासा वरुणस्य[७] च।
साकमेधाश्च[८] पित्र्[९] र्थास्त्र्यम्बकार्था[१०] अमी दश ॥२॥

अनुवाकसूत्राणि—समिधाग्निं[१] भूर्भुवः[२] स्वश्चतुष्कौ, अग्निर्ज्योतिर्द्वे,[३] उपप्रयन्तः[४] षड्विंशतिः, भूर्भुवः[५] स्वश्चतस्रः, गृहा[६] मा तिस्रः, प्रघासिनः[७] पञ्च, पूर्णा[८] दर्वि द्वे, अक्षन्नमीमदन्त[९] षड्, एष[१०] ते सप्त (१० अनुवाकाः, ६३ कण्डिकाः)।

समिदाधानाऽनुवाकः

[१]समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्।
अस्मिन् हव्या जुहोतन ॥ य. ३। १॥

समिदाधानम्

समिधेति मन्त्रस्याङ्गिरसः ऋषिर्गायत्री छन्दः, अग्निर्देवता, समिदाधाने विनियोगः। (शत० ६, ८. १, ६) (का० श्रौ० ४, ८, ३)।

अध्वर्युश्चातुष्प्राश्यं (चतुर्भिर्ऋत्विग्भिः प्राशनयोग्यम् ओदनं पक्त्वाऽग्नेरुत्तरत उत्तीर्य तस्य मध्ये (आसेचनं) गर्तं विधाय, तत्र मध्ये घृतमासिच्य तिस्रः आश्वत्थीः समिधस्तस्मिन्

१—ऋग्वेद ८, ४४, १। तै. सं. ४, २, ३, १। तै. आ. १, २, १, ९।

घृतेऽभ्यज्याग्नावादधाति'। हे ऋत्विजः! यूयम् (समिधा) समिन्धनहेतुभूतया अश्वत्थ-काष्ठरूपया घृताक्तया समिधाऽनया। ञिइन्धी दीप्तौ (१४४८) रौधादिक आत्मनेपदी। समिन्धे सम्यक् दीपयत्यग्निमिति समिध्। कर्तरि क्विप् प्रत्ययः। यद्वा समिध्यतेऽनयेति सम्पदादित्वात्। (पा. वा. ३, ३, ९४) करणे क्विप्। (अग्निम्) वह्निम् (दुवस्यत) परिचरत, सेवध्वम्। दुवस्यतिः परिचरणार्थः। (निघ. ३, ५, ५)

घृताक्तानां समिधां संप्रयोगेणाग्निं सम्पाद्य (घृतैः) पूर्णाहुतिसम्बन्धिनोभिर्घृतधाराभिः (अतिथिम्) अतिथिधर्मेणाऽभ्यर्चनीयम् अग्निं (अविद्यमाना तिथिर्यस्य तम् इति व्युत्पिपादयिषन्तोऽर्वाचीनाश्चिन्त्याः 'नञ्सुभ्याम् (पा. ६, २, १७२) इति नियमेनाद्युदात्तस्वराऽनुपपत्तेर् अन्तोदात्तत्वापत्तेश्च) (बोधयत) प्रज्वलयत। (अस्मिन्) प्रज्वलिते चाऽग्नौ (हव्या) हव्यानि देवेभ्योऽर्पयितव्यानि हवींषि ['शेश्छन्दसि बहुलम्' (पा. ६, १, ७०)इति शेर्लोपः] (आ जुहोतन) सर्वतोभावेन समर्पयत। जुहुत इति प्राप्ते 'तप्तनप्तनथनाश्च' (पा. ७, १, ४५) इत्यनेन 'त' इत्यस्य तनप्' इत्यादेशः पित्त्वाद् गुणनिषेधकस्य ङित्वस्यादर्शनात् कृतगुणं जुहोतन इति रूपम् इति देवयाजिनः।

आत्मयाजिनस्तु—

ब्रह्मोपदेशः—(समिधा) प्राणेन "प्राणा वै समिधः" (ऐ. २, ४,)। (अग्निम्) आत्माग्निम्, 'आत्मा वा अग्निः' (शत. ७, ३, १, २)। (दुवस्यत) परिचरत। घृतैः) इन्द्रियशक्तिभिः। यथा श्रुतिः–'पयः शीर्षंस्तत् प्राणम्' (शत. ६, ५, ४, १५)। (अतिथिम्) आतिथ्यकर्मणा पूजनीयम् आत्माग्निम् (बोधयत) प्रज्वलयत। (अस्मिन्)आत्माग्नौ (हव्या) मनोवृत्तीः। यथा श्रुतयः–"सोम एवान्नम् अग्निरन्नादः (शत. १४, ४, २, १३) 'यत्तन्मनः एष स चन्द्रमाः (शत. १०, ३, ३, ७) 'चन्द्रमा वै सोमो देवानामन्नम्'(शत. ११,१ ५, ३)। (आजुहोतन) सर्वतो जुहुतेति।

सात्वतास्तु—

कृष्णार्जुनसंवादात्मकोऽयं मन्त्रः। पार्थप्रोक्तवाक्यकलापव्यञ्जितशमदमादिसम्पत्त्या ब्रह्मविद्याधिकारमर्जुनस्य निश्चित्य भगवान् दीक्षादानाय, यथा छान्दोग्योपनिषदि सत्यभाषणादिना निश्चिताधिकारो हारिद्रुमतगौतमाचार्यः सत्यकामं जाबालं दीक्षाग्रहणाय समिदादिकमानेतुमादिदेश– 'तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहर, उप त्वा नेष्ये न सत्यादगाः' इति। (छा. उप. ४, ४, ५)तथा आदिशति - समिधेतिः—

समिधा-समिदादिना,समिद्ग्रहणमुपहारोपलक्षणम् । अपि वा समिधा युक्तः समित्पाणिः समिदाद्युपहारहस्तः सन् 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' (मु. उ ३, २, १२) इति श्रुतेः । दुवस्यत—परिचरत, दुवस्यतिरत्र परिचरणकर्मा । गुरुं मां पूजयतेत्यर्थः। एतेन विधिवत् गुरूपसत्तिः सूचिता । तदनन्तरं श्रीकृष्णशिष्यतामुपगतोऽर्जुन आचष्टे—अतिथिम्— निजपादपद्मातिथिम्, त्वां प्रपन्नमिति यावत् । घृतैः–तद्वत् स्निग्धैः मधुरवचोभिर्बोधयत—धर्मब्रह्मणोस्तत्त्वमवगमयत,मदीयं कर्त्तव्यमुपदिशतेति निष्कर्षः । अत एव 'शिष्यस्तेऽहं शाधि मां त्वा प्रपन्नम्' (२, ७) इति गीतोक्तं सङ्गच्छते । अथवा पूर्व-वाक्य एव घृतैरिति सम्बद्ध्यते, विनापि चकारं समुच्चयः । समिदादिना घृतपक्वमोदकादि-भिश्चोपहारैर्मां प्रसादयत इति भावः ।

गीतासारं भगवानुपदिशति स्वशिष्यमर्जुनम्—अस्मिन्–मयि हव्या–हव्यानि दातव्यानि अर्पणीयानि सर्वाणि वस्तूनि आ-सर्वतोभावेन, जुहोतन–दत्त, अर्पयत, निष्कामकर्मयोगं सततमनुतिष्ठत । उक्तं हि गीतायाम्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ।। (गी. ९, २७)

अत्र सर्वत्र बहुवचनमादरातिरेकसूचनाय । अथवा - दुवस्यत-दुवस्य, बोधयत - बोधय, जुहोतन--जुहुधि, इति वचनव्यत्यासो बोध्य इति ।

[1]सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे । य. ३।२ ।

अग्निसंदीपनम्

ऋत्विक् - प्रेरणा

द्वितीयस्यां कण्डिकायां 'सुसमिद्धाय'' इत्येक एव मन्त्र ऋत्विक्प्रेरणः । अस्य वसुश्रुत ऋषिः, गायत्री छन्दः, अग्निर्देवता (का. श्रौ. ४, ८, ५) ।

हे ऋत्विजः ! (सुसमिद्धाय) साधु सम्यक् प्रज्वलिताय । अतएव (शोचिषे) शोचिष्मते, कान्तिमते (जातवेदसे) सम्पन्नप्रज्ञानाय [जातवेदाः कस्मात्] जातानि वेद, जातानि वैनं विदुः, जाते जाते विद्यत इतिवा, जातवित्तो वा, जातधनो वा, जातविद्यो वा, जातप्रज्ञानो वा, यतज्जातः पशूनविन्दत इति तज्जातवेदसो जातवेदस्त्वम्(निरु. ७,१९)]

१—ऋग्वेद—५, ५, १ ।

जातं वेदो ज्ञानं यस्येति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः। यद्वा जातं वेत्ति वेदयतीति वोपपदसमासे उत्तरपदप्रकृतिस्वरबाधनार्थम् 'गतिकारकोपपदयोः पूर्वपदप्रकृरिस्वरत्वं च' (उ. ४।६६६) इत्यसुन् प्रत्ययः पूर्वपदप्रकृतिस्वरश्च (अग्नये) वह्नये (तीव्रम्) ग्रहणोद्वासनादिभिः संस्कारैः संस्कृतं (घृतम्) आज्यं (जुहोतन) जुहुत घृतेनाग्निसन्तर्पणं कुरुतेति देवयाजिनः।

आत्मयाजिनस्तु—(सुसमिद्धाय) प्राणैः शोभनतया सम्यग् दीप्ताय (शोचिषे) दीप्तिमते (जातवेदसे) ज्ञातप्रज्ञानाय (अग्नये) आत्माग्नये (तीव्रम्) योगेन संस्कृतम् (घृतम्) ज्ञानेन्द्रियं (जुहोतन) जुहुतेति।

सात्वतास्तु सुसमिद्धायेति मन्त्रो नृसिंहाभ्यर्थनपरः –

दैत्ये हिरण्यकशिपौ निहते क्रोधातिरेकाद् भयङ्कराकृतिं भगवन्तं नृसिंहं प्रति सौम्य-वपुषो ग्रहणप्रार्थनाय महर्षयः सर्वान् लोकान् कथयन्ति भो उपस्थिताः भगवद्भक्ताः! 'सुसमिद्धाय' दैत्यदत्तदुःसह-विविध-प्रह्लादयातनादर्शनसमुत्पन्न-कोपाय, 'शोचिषे'=शोचिष्मते जगदन्तकृज्ज्वालाजटिलसंवर्तकप्रलयानलाय 'जातवेदसे'=सर्वज्ञाय अग्नये दैत्य-दावदहनाय नृसिंहाय तं प्रसादयितुम् इत्यर्थः 'तीव्रम्'=अतिमनोहरम्। 'घृतम्'=घृतवत् स्निग्धम् मधुरं वचः। 'जुहोतन'=प्रक्षिपत।

सर्वैः भवतैः प्रार्थनीयोऽयं भगवान्—प्रभो! 'हतो दुर्जनः, संरक्षितः प्रह्लादः, निष्पन्न देव समीहितम्, साम्प्रतं कृतमनेन भयङ्करेण विग्रहेण, अस्माकं हृदयं वेपते, त्वरितं परित्यजेमम्, अनुगृहाण, अतिकमनीयं स्वकीयं शान्तं वपुः धारय इति, इति।

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि।
बृहच्छोचा यविष्ठ्य। शु. य. ३।३

अग्निसंदीपनं

तृतीयस्यां कण्डिकायां 'तं त्वा'[१] इत्येक एवाग्निसंदीपनो मन्त्रः। अस्य भारद्वाज ऋषिः, गायत्री छन्दः, अग्निर्देवता। (शत. १, ४. २५-२६; का. श्रौ. ५, ८, ३)

(अङ्गिरः) हे अग्ने! 'इतरे येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' इति ऐतरेयब्राह्मणम् (३, ३, ९), 'अङ्गिरा ह्यग्निः' (शत. १, ४, १, २५) इति श्रुतेः। अङ्गारा अङ्कनाः अञ्चनाः' इति यास्कः (निरु. ३, १७)।

'अङ्गारतोऽङ्गिराः' इति देवराजयज्वा (निघ. ५, ५, ११)। अगि गत्यर्थे (१४६)

भौवादिकः परस्मैपदी । अङ्गिर्गतिरस्यास्तीति मत्वर्थे रस् प्रत्यय इत्युव्वटमहीधरौ न पेशलौ । 'अङ्गेनेरसिरिरुडागमश्च' (३, ४, २३६) इत्यनेन अगिधातोर् असि प्रत्यये इरुडागमे गमनशील इत्यर्थे तत्सिद्धेः । (तं) तथागुणं (त्वा) त्वां (समिद्भिः) अश्वत्थकाष्ठैः (घृतेन) घृतधारया (वर्धयामसि) समेधयामहे । वर्धयामः इति स्थिते 'इदन्तो मसिः' (पा. ७, १, ४६) इति मसः इगागमे वर्धयामसि इति रूपम् । (यविष्ठ्य) युवतम ! सर्वदा तरुण ! अतिशयेन युवन् । इष्ठन्—प्रत्यये 'स्थूलदूरयुव' (पा. ६, ४, १५६) इत्यादिना यणादिपरलोपे, गुणावादेशयोः यविष्ठ इति, ततः स्वार्थे यत्प्रत्ययस्तद्धितः 'नवसूरमर्त-यविष्ठेभ्यो यत्' (पा. वा. ५, ४, २५) । (बृहत्) महत् प्रवृद्धो यथा स्यात्तथा (शोचा) शोच दीप्यस्व । शुच शोके (१८३) भौवादिकः परस्मैपदी । शोकेनाऽत्र दीप्तिर्लक्ष्यते । 'द्वयचोऽतस्तिङः' (पा. ६, ३, १३५) इति संहितायां दीर्घे शोचा इति देवयाजिनः ।

आत्मयाजिनस्तु—ब्रह्मणोपदिष्ट आत्मप्रतिबिम्बः प्रार्थयते– (अङ्गिरः) अङ्गानां रसः अथवा अङ्गी सन् रसस्तत्सम्बुद्धौ अङ्गिरः, आत्माग्निर्हि सर्वेषां देहादीनामात्मतया प्रधानभूतो रसश्च 'रसो वै सः' इति श्रुतेः । हे आत्माग्ने ! (तं) तथाविधं (त्वा) त्वां (समिद्भिः) प्राणैः (घृतेन) इन्द्रियशक्तिभिः अथवा इन्द्रियरसरूपेणेन्द्रियसामर्थ्येन (वर्धयामसि) प्रवृद्धं कुर्मः । (यविष्ठ्य) हे युवतम ! योगसामर्थ्येन नित्यतरुणतम । त्वं (बृहत्) ब्रह्माण्डरूपः असि, अतः(शोचा)शोच – दीप्यस्वेति । अथवा बृहत् - भूमा('भूमा वै ब्रह्म' इति श्रुतेः)। अतः शोच- सर्वत्र दीप्यस्व प्रकाशितो भवेत्यर्थः ।

स्वपत्न्या कृतपरामर्शेन सन्दीपनिना गुरुदक्षिणारूपेण मृतं स्वपुत्रमानेतुमादिष्टो भगवान् कृष्णः संयमनीं पुरीमागच्छत् । कृताभ्यर्चनं यमं भगवान् ऊचे— दण्डपाणे ! त्वन्नगरे मम गुरुपुत्रो वर्तते सपदि प्रत्यावर्तनीयः । तं गुरुदक्षिणात्मना गुरवे निवेद्य गुरोर्निदेशाद् यदूनां राजधानीं मधुपुरीं गन्तुमना अहमस्मि । शिरो निधाय भगवद्-निदेशं, तं मृतं गुरुपुत्रं यमः सहर्षं भगवते ददौ । भोगायतनं स्थूलं मनुष्यशरीरमन्तरा केवलेन लिङ्गशरीरेण भूमिमागन्तुम् अक्षमाय तस्य मृतगुरुपुत्रस्य जीवात्मनेः स्थूलं शरीरं मानवभोगोचितं प्रयच्छन् ब्रूते, 'तन्त्वेति' ।

अङ्गिरः-गतिमन् ! इतो मया सार्धं भूमिं गन्तुमुत्सुक ! हे मृतगुरुपुत्रजीवात्मन् ! 'तम्' समुद्रे निमग्नं त्यक्त-स्थूलशरीरं यमालयमागतं त्वा=त्वां 'समिद्भिः' प्राणैः "प्राणा वै समिधः" इति श्रुतेः; प्राणः कर्मेन्द्रियाणामुपलक्षकः । 'घृतेन' प्रकाशेन तद्धर्मकेण अन्तः-करणेन मनोबुद्धिलक्षणेन ज्ञानेन्द्रिय-सहितेन च सप्तदश-तत्त्वात्मकलिङ्गशरीरेण लक्षणया

१—ऋग्वेद—६, १६, ११ । सामवेद—१, ६६१ । तै. स.—२, ५, ८, १ । तै. ब्रा. १, २, १, १०; ३, ५, २, १ ।

तदधिष्ठानं यत् भोगार्हं स्थूलं शरीरं तेनेतियावत् । 'वर्धयामसि' वर्धयामः । 'घृ' क्षरण-दीप्त्योः 'जुहोत्यादिः; परस्मैपदी, ततः भावे क्तप्रत्ययः ।

भोगाक्षमाय जीवाय भोगायतनस्थूलशरीरप्रदानमेव अत्र वर्धनम् । 'यविष्ठ्या' युवतम ! अतितरुणगुरुतनयजीवात्मन् ! बृहत् यथा स्यात् तथा 'शोचा' शोच अतिशयेन दीप्यस्व । मत्संकल्पनिर्मितनितान्तसुन्दराभिनवकलेवरलाभादिति भावः, शोकवचनोऽपि शुचिरत्र दीप्त्यर्थः इति सात्वताः ।

अर्वाचीनास्तु—

अतिशयेन युवानं स्वाश्रमागतं ब्रह्मचारिणं शिष्यं गुरुर्ब्रूते—'तन्त्वा' इति । अङ्गिरः ! गतिशील मम शिष्य ! समुन्नतिं कामयमान 'यविष्ठ्य' युवतम ! 'तम्' आगमनस्वेच्छा-निवेदनाभ्यां प्रख्यातम्, 'त्वा' त्वां 'समिद्भिः' समीचीनाभिर्विद्याभिः, 'घृतेन' दीप्त्या तेजसा च 'वर्धयामसि' वर्धयाम इति ।

उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत ।
जुषस्व समिधो मम । (शु. य. ३।४)

चतुर्थ्यां कण्डिकायां 'उप त्वाग्ने' इत्येक एव मन्त्रो जपार्थः । अस्य प्रजापतिर्ऋषिः गायत्रीछन्दः अग्निर्देवता । (का श्रौ. ४, ८. ४)

अथाध्वर्युर्जपति (अग्ने) (हर्यत) अस्मदायियज्ञसिद्धिमिच्छो ! अथवा हविःकामुक ! हर्यतिः कान्तिकर्मा (निघ. २, ६, १०) । हर्य गतिकान्त्योः(५१४) भौवादिकः परस्मैपदी (त्वा) त्वाम् (हविष्मतीः) हव्यसम्पन्नाः 'हविष्मत्यः इति वक्तव्ये' 'वा छन्दसि' (पा. ६, १, १०६) इति पूर्वसवर्णदीर्घः । (घृताचीः) घृतमञ्चन्ति प्राप्नुवन्ति ताः घृताक्ताः इमाः समिधः (उपयन्तु) उपगच्छन्तु-प्राप्नुवन्तु इत्यर्थः । 'व्यवहिताश्च' (पा. १, ४, ८२) इति सूत्रेण व्यवहितयोरप्युपसर्गक्रिययोर्वेदे प्रयोगाद् व्यवहितस्यापि 'उप' इत्युपसर्गस्य 'यन्तु' इति क्रिययाऽन्वयः । त्वं (मम) मदर्पितानि (समिधः) इमानि यज्ञियकाष्ठानि (जुषस्व) सेवस्व, अङ्गीकुरुष्वेति भावः । जुषी प्रीतिसेवनयोः (१२८९) तौदादिकः आत्मनेपदी । पादादित्वाद् अतिङः परत्वाभावात् न 'तिङ्ङतिङः' (पा. ८,१, २८) इति तिङोऽनुदात्तत्वम् । 'तास्यनु-दात्तेद्' (पा. ६, १, १८६)इत्यनेन लोटः स्थाने जातस्य लसार्वधातुकस्य मध्यमपुरुषैकवचने 'स्व' इत्यस्यानुदत्तत्वे सतिशिष्टस्वरस्य प्राधान्यात् विकरणस्वरेण 'जुषस्व' इति मध्योदात्तं क्रियापदम् – इति देवयाजिनः ।

प्रथमे समिदाधानाऽनुवाके मन्त्रस्वरूपाश्चतस्र एव कण्डिकाः । तासु यथाक्रमं—१–समिदाधानम् २–ऋत्विक्प्रेरणम् ३–अग्निसंदीपनम् ४–जप इति चतस्रः क्रिया

व्यख्याताः। कण्डिकासंख्या ४ (तासां आद्यास् तिस्रः ऋचः एव उपलब्ध-ऋग्वेदसंहितायां पठिताः)।

आत्मयाजिनस्तु— (अग्ने) हे आत्माग्ने ! (हविष्मतीः) हविष्मन्तः मनोवृत्तियुक्ताः (घृताचीः) घृताच्यः ज्ञानेन्द्रियसत्वयुक्ताः प्राणाः (त्वा) त्वाम् (उपयन्तु) प्रत्युपगच्छन्तु। (हर्यत)हः चन्द्रः र् अग्निः तयोर् योक्तृयोग्ययोः यः योगेन त अमृतस्वरूप ! हे आत्माग्ने! 'सोम एवाऽन्नमग्निरन्नादः (शत. १४, ४, २, १३)। (मम) मदीयान् (समिधः) प्राणान् (जुषस्व) सेवस्व। त्वामुपयतोऽङ्गीकुर्वित्यर्थः)।

भगवता समानीतं प्रदीप्तकायं स्वपुत्रं भगवता सह स्वचरणयोः प्रणिपातं कुर्वाणं दर्शं दर्शं सञ्जातप्रसादः सन्दीपनिर्भगवन्तमाशास्ते 'उप त्वेति'। अग्ने ! = अतितेजस्विन् ! जगत्त्रासकस्य कृतान्तस्यापि विजेतः ! अद्यावधि केनापि न कश्चिद् यमालयात् प्रत्यावर्तितः, त्वञ्च स्वतेजसा तं पराजित्य ममात्मजं समानीतवान् इति तवाऽतितेजस्वित्वे को विप्रतिपद्येतेति भावः। 'हर्यत'=उत्तरोत्तरां प्रगतिमासादयन्! कमनीय ! वा, सौन्दर्यातिरेकेण समस्तचित्ताकर्षकत्वात्। 'हविष्मतीः' हविष्मत्यः प्रशस्तहविर्दानादिवैदिककृत्योपदेशयुक्ताः दर्शपौर्णमासाग्निचयनादिकर्मप्रधानाः विद्याः न केवलं एतावदेव किन्तु 'घृताचीः' घृताच्यः घृतं प्रकाशः आत्मदर्शनं तदवता आत्मविद्या मम मदीयाः समिधः समीचीनाः 'त्वा' त्वाम् उपयन्तु उपगच्छन्तु। मयि स्थितं कृत्स्नकर्मोपासनाज्ञानप्रधानं शास्त्रीयं गूढतत्वज्ञानं ममादेशवशंवदे त्वयि योग्ये शिष्ये संक्रान्तं भवतु इति अभिप्रायः। अपि च लब्धविद्यस्त्वं गुरुकुलात् स्नातको भूत्वा स्वगृहं गत्वा कृतदारपरिग्रहः विविधान् भोगान् जुषस्व=सेवस्व, अन्ते अपवर्गञ्च। इति सात्वताः।

गुरुशिष्यसंवादपरोऽयं पूर्ववत् इत्यर्वाचीनाः। तत्पक्षे अग्ने ! तेजस्विन् मम शिष्य ! हविष्मतीः=हविष्मत्यः हूयते दीयते इति हविः, गुरुणा शिष्याय दीयमानं ज्ञानं तत्प्रधानाः, 'घृताचीः' घृताच्यः घृतेन प्रकाशेन अञ्चिताः पूजिताः रात्र्यः उपलक्षणमेतद् दिवसानामपि, उपयन्तु उपगच्छन्तु 'त्वा' त्वां शिष्यं,प्रत्यहं प्रतिरात्रि चं त्वम् अध्ययनशीलो भव इत्याचार्यो ब्रूते। मम समिधः तेजांसि 'जुषस्व' सेवस्व, मयि गुरौ स्थितं तेजः त्वयि संक्रामतु इति योजना।

भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा। तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे। (शु. य. ३।५)

२—अग्न्याधानाऽनुवाकः

१–३ अग्न्याधानम् ४ इध्मालम्भनम्

अस्यां पञ्चम्यां कण्डिकायां चत्वारो मन्त्राः। 'भूः' इति प्रथमा व्यहृतिर् एको मन्त्रः।

भुवः' इति द्वितीया व्याहृतिः एको मन्त्रः। 'स्वः' इति तृतीया व्याहृतिर् एको मन्त्रः। इमे त्रयो मन्त्रा गार्हपत्याहवनीययोर्द्वयोरग्न्योराधानार्थाः। तत्र 'भूः' इत्यस्य दैवी गायत्री छन्दः, अग्निर्देवता। 'भुवः' इत्यस्य दैव्युष्णिक् छन्दो वायुर्देवता। 'स्वः' इत्यस्य दैवी गायत्री छन्दः, सूर्यो देवना। 'द्यौः' इति चतुर्थो मन्त्र इध्मालम्भनः। अस्य याजुषी गायत्री छन्दः लिङ्गोक्ता देवता। सर्वेषां प्राजापत्यः ऋषिः (शत. २, १, ४, २८, का. श्रौ. ४, ९, १, १५)।

यजमानः अग्न्याधानयोग्यान् आपः, हिरण्यम्, ऊषा, आखूत्करः (मूषिकोत्कीर्णा मृत्तिका) शर्करा इति पञ्च संभारान् सम्पाद्य, अपेक्षितभूसंस्कारानन्तरं स्फ्येन भूमिमुल्लिख्य पवि-त्रायां भूमौ संभारान् सर्वान् संस्थाप्य तेषु अरणिसमुत्पन्नं ज्वलद्भिः काष्ठैरतिप्रदीप्तम् अग्निम् 'भूर्भुवः स्वः' इति त्रिभिर् व्याहृतिमन्त्रैरादधीत। इति गार्हपत्याधानम्। इध्ममूलं गार्हपत्ये प्रताप्य तेनेध्मेनाहवनीयस्योद्धरणं कृत्वा एवमेवाहवनीयाधानमपि कुर्यात्। अत्र 'भूर्भुवः स्वः' इति तिस्रो व्याहृतयोऽनेकार्थाः।

प्रजापतिर् 'भूः' इति व्याहृत्या भूमिलोकं, 'भुवः' इति व्याहृत्याऽन्तरिक्षलोकं, 'स्वः' इति व्याहृत्या द्युलोकमिति त्रीनेव लोकान् तिसृभिर् व्याहृतिभिः ससृजे, इत्यग्न्याधानकाले समुच्चार्यमाणासु व्याहृतिषु त्रिलोकीं स्मरेत्। व्याहृतित्रयेण ब्राह्मणक्षत्रियवैश्यास्त्रयो वर्णाः आत्मप्रजापशवो वा त्रयोऽप्यभिधीयन्ते। तस्माद् अग्न्याधानकाल एकैकव्याहृतिसमुच्चारणेन यथायथं त्रयाणां वर्णानां त्रयाणाम् आत्मप्रजापशूनां वा भावनां कुर्यात्। अनेनाग्न्याधानेनाहं त्रिलोकाधिपतिः, त्रिषु वर्णेषु संमानितः, आत्मादिसर्वेष्टपदार्थेषु चानायासलाभो भूयासमिति।

आहवनीयस्य पूर्वत आगत्य यजमानस् तदनन्तरं इध्मस्य पूर्वार्धं गृहीत्वा 'द्यौः' इति चतुर्थं मन्त्रं पठति—अहं यजमानः (भूम्ना) असंख्यग्रहनक्षत्रतारकादिबाहुल्येन, बहोर्भाव इत्यर्थे 'पृथ्वादिभ्य इमनिज् वा' (पा. ५, १, १२२) इत्यनेन इमनिचि प्रत्यये 'बहोर्लोपो भू च बहोः' (पा. ६, ४, १५८) इत्यनेन बहुशब्दस्य भूभावे प्रत्ययादेर् इकारस्य च लोपे तृतीयैकवचने भूम्नेति। (द्यौः इव) द्युलोक इवापरिमितपुत्रपौत्रादिसंतानो भूयासम्। (वरिम्णा) अतिशयविस्तारेण। उरोर्भाव. वरिमा तेन। पूर्ववत् इमनिचि प्रत्यये 'प्रिय-स्थिरस्फिरोरु' (पा. ६, ४, १५१) इत्यनेन उरुशब्दस्य 'वर्' इत्यादेशे रूपम् (पृथिवी इव) भूमिरिव प्रपन्नमात्रस्य शरणं भूयासम्। यद्वाऽऽहितोऽग्निरेव प्रार्थ्यते—हे अग्ने! त्वं (भूम्ना) ज्वालाबाहुल्येन (द्यौरिव) प्रकाशसे (वरिम्णा) प्रकाशविस्तारेण च (पृथिवीव) सर्वं जगद् दीपयसे। एवंभूतं त्वाम् अग्निम्। कीदृशं अग्निम्? (अन्नादम्) हुताशनं हुतस्य चरुपुरो-डाशादेर् अन्नस्य अत्तारं भक्षयितारं गार्हपत्यादिरूपम्। अन्नमत्तीति विग्रहे उपपदसमासे

'कर्मण्यण्' इति कर्तर्यण्प्रत्यये प्राप्ते व्यत्ययेन पचादित्वात् (पा. ३, १, १३४) अच् प्रत्ययः। अतएव अन्नऽअदम् इति पदपाठोपलम्भः। अणि प्रत्यये तु 'अन्न-आदम्'—इति पदपाठोऽभविष्यत्। (देवयजनि) देवा इन्द्रादय इज्यन्ते पूज्यन्ते यस्यां पृथिव्यां सा देव - यजनी। अधिकरणे ल्युटि टित्त्वात् 'टिड्ढाणञ्'(पा. ४, १, १५) इत्यादिना स्त्रियां ङीपि प्रत्यये रूपम्। तत्सम्बोधनम्। (पृथिवि) भूमे ! यस्यास्तवोपर्यग्निमाधाय सम्पन्नयज्ञो भविष्यामि (तस्याः) तत्स्वरूपायाः (ते) तव (पृष्ठे) पृष्ठदेशोपरि (अन्नाद्याय) अन्नभक्ष - णाय, यज्ञादिजन्यवृष्टिद्वारा भक्षणीयाऽन्नलाभाय। अन्नस्य अद्यं भक्षणम्। अत्तेः क्यपि उत्तरपदप्रकृतिस्वरेण 'अन्न-अद्याय' इति पदपाठे मध्यस्थोऽकार उदात्तः। अन्नं च तद् अद्यं च तस्मै इति कर्मधारयसमासेन पक्षान्तरं साधयन् महीधरः स्वरदोषाद् अमान्यः। (आदधे) स्थापयामीति देवयाजिनः।

आत्मयाजिनस्तु—या त्वं (भूम्ना) ज्योतिर्बाहुल्येन (द्यौरिव) स्वर्गतुल्या (वरिम्णा) उरुत्वेन (पृथिवीव) तथा (भूः भुवः स्वः) इति त्रैलोक्यरूपासि। (हे देवयजनि) देवो विष्णुरिज्यते यस्यां सा (पृथिवि) हार्दभूमे ! (तस्याः) ते (पृष्ठे) उपरि (अन्नादम्) हुतस्यात्तारम् (अग्निम्) आत्माग्निम् (अन्नाद्याय) प्राणेन्द्रियरूपस्याऽन्नस्याऽद्याय भक्षणाय प्रत्याहारद्वारा प्राणानां त्वयि योजनाय वशीकरणाय वा (आदधे) ध्यानेन स्थापयामीति।

स्वसुते नरकासुरे निहते स्वपौत्रस्य भगदत्तस्य अनिष्टमाशङ्कमाना त्रस्तहृदया पृथिवी भगवन्तं कृष्णं स्तौति 'भूरिति'। भूरादीनि त्रीणि सम्बोधनपदानि, भवतेः कर्तरि क्विपि भवतीति 'भूः' सन् सत्यः, भातीति 'भुवः' भातेर्डुवसि पृषोदरादित्वात् साधुः। स्वप्रकाशचिदात्मन्! सुष्ठु शोभनकर्मानुष्ठानेन अर्यते गम्यते इति 'स्वः' सुखमानन्दः, निरतिशयानन्दात्मन् ! सच्चिदानन्दविग्रह! भगवन्! अनुगृहाणेति शेषः। त्वं 'द्यौरिव' आकाशवत् 'भूम्ना' बहुत्वेनोपेतः।

किञ्च 'पृथिवीव' वसुधेव 'वरिम्णा' महत्त्वेन युक्तोऽसि। सहिष्णुः बहुपरिवारो विशालहृदयश्च त्वमस्माकम् अपराधं क्षमितुमर्हसि इत्यभिप्रायः। तामाश्वासयति 'पृथिवीति'। 'देवयजनि' ! देवा इज्यन्ते यत्र तादृशि देवानुग्राहिके! यागार्हप्रदेशप्रदानेन, अत एव देवप्रिये पृथिवि ! भूमे ! देवयजनीतिसम्बोधनेन 'त्वत्सुतेन मातुरनुहर्त्रा देवानुग्राहकेण देवप्रियेण भवितव्यम्। दूरे तावद् आस्तां देवानुग्रहः,अयन्तु विश्ववन्द्याया देवराजमातुः कुण्डले,भुवि च भूयसां भूभुजां कुमारिकाः अपजहारेति देवमनुष्यनारीतिरस्कर्ता अक्षम्यापराधः कथन्न हिंसनीयः। सुभगे ! त्वमेव कथयेति सूचितम्। एष भगदत्तः तव पौत्रः तवेव ममापि अनुग्राह्यः, कुमारत्वात्। अधुनैव एनं पूर्वज-परम्पराप्राप्ते राज्येऽभिषिञ्चामि, सुस्था भवतु तत्र भवती, न भेतव्यमित्याह-'तस्याः' इति यथाभूताया 'ते' तव अनुरोधात् पृष्ठे पृष्ठ-

वदुन्नते राजसिंहासने 'अग्निम्' तद्वत्तेजस्विनं भगदत्तं 'अन्नादम्' अन्नं पृथिवी तस्य भोक्तारं भूभुजं राजानं 'अन्नाद्याय' चिरं विविधराज्यवैभवोपभोगाय 'आदधे' स्थापयामि। यथाविधि राज्याभिषेकेण अस्य जनपदस्य स्वामिनं शासकं करोमि इत्यर्थः। (एषा कथा भाग० स्कन्ध १०, अ० ५६, पञ्चविंशादिषु पद्येषु द्रष्टव्या)

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः।
पितरं च प्रयन्त्स्वः॥ (शु. य. ३।६)

'आहवनीयाग्न्युपस्थानम्'

षष्ठी सप्तमी अष्टमी इति तिस्रः कण्डिकास् तिस्र ऋचः सार्पराज्ञीसंज्ञाः। तासां सर्पराज्ञी पृथिव्यभिमानिनो कद्रूः ऋषिः गायत्रीछन्दस्कत्वाद् गायत्रस्तृचः, अग्निर्देवता आहवनीयाग्न्युपस्थाने विनियोगः (शत. २, १, ४, २९। का. श्रौ. ४, ९, १६)।

यजमान आहवनीयाग्निम् अनेन सर्पराज्ञीदृष्टेन तृचेनोपतिष्ठते, ततो दक्षिणाग्निमादधाति च[1] (अयम्) समक्षे स्थित आहवनीयाग्निः (गौः) यजमानगृहान् गन्ता। गम्लृ गतौ (९८२) भौवादिकः परस्मैपदी 'गमेर्डोः' (पा. ३, २, ६९) एवं (पृश्निः) रक्तशुक्लादिविविधवर्णज्वालाभिश्चित्रवर्णः।(आ अक्रमीत्)सर्वतस्त्रिविधाग्निभेदेन क्रान्तवान्। 'व्यवहिताश्च' (पा. १, ४. ८३) इति व्यवहितेन उपसर्गेण क्रियायाः संबन्धः। क्रमणमेव विशिनष्टि (पुरा) प्राच्यां दिशि (मातरम्) पृथिवीम् (असदत्) आहवनीयात्मना स्थितवान्, 'षद्लृ विशरणगत्यवसादनेषु' (८५४) भौवादिकः परस्मैपदी। धातोर् लृदित्वाल्लुङि प्रथमपुरुषैकवचने 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' (पा. ३, १, ५५) इति च्लेरङ्, पादादित्वात् अतिङ्परत्वाभावात् 'तिङ्ङतिङः' (पा. ८, १, २८) इति निघातप्रसक्तिर्न भवति। अडागमस्योदात्तत्वात् (पा. ६, ४ ७१) आद्युदात्तत्वम्। (स्वः) स्वर् इत्यादित्यनाम (निघ. १, ४; निरु. २, १४)। सूर्यरूपेण (प्रयन्) स्वर्गे गच्छन् (पितरं) द्युलोकं (च) (असदत्) असीदत् इति संबध्यते। अयम् आहवनीयाग्निः पृथिवीं मातरं स्वात्मना पितरं द्युलोकं च सूर्यात्मनोपतिष्ठते। अतएवाऽयं सर्वत्र आ अक्रमीदिति योजनेति देवयाजिनः।

आत्मयाजिनस्तु—(अयं गौः) नाभिहृदयभृकुट्यादिकमलेषु गन्ता। गच्छतीति गौः। अथवा ग् शिवः अः विष्णुः औ ब्रह्मा, नाभिहृदयभृकुटिकमलेषु त्रिदेवरूपधारकः (पृश्निः) अतएव शुक्लश्यामलोहितवर्णधारकः आत्माग्निः (आ) सर्वतः (अक्रमीत्) कमलेषु गतवान्

१— ऋग्वेद १०, १८९, १। साम. १, ६३०; २, १३७६। अथर्व. ६, ३१, १; २०, ४८, ४। तै. सं. १, ५, ३, १।

(पुरः) प्राच्यां दिशि (मातरं) नाभिचक्रम् (असदत्) असीदत् (च) (स्वः) सूर्यः शिवरूपः (प्रयन्) सञ्चरन् (पितरं) भृकुटिरूपं द्युलोकं प्राप्तवान् इति ।

अयं पुरस्तद् वर्तमानः 'गौः' वृषभः कंसप्रेषितः कपटबलीवर्दरूपभृद्वृषभासुरः अरिष्टनामधेयः, 'पृश्निः' विचित्रवर्णः नीलवृषवद्विभिन्नाङ्गेषु विविधरूपोपेतः 'लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते' इति वचनात् ।'आ' अक्रमीत् आक्रान्तवान् श्रीकृष्णमभिगतवान् । पुरः ततः पूर्वं 'मातरं' भगवतो मातृभूमिं व्रजम् असदत्, 'आ' इत्यनुषङ्गः आजगाम आगतवान् । किं कुर्वन् ? निशितशृङ्गः भीषणाकृतिः व्रजवासिनो जनान् त्रासयन् उग्रं शब्दायमानः खुरैः भुवमाघ्नन् खुरशृङ्गोत्खातरजःपुञ्जप्रक्षेपेण 'स्वः'-पितरं स्वर्गाख्यं द्युलोकं प्रयन् व्याप्नुवन् । भगवता असौ दुर्वृत्तः शृङ्गे गृहीत्वा भुवि पातितो गतासुर्बभूव । क्रोधातिरेकेण तदीयेन भगवता उत्खातशृङ्गेण मृतोऽपि भृशं ताडितश्च । कथैषा (भाग. १० स्कन्ध, अ. ३६) द्रष्टव्या ।

अर्वाचीनास्तु 'गौः' सर्वत्र गन्ता सर्वव्यापकः परमात्मा, 'पृश्निः' तेजोमयः 'पृश्निः' संस्पृष्टो भासेति, इति निरुक्तम् (२।१४) । पुरः त्रीन् लोकान् 'आ' अक्रमीत् क्रान्त्वा स्थितः, तत्रैव विवृणोति 'स्वः' आदित्य-लोकं स्वरादित्यो भवति इति निर्वचनात् (नि. २। १४) 'प्रयन्' व्याप्नुवन् मातरम् अन्तरिक्षमसदत् गतवान् । अन्तरिक्षशब्देन सर्वेषाम् ऊर्ध्वलोकानां संग्रहः । 'पितरं' 'च' 'भूलोकं', चकारेणाधोलोकसमुच्चयः । असददित्यनुषङ्गः, अनेन भगवतस्सर्वव्यापकत्वं साधितमिति । इति सात्वताः ।

अन्तश्चरति रोचनाऽस्य प्राणादपानती
व्यख्यन् महिषो दिवम् ।। (शु. म. ३।७)

आहवनीयाग्न्युपस्थानम्

षष्ठ्यां कण्डिकायाम् आहवनीयाग्नेः सूर्यस्वरूपत्वं दर्शितम् । अस्यां सप्तम्यां तस्य वायुरूपत्वं स्तौति[1] (अस्य) आहवनीयाग्नेः (रोचना) दीप्तिः वायुरूपा शक्तिः । 'रुच दीप्तौ' (७४५) भौवादिकः आत्मनेपदी । 'रोचयतेर्भावे युच् प्रत्ययः' (पा. ३, ३, १०७) चित्त्वादन्तोदात्तश्च । (प्राणात्) प्राणिमात्रस्य शरीरेषु प्राणनात् श्वासक्रियाया अनन्तरम् (अपानती) अपानव्यापारं विदधती निश्वासक्रियां सञ्चारयन्ती । प्राणाऽपानसमायुक्तो हि जठराग्निर्वैश्वानरो भुक्तं पचति । उक्तमपि भगवता—

'प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' । (गीता. १५।१४) इति

१—ऋग्वेद १०, १८९, २ । साम. २, १३७७ । अथ ६, ३१, २; २०, ४८, ५ । तै. सं. १, ५, ३,१ ।

एवमेवाऽपानात् प्राणतीत्यर्थलभ्योऽर्थः। 'अन प्राणने'(१०७०)आदादिकः परस्मैपदी। अपपूर्वकाद् अनितेः शत्रन्तम् अन्तोदातं पदम्। ततः 'उगितश्च' (पा. ४, १, ६) इति स्त्रियां ङीपि 'शतुरनुमो नद्यजादी' (पा. ६, १, १७३) इत्यन्तोदात्तत्वम्। (अन्तः) द्यावापृथिव्योर्वा शरीरस्य वा मध्ये (चरति) संचरति। 'अन्तरिक्षेऽयं तिर्यङ् वायुः पवते' इति शतपथश्रुतेः। एवं सूर्यवातात्मना प्राणिमात्रं जीवयन्नयमग्निः स्वमुपतिष्ठमानस्यापि महदुपकरोति — तदाह — (महिषः) महान् 'अग्निर्वै महिषः स इदं जातो महान्' इति शतपथश्रुतेः। अथवा महि महत् यज्ञफलं सनोति ददातीति महिषः अग्निर् उपस्थायुकस्य कृते (दिवम्) द्युलोकम्. पुण्योपभोगार्थं स्वर्गद्वारं (व्यख्यत्) विशेषेण प्रकाशयति। समुद्घारयतीति यावत्। चक्षिङ् व्यक्तायां वाचि, अयं दर्शनेऽपि (१०१७) आदादिक आत्मनेपदी। विपूर्वकश्चष्टिः प्रकाशनार्थः, लेडर्थे लुङि प्रथमपुरुषैकवचने 'चक्षिङः ख्याञ्' (पा. २, ४, ५४) इति ख्याञादेशे 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पा. ३, १, ५२) इति च्लेरङि रूपम्। विपूर्वकात् ख्या प्रकथने धातोः व्यख्यत् इति रूपं सिषाधयिषन् महीधरोऽप्रसन्नतर्कः। आदादिकस्य तस्य धातोः सार्वधातुकमात्रविषयत्वाद् आर्धधातुके तदप्रयोगादिति देवयाजिनः।

आत्मयाजिनस्तु– यदा (अस्य) आत्माग्नेः (रोचना) प्राणशक्तिः (प्राणात् अपानती) मुखनासिकाभ्यां वायुं बहिर्निःसारयन्ती, पुनर्मुखनासिकाभ्यामन्तरा कृषन्ती (अन्तः) शरीरमध्ये (चरति) गच्छति, तदा (महिषः) प्राणः 'प्राणा वै महिषाः' (शत. ६, ७, ४, ५), (दिवं) भ्रूकुटि गगनमण्डलं वा (व्यख्यत्) विशेषेण प्रकाशितवान् प्रकाशयति चेति।

सात्वतपक्षे वृन्दावनतो रथेन रामकृष्णौ मधुपुरीं नयन् अक्रूरः रथे उपवेश्य तौ, तयोर्निदेशात् यमुनायां स्नातुं जगाम। तत्र बलरामसहितंश्रीकृष्णस्य दिव्यं विग्रहम् अपश्यत्। विस्मयं च लेभे। तत्र मध्येजलं भगवतो दुर्निरीक्ष्यता (गी. ११।१२) श्लोके प्रतिपादिता। अभूतपूर्वा युगपदुत्थितसूर्यसहस्रभासोपमिता कान्तिः पार्थेनाऽनुभूता विजृम्भमाणस्य भगवतो मुखे यशोदया जनन्या च दृष्टा। 'रोचना' दीप्तिः अस्य भगवतः अन्तः कालिन्दी-वारि मध्ये चरति प्रसरति तां विशिनष्टि। प्राणादपानती=उपलक्षणमेतद् अपानात् प्राणती च प्रणिमात्रस्य प्राणापानव्यापारौ कारयन्ती इति महीधरः। प्राणः प्रकृष्टजीवन समुन्नमनमूर्ध्वगतिः, अपानोऽपकृष्टजीवनमधोगतिः। तथा च समुन्नतेरनन्तरम् अवनमयन्ती उत्कृष्टान् राज्ञः, क्षणादिव निकृष्टान् भिक्षुकान् विदधाना। क्षणमात्रेणावनतेरन्तरं समुन्नमयन्ती क्षणमात्रेण निकृष्टान् भिक्षुकांश्च लोकोत्तरवैभवसम्पन्नान् कुर्वाणा। अन्तर्ब्रह्माण्डमध्ये या वर्तते सा रोचनेति सम्बन्धः। लोकानामुत्कर्षाऽपकर्षौ यदधीनौ सा भगवद्दीप्तिरक्रूरेण दृष्टेतिभावः। कदा, यदा महिषः (निघण्टु ३, ३, ८) श्रीकृष्णः 'मह पूजायाम्' (भ्वा.

परस्मैपदी ७३०), तस्मात् 'अविमह्योष्टिषच्' (उ. १।४५) टिषच् प्रत्ययः, महतेः क्विपि सप्तम्येवचने महीत्युपपदे सदेः 'अन्येष्वपि दृश्यते' इति (३, २, १०१) डः, तत्पुरुषेकृति (६, ३, १४) सप्तम्या अलुकि महि महति स्थाने सीदति इति महिषः इति देवराजः। महि-महत्त्वं सनोति ददाति इति महिष इति महीधरः। 'व्यख्यत्' दर्शनकर्मणः चक्षेः अन्तर्भा-वितण्यर्थस्य लुङि 'रूपं' विशेषेण दर्शयाभास इति तदर्थः। दिवं दिव्यम् अद्भुतं स्वकीयं विश्वरूपम्। अपि वा भगवत्पितृव्यो महिषो महानक्रूरः दिवं भगवतो दिव्यं रूपं व्यख्यत् विस्पष्टं दृष्टवान्। अलं णिजर्थान्तर्भावेन (कथैषा भाग० १० स्कन्धे ३९ अध्यायेऽनुसन्धेया सप्तत्रिंशदादि श्लोकेषु।

अर्वाचीनास्तु अस्य भगवतः प्राणापानव्यापारो कारयन्ती दीप्तिः अनन्तब्रह्माण्डमध्ये चरति गच्छति प्रसरति यद्दीप्त्यधीनो जगतः प्राणापानव्यापारो, स महिषः महान् भगवान् दिवं मोदं व्यख्यत् प्रकाशयति अनुभावयति। मोदार्थकस्य दीव्यते रूपमिति। इति सात्वताः।

त्रिंशद्धाम विराजति वाक् पतङ्गाय धीयते।
प्रतिवस्तोरह द्युभिः ॥ (शु, म. ३।८)

आहवनीयाग्न्युपस्थानम्

अयम् आहवनीयाग्निस्[1] (त्रिंशत्) त्रिंशत्संख्याकेषु (धाम) धामसु स्थानेषु । उभयत्र 'सुपां सुलुक्' (७, १, १९) इत्यादिना विभक्तेर्लुक्। 'धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति' (निरु. ९, २८) प्रकृते धामशब्देन स्थानमभिप्रेतं, तच्च स्थानं मुहूर्ता-ख्यम्। मुहूर्ताश्च त्रिंशद् अहोरात्रे। त्रिंशत्संख्याकेष्वेव मुहूर्तेषु याजकैः स्तूयमाना (वाक्) स्तुतिलक्षणा (विराजति) शोभते दीप्यत इति यावत्। राजृ दीप्तौ (८२२) भौवादिक उभयपदी। स्तुतिलक्षणा यज्ञे प्रकाशते सा वाक् यदा (पतङ्गाय) पतन् गच्छति पतङ्गः 'अन्यत्रापि दृश्यत इति वक्तव्यम्' (पा. वा. ३, २, ४८) इति गमेर्डः प्रत्ययः। आहवनीया-ग्नये। अरणिभ्यां पतन् अग्निः प्राग् गार्हपत्यभावं गच्छति, ततः पतन् आहवनीयत्वम् आपन्न आहवनीयाग्निः पतङ्गः तस्मै (धीयते) क्रियते उच्चार्यते इति भावः। स्तोतृभिर् आहवनी-याग्निं स्तोतुं यदा स्तुतिलक्षणा वाक् प्रयुज्यते तदैव सा शोभते नान्यथेति तदाशयः। अथवा पतङ्गः पक्षी। पक्षिसदृशोऽयमग्निर्गार्हपत्यस्थानादाहवनीयस्थानं प्रपद्यते तस्मै वाग् धीयत इति सम्बन्धः। (अह) इति निपातो विनिग्रहार्थीयः (निरु. १, ४)। पूर्वोक्तस्यान्यथा

१—ऋग्वेद १०, १८९, ३। साम. १, ६३२, २, १३७८। अथर्व. ६, ३१, ३; २०, ४८, ६। तै. सं. १, ५, ३, १।

विनिग्रहः । न केवलं त्रिंशद् धामसु विराजमानया वाचा पतङ्गस्य वैशिष्ट्यं अपितु (वस्तोः) वस्तोरिति अहर्नाम (निघ. १, ६), 'वस आच्छादने (१०२३) आदादिकः आत्मनेपदी । वस्ते दीप्त्या आच्छादयति, बाहुलकात् तोसुन् प्रत्यय इति देवराजयज्वा ।(प्रति) प्रतिलक्ष्य । प्रतिदिनमिति यावत् (द्युभिः) प्रकाशैः । देवनं द्यौः प्रकाशः, स्वयंप्रकाशोऽग्निर्यागपरायणाद्यनेकविधैर् उत्सवैश्च प्रकाशते।अथवा यागपरायणादिलक्षणैरुत्सवैरपि स्तोतॄणां स्तुतिलक्षणा वाग् विराजति, अतएव राजमाना वाक् यथास्थानं भ्राजमानेऽग्नौ निधीयत इति देवयाजिनः ।

अथ प्रसङ्गाद् अग्नेः सर्वात्मकत्वं निरूप्यते । तद् यथा—

लौकिकः पावको[१] ह्यग्निः प्रथमः परिकीर्तितः ।
अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्तितः ॥१॥
पुंसवे चमसो[३] नाम शोभनः[४] शुभकर्मसु । (शुङ्गकर्मणि इति रघुः) ।
सीमन्ते ह्यनलो[५] नाम प्रगल्मो[६] जातकर्मणि ॥२॥
पार्थिवो[७] नामकरणे प्राशनेऽन्नस्य वै शूचिः[८] ।
सभ्यनामा[९] तु चूडायां व्रतादेशे समुद्भवः[१०] ॥३॥
गोदाने सूर्यनामा[११] स्यात् केशान्ते याजकः[१२] स्मृतः ।
(वैश्वानरो[१] विसर्गे स्यात् विवाहे बलदः[२] स्मृतः ॥४॥
(अपरे कर्मणि) आवसथ्यस्तथाधाने[३] वैश्वदेवे तु पावकः[४] ।
ब्रह्माग्निर्गार्हपत्ये[५] स्याद् दक्षिणाग्निरथेश्वरः[६] ॥५॥
विष्णुराहवनीये[७] स्यादग्निहोत्रे त्रयो मताः ।
लक्षहोमेऽभीष्टदः[८] स्यात् कोटिहोमे महाशनः[९] ॥६॥
एके घृतार्चिषां प्राहुरग्न्यधीनपरायणाः ।
रुद्रादौ तु मृडो[१०] नाम शान्तिके शुभकृत्[११] तथा ॥७॥
पूर्णाहुत्यां मृडो[१२] नाम) इति रघुः ।
पौष्टिके वरदश्चैव[१३] क्रोधाग्निश्चाभिचारिके[१४] ।
वश्यार्थे वशकृत्[१५] प्रोक्तो वनदाहे तु पोषकः[१६] ॥८॥
उदरे जठरो[१७] नाम क्रव्यादः[१८] शवभक्षणे ।
समुद्रे बाडवो[१९] ह्यग्निर्लये संवर्तकस्तथा[२०] ॥९॥
[१]सप्तविंशतिसंख्याका अग्नयः कर्मसु स्मृताः ।

१—यद्यपि पाठान्तरदर्शनाद् अग्निनाम्नां संख्या सप्तविंशतेरधिका, तथापि सर्वेषां सप्तविंशत्यामेवाऽन्तर्भाव इति तथोच्यते ॥

तं तमाहूय होतव्यं यो यत्र विहितोऽनलः ॥१०॥
अन्यथा विफलं कर्म सर्वं तद्राक्षसं भवेत् ।
आदित्यादिग्रहाणां च साम्प्रतं ह्यग्निरुच्यते ॥११॥
आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते ।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः ॥१२॥
बृहस्पतौ शिखी नाम शुक्रे भवति हाटकः ।
शनैश्चरे महातेजा राहौ केतौ हुताशनः ॥१३॥
यज्ञादौ तु पञ्चभेदाः—
आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्यो गार्हपत्य इत्येते पञ्च वह्नयः ॥१४॥

द्वितीयेऽन्याधानानुवाके चतस्रः कण्डिकाः (तासां. ६, ७, ८ तिस्रः ऋचः) सप्त मन्त्राश्च । तेषु १ अग्न्याधानम् २ इध्मालम्भनम् ३ आहवनीयाग्न्युपस्थानम् एताः क्रिया वर्णिताः । अनुवाकद्वये कण्डिकाः ८ मन्त्रा ११ (तेषां ६ ऋचः) ॥

आत्मयाजिनस्तु—या (वाक्) 'सर्वं खल्विदं ब्रह्म, 'नेह नानास्ति किञ्चनेति-स्वरूपा (त्रिंशद् धाम) चतुर्दशभुवनानि, प्रधानमहदहंकारास्त्रयः, स्थूलसूक्ष्मभूतानि, तत्वानि दश, स्थूलसूक्ष्मकारणशरीराणि त्रीणि एवं त्रिंशद्धामसु (विराजति) विशेषेण शोभते । सा (प्रति वस्तोः) प्रत्यहं (अहद्युभिः) मन्त्रशास्त्ररूढ्या अः विष्णुः ह् शिवः, अः ब्रह्मा, द् काली, य् सरस्वती, उः लक्ष्मीः, इति सशक्ति त्रयाणां देवानां रूपैः (पतङ्गाय) आ नाभिकमलाद् मूर्ध्नि कमले गमनशीलायात्माग्नये (धीयते) उच्चार्यते, तस्य सर्वात्मकत्वादिति ।

त्रिंशद्धामसु त्रयो लोकाः पृथिव्यन्तरिक्षस्वर्गाख्याः ते दशभिः दिग्भिः सम्बद्धाः । दश-संख्यया गुणितास्त्रयस्त्रिंशत् सम्पद्यन्ते । तेषु त्रिंशत्संख्याकेषु लोकेषु वाक् वेदवाणी कर्मयो-गोपदेशिका 'कुर्वन्नेवेह कर्माणि' इत्यादिरूपा विराजति=विशेषेण शोभते, सर्वलोकानु-ग्राहकत्वात् या सा 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वेताश्व० ६, १८)इति श्रुतिवचनाद् ब्रह्मण उपदिष्टा, तथा सूर्यायापि। अतःभगवान् ब्रूते 'इमं विवस्वते योगं प्रोक्तवानहमव्ययम्" (गीता ४।१) इति तदभिप्रायेणाचष्टे - पतङ्गाय सूर्याय धीयते धार्यते, उपदिश्यते । अयं भावः द्वौ वेदसम्प्रदायौ ब्रह्मसम्प्रदायः आदित्यसम्प्रदायश्च । प्रथमे क्रमेण नारायणः, ब्रह्मा, वशिष्ठः, शक्तिः, व्यासः, तच्छिष्या वैशम्पायनादयः । द्वितीये भगवान् नारायणः ततः सूर्यः ततो याज्ञवल्क्यः तच्छिष्याः कण्वमाध्यन्दिनादयः इति । जगदु-त्पादकाय चतुर्मुखाय इव सूर्यायापि भगवता वेदवाणी यथाविधि प्रदत्तेति,तस्मात् सुष्ठु उक्तं वाक् पतङ्गायेति । येन परमात्मना वेद-विद्या ब्रह्मसूर्यमुखेनास्मभ्यं प्रदत्ता, स परमात्मा

प्रतिवस्तोः (वस्तोः इत्यहर्नाम निघण्टुः १।६।१) वस्तेर्बाहुकालात् कर्तरि तोसुनि सिध्यति, वस्ते आच्छादयति ज्योतींषि नक्षत्राणि इति देवराजः। प्रतिदिनं द्युभिः द्योतमानैः योगसाधनैः साक्षात्करणीय इति शेषः। अहःशब्दः कर्तव्यविशेषसम्बन्धाभिधायकः। अपि वा 'अह व्याप्तौ' अचि, सम्बोधने हे, अह! (स्वादिः परस्मैपदी, १२७३) हे सर्वव्यापक परमात्मन्! द्युभिः दिव्याभिः स्वशक्तिभिः प्रतिवस्तोः प्रतिदिनमस्मान् रक्षेति शेषः।

अपि वा त्रिंशता भेदेन प्रकारेण धम्यते अर्च्यते प्रशस्यते धमतिरर्चतिकर्मा (निघण्टुः ३।१४।१२) वस्तोरित्यव्ययं नेदं प्रथमान्तं षष्ठ्यन्तं वेति अमितव्यम्। त्रिंशद्धामा धामन्-शब्दः स्थानपर्यायो वा, दधाति वस्तुजातमस्मिन्निति अधिकरणे मनिन्। केचित् स्वरा अष्टादश प्रभेदाः,यद्यपि ऋकारः स्वयम् अष्टदशप्रभेदोऽपि स्वसवर्णस्य लृकारस्य द्वादशसंख्यया संकलितस्त्रिंशत्प्रभेदः। एवञ्च ऋकारेण त्रिंशत्प्रभेदयुक्तेन घटिता कृष्णेति द्व्यक्षरा वाक्। पतङ्गाय जीवाय तम् उद्धर्तुं धीयते गुरुणा उपदिश्यते, पतेरङ्गच् (उ. ११७) इत्युणादिसूत्रेण पतङ्गशब्दो निष्पद्यते। पतति गच्छति एकस्माद् जन्मनो जन्मान्तरं स्वार्जितकर्मभोगाय इति पतङ्गो जीवः प्रेत्यभावापरनामधेयः संसारार्णवे निमग्नः। तदुक्तं-सकृदुच्चरितं येन श्रीकृष्णेत्यक्षरद्वयम्। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥ इति।

गुरुः शिष्यं ब्रवीति—प्रतिवस्तोः प्रत्यहम् अह व्याप्नुहि द्युभिः कान्तिभिः 'अह व्याप्तौ' मध्यमपुरुषैकवचने व्यत्ययेन शपि हेर्लुकि साधु इति सात्वतपथपान्थाः। केचित् सुहृद्वर्याः इत्थं व्याचक्षते ङ् ञ् ण् वर्जं द्वाविंशतिः कादयो मपर्यंताः स्पर्शाः। चत्वारो यणः ऊष्माणश्चत्वारः संकलनया त्रिंशद्वर्णैः धमति, गच्छति, धम्यते अर्च्यते वा सा त्रिंशद्धाम=वाक् त्रिंशद्वर्णोपचरिता वेदवाणी पतङ्गाय जीवाय, धीयते उच्चार्यते सः श्रुतवेदो जीवः भगवत्प्रसादात् द्युभिः कान्तिभिः 'अह' अह्नोतु ताभिर्व्याप्तो भवतु,वेदवाचा लब्धात्मप्रदर्शनोऽतितेजस्वी सन् मोक्षमश्नुताम्। एते व्यञ्जनेषु स्वराणामन्तर्भावं मन्वानाः महानुभावाः श्लाघनीयप्रज्ञाः। इति सात्वताः।

वैदिकेषु हि मन्त्रिषु तात्कालिके (वेदकालिके) निवृत्त-विज्ञान-यज्ञ-स्तुतिभेदभिन्नानां चतुर्णां निरूपणमिति हि वैज्ञानिकः समयः। यथोक्तं स्वर्गीयैर्विद्यावाचस्पतिश्रीमधुसूदनोझामहोदयैः स्वीये जगद्गुरुवैभवे ग्रन्थे—

'यावन्त एव त्विह सन्ति लोके चरित्र्यसम्बन्धिनिबन्धलेखाः।
तेभ्योऽयमुत्कर्षं इहास्ति वेदे विज्ञानयज्ञो सहलोकवृत्तो॥

अध्यात्मविज्ञानमथ धिदैवं विज्ञानमेवं त्रिदिवेतिवृत्तम् ।
यो याज्ञिकोऽर्थस्त इमे विशुद्धाः क्व च क्व च श्लिष्टतया च मन्त्रे ॥[१]

अर्थात् वैदिकेषु मन्त्रेषु क्वचित् तात्कालिकस्य (वेदकालिकस्य) लोकवृत्तस्य,[२] क्वचिद् यज्ञसम्बधिनां विषयाणां,[३] क्वचिदध्यात्मविज्ञाननस्य,[४] क्वचिदाधिदैविकस्य (प्राकृतिकस्य) विज्ञानस्य,[५] क्वचिद् द्वयोः,[६] क्वचित् त्रयाणां[७] च निरूपणं वर्तते ।

प्रकृतासु तिसृषु कण्डिकासु (६-८) साक्षात्कृतधर्मभिर्महर्षिभिरार्षेण चक्षुषा साक्षात्कृतस्य सूर्यसम्बन्धिन आधिदैविकस्य विज्ञानस्य निरूपणं विद्यत इति तदेवेह समासतः प्रदर्श्यते ।

आयं गौरित्यादि—

अयं—पुरोदृश्यमानः, पृश्निः— चित्रवर्णः सप्तरश्मिमयत्वात्, गौः— गमनशीलः सूर्यः पुरः- प्राच्यां दिशि प्रातरित्यर्थः, मातरम्-पृथीवीम्, पृथिव्या अङ्के इत्यर्थः, असदत्-असीदत् सीदतीत्यर्थः छान्दसो लकारव्यत्ययः । ततश्च पितरं-द्युलोकं, प्रयन्-गच्छन् स्वः - स्वर्गम् आ अक्रमीत् आक्रमते, पूर्ववच्छान्दसो लकारव्यत्यासः । अर्थात् पृथिवीतो द्युलोकपर्यन्तं च जगद् व्याप्नोतीत्यर्थः । इमे एव द्यावापृथिव्यौ अन्तरा सूर्यस्तपति 'एष इमौ लोकावन्तरेण पवते' (शत. ७।२।३।१) इति श्रुतेः । अत्र मन्त्रे मातृशब्दः पृथिव्याः, पितृशब्दश्च द्युलोकस्य वाचकः ।

१—जगद्गुरुवैभवम्, पृ॰ ३१

२—ऋ॰सं॰मं॰ १०, अ॰ ४, सू॰ ४८-४९ । ऋ॰सं॰ ७।२।१८

३—चत्वारि शृङ्गा इत्यादि । ऋ॰सं॰मं॰ ४, अ॰ ५, सू॰ ५८

४—मनसा संकल्पयति यत् तद्वातमभिगच्छति ।
वातो देवेभ्य आचष्टे यथा पुरुष ते मनः ॥ (शत॰ ३।४।२।७)

५—कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन् सदनाद् ऋतस्यादिद् घृतेन पृथिवी व्युद्यते ॥ (ऋ॰सं॰मं॰ १, अ॰ २२, सू॰ १६४)

६—यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥ (यजु॰सं॰ ३१।१६)
अत्र हि मन्त्रे यज्ञलोकवृत्तयोः समुच्चयः ।

७—पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥ (यजु॰ सं॰ १७।६७)
अत्र हि यज्ञ-विज्ञान-लोकवृत्तानां समुच्चयः ।

'द्यौष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृडता नः ।
विश्व आदित्या अदितेः सजोषा अस्मभ्यं शर्म बहुलं वियन्त ॥' (ऋ. ६।५१।५)
'द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥' (ऋ. १।१६४।३३)
'द्यौष्ट्वा पिता पृथिवी माता जरां जरायुं कृणुतां संविदाने ।
यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः ॥' (अ. २।५।२८।४

इति श्रुतिभ्यः ।

'अन्तश्चरति' इत्यादि—

अस्य सूर्यस्य रोचना—रश्मिमयी दीप्तिः प्राणादपानती - प्राणनापाननव्यापारं कुर्वती (अग्रे गमनं प्राणनम्, पश्चाद् गमनं चापाननम्) सूर्यरश्मयो हि प्राणनापानने - गमनागमने कुर्वन्तो हि प्रयान्ति । छायायामिदं प्रत्यक्षमनुभूयते । छाया हि पूर्वं पुरः प्रयाति ततः स्वल्पं पश्चात्सरति ततश्च पुनरग्रे प्रयाति । छायायां यत्प्राणनमपाननं च दृश्यते तत् सूर्यरश्मीनां प्राणनापाननव्यापारेणैव वर्तते, छायायां स्वतो गत्यभावात् । यथा बहिः लोके सूर्यरश्मयः प्राणनापाननव्यापारं कुर्वन्तःएव प्रयान्ति तथा प्राणिनां प्राणनापाननव्यापारं श्वासोच्छ्वासरू कुर्वन्त एव ते यान्ति । प्राणिनां हृदये यः श्वासप्रश्वासरूपो व्यापारः स प्राणिहृदये प्रविष्ट-सूर्यरश्मिकृत एव । यतो हि सूर्य एव प्राणिहृदयं प्रविश्यात्मरूपेण विराजति ।

'चित्रं देवानमुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥' (ऋ. १।११५।१)

'रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरयममुष्मिन्' । (बृ. आ. ७।५।२)

'एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं च, अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ताः, आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः' ॥

(छा. ७।६।२)

इति श्रुतिभ्यः । एतदेवाभिसन्धायोक्तम्—

रोचना—सूर्यरश्मिमयी दीप्तिः, अन्तः-प्राणिहृदये चरन्ती गच्छन्ती प्राणिहृदयं प्रविश्या-त्मरूपत्वेन श्वासोच्छ्वासरूपं प्राणनापाननव्यापारं विधत्त इत्यर्थः ।

अथवा सूर्यरश्मिदीप्तिः अन्तः-द्यावापृथिवीमध्ये चरति । महिषः-महान् एष सूर्यः,महत्त्वं चास्य बृहत्साममयत्वात् सूर्यप्रकाशस्य त्रैलोक्यव्याप्तत्वाच्च बोध्यम् । दिवं-द्युलोकं व्यख्यत्-प्रकाशयति छान्दसो लकारव्यत्ययः ।

'त्रिंशद्धाम' इत्यादि—

अर्थ—पूर्वमन्त्रप्रतिपादितः सूर्यः त्रिंशद्धाम-त्रिंशद्दण्डात्मककालपर्यन्तं विराजति-प्रकाशते। षष्टिदण्ड (घटिका) परिमिताहोरात्रात्मके काले सूर्यः त्रिंशद्दण्डपर्यन्तमेव प्रकाशते पृथिव्यां, त्रिंशद्दण्डपर्यन्तमेव सूर्यप्रकाशस्य पृथिव्यां स्थितेः। सूर्यप्रकाशोपलक्षितस्य कालस्यैव चाहः-पदवाच्याचात्। वाक्-'त्रिंशद्धाम विराजति' इत्येषा स्तुतिरूपा वाक् पतङ्गाय सूर्याय धीयते-उच्यते। पतन् गच्छतीति व्युत्पत्त्या सूर्य एवात्र पतङ्गशब्देनोच्यते।

कथमेतज्ज्ञायते यत्सूर्यः त्रिंशद्धाम विराजति इति शङ्कामपनेतुमाह—'प्रतिवस्तोरह द्युभिः' इति। अर्थात् प्रतिवस्तोः प्रत्यहं 'वस्तोः द्युः भानुः' (निघ. १।९।१) इत्यहर्नामसु वस्तो-शब्दस्य पाठात्। द्युभिः—वर्तमानैः सूर्यप्रकाशैः अह-निश्चितमेतज्ज्ञामते इत्यर्थः। 'अह' इति विनिग्रहार्थीयो निपातः (निरु. १ अ.)

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा।
अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा॥ (शु. य. ३।९)

३—अग्निहोत्राऽनुवाकः

१—सायंहोमः २—प्रातर्होमः ३—ब्रह्मवर्चसकामस्य सायंहोमः ४—तस्यैव प्रातर्होमः ५—सामान्येन प्रातर्होमः।

अस्यां नवम्यां कण्डिकायां पञ्चमन्त्राः। 'अग्निर्ज्योतिः' इति सायं होमार्थः, 'सूर्योज्योतिः' इत्यपरः प्रातर्होमार्थः, उभयोस् तक्षा ऋषिः, एकपदा गायत्रीछन्दः, लिङ्गोक्ता देवता। 'अग्निर्वर्चः' इति ब्रह्मवर्चसकामस्य सायंहोमार्थः, एवमेव 'सूर्यो वर्चः' इति ब्रह्मवर्चसकामस्य प्रातर्होमार्थः। द्वयोरनयोः प्राजापत्य ऋषिः, एकपदा गायत्रीछन्दः, लिङ्गोक्ता देवता। पञ्चमो मन्त्रो 'ज्योतिः सूर्यः' इति प्रातर्होमार्थः, अस्य जीवलश्चैलकिर्ऋषिः, एकपदा गायत्रीछन्दः, लिङ्गोक्ता देवता। अथवा समेषां पञ्चानां मन्त्राणां प्राजापत्य ऋषिः (शत. २, ३, १, ३०-३६; का. श्रौ. ४, १४, १४-१५, १५, १०)।

'यदा ह्येव सूर्योऽस्तमेत्यथाग्निर्ज्योतिः, यदा सूर्य उदेत्यथ सूर्यो ज्योतिः' (शत. २, ३, १, ३०) इति श्रुतेः। अस्तं गच्छन् सूर्योऽग्निज्योतिरनुप्रविशति, अतः सायंहोमे 'अग्निर्ज्योतिः' इति मन्त्रेण आहवनीयेऽग्नौ प्रक्षिप्तायाः प्रदीप्तायाः समिध उपरि प्रथमाम् आहुतिं जुहोति (अग्निः) मन्त्रे 'स्वाहा' पदश्रुत्या तद्योगेन सर्वत्र चतुर्थ्याः सत्वेऽपि अत्र चतुर्थ्यर्थे प्रथमा, अग्नये (ज्योतिः) ज्योतिषे सूर्यज्योतिःस्वरूपाय (ज्योतिः) ज्योतिषे सूर्यज्योतिःस्वरूपाय

(अग्निः) अग्नये (स्वाहा) दत्तं हविः सुहुतमस्तु। अत्र 'ज्योतिरग्निः' इति विपर्यस्य पूर्वाभ्यासः समादरार्थः। अभ्यासे भूयांसमर्थं मन्यन्ते,(निघ. १०।४२)इति यास्कवचनात्। अथवा सोऽयम् अग्निदेवः स एव ज्योतिः (अग्निः) प्रत्यक्षमाहवनीयाग्निस्वरूपं ज्योतिः दीप्तिः प्रकाशः। तस्मै (स्वाहा)। (ज्योतिः) प्रकाशस्वरूपः यः (अग्निः) प्रत्यक्षं स्थितः स एव (अग्निः) अग्निदेवः (स्वाहा) अग्नेश्च ज्योतिषश्चैकरूप्याद् अभेदप्रतिपत्तये उभयत्र प्रथमा विभक्तिः। 'स्वाहा' इत्यस्य चापरोऽभिप्रायः। 'ओहाक् त्यागे' (१०९०) जौहोत्यादिकः परस्मैपदी। हानं हा भावे अङ् प्रत्ययः। तत्प्रतिषेधे न हानं अहा अत्यागः स्वस्य अहा स्वाहा स्वस्यात्मन आत्मीयस्य वस्तुनो वाऽहानमस्तु। अनेन स्वाहाकारेण मम पुत्रपौत्रादेश्च सर्वस्य समृद्धिरस्त्विति भावः। प्रातः सूर्योदये चाऽग्निः सूर्ये प्रविशति। अतएव सूर्यज्योतिषः सद्भावे अग्निर्न चकास्ति। तदा सूर्यस्यैव ज्योतिषः सत्वात्। 'अग्निमादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं ददृशे। उभेहि तेजसी संपद्येते। उद्यन्तं वावादित्यमग्निरनुसमारोहति, तस्माद् धूम एकाऽग्नेर्दिवा ददृशे' (तै ब्रा. २।१।२) इति तित्तिरिश्रुतेः। तस्मात् प्रातर्होमे समक्षमाहूयमाने आहवनीयाग्नौ सूर्यभावनयैवाहुतिं जुहुयात्– (सूर्यः) अयमुद्यन् सूर्य एव (ज्योतिः) आहवनीयाग्निरूपः (ज्योतिः) अयमग्निः (सूर्य) सूर्यस्वरूपः, अग्नेस्तेजसः सूर्येऽन्तर्भावात्। एकात्मतां प्रतिपन्नस्योभयस्य ज्योतिषः प्रीत्यर्थं (स्वाहा) सुहुतमिदमस्तु। 'स्वाहेत्येतत् सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा (निरु. ८, २०)। ब्रह्मवर्चसकामः क्रमशः सायंहोमे मन्त्रान्तरेणाहुतिं जुहोति– (अग्निः) अयमाहवनीयाग्निः (वर्चः) ब्रह्मतेजःस्वरूपः (ज्योतिः) अयं प्रकाशः (वर्चः)ब्रह्मवर्चसरूपः। तस्माद् अग्निज्योतिषोः समानं ब्रह्मवर्चसरूपत्वात् ब्रह्मवर्चससमृद्ध्यर्थम् (स्वाहा) इदं दत्तं सुहुतमस्तु। एवमेव प्रातर्होमे सूर्यं साक्षिणं कृत्वा सूर्यभावनयाऽग्नौ ब्रह्मवर्चसकाम्ययाहुतिं जुहुयात् (सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा) अर्थः पूर्ववद् उन्नेयः।

अथवा प्रातर्होमं चिकीर्षन् इमं मन्त्रं पठेत्— (ज्योतिः) यद् इदम् अग्निज्योतिः (सूर्यः) सूर्यज्योतिःस्वरूपः सः (सूर्यः) यश्च सूर्यश्च स (ज्योतिः) अग्निज्योतिःस्वरूपः। तस्मै (स्वाहा) इदं सुहुतमस्त्विति देवयाजिनः।

आत्मयाजिनस्तु— (स्वाहा) वेदवाक्येन (अग्निः) जठराग्निः (ज्योतिः) ब्रह्मज्योतिः। 'अहं वैश्वानरो भूत्वा' (गीता १५।१४) इति भगवद्वचनात् (ज्योतिः) ब्रह्मज्योतिश्च (अग्निः) जठराग्निः (स्वाहा) वेदवाक्येन। (सूर्यः) मानससूर्यः (ज्योतिः) ब्रह्मज्योतिः (ज्योतिः) ब्रह्मज्योतिश्च (सूर्यः) मानससूर्यः (स्वाहा) वेदवाक्येन। (अग्निः) वैश्वानराग्निः (वर्चः) ब्रह्मवर्चसं (ज्योतिः) ब्रह्मज्योतिः (वर्चः) ब्रह्मवर्चसम् (स्वाहा) वेदवाक्येन। (सूर्यः) ब्रह्माण्डस्य सूर्यः (वर्चः) ब्रह्मवर्चसम् (ज्योतिः) ब्रह्मज्योतिः (वर्चः) ब्रह्मवर्चसम् (स्वाहा)

वेदवाक्येन । (ज्योतिः) भर्गाख्यं (सूर्यः), (सूर्यः) (ज्योतिः) भर्गः 'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन (छां. ३, ३, ४) इति दर्शितम् इति ।।

अग्निः परमेश्वरः, 'अग्निरेव ब्रह्म' (शत. १०।४।१।५) इति । 'ब्रह्म वा अग्निः' (कौ. ६।१।५।१२।८ इति च श्रुतेः । ज्योतिः– सर्वप्रकाशकः । भौतिकोऽग्निरपि शिल्पविद्यादि-भौतिकविज्ञानप्रकाशकः । 'अग्निरिति' पदनामसु पठितम् । (निरु. ५।४) । अनेनाग्नेर्गत्यर्थ-त्वेन ज्ञानरूपत्वादीश्वरः प्राप्तिहेतुत्वाद् भौतिकोऽर्थो वा गृह्यते। स्वाहा सुष्ठु सत्यमाह यस्यां वाचि सेति व्युत्पत्या सत्या वाक् गृह्यते । सूर्योऽपि चराचरात्मा जगदीश्वरः सरति जानाति चराचरं जगदिति व्युत्पत्तेः । 'सूर्य आत्मा जगतस्तस्थुषश्च' (यजु. ७।४२) इति मन्त्रात् ज्योतिः सर्वात्मप्रकाशकः वेदद्वारा सकलविद्योपदेशकः, एवं भौतिकः सूर्योऽपि सुवति—स्वप्रकाशेन प्रेरणाहेतुर्भवति इति व्युत्पत्या पृथिव्यादिमूर्तद्रव्यप्रकाशकत्वात् ज्योतिः । स्वाहा स्वकीया हृदयस्था वाग् यदाह तदेव सत्यं वाच्यमित्यस्मिन्नर्थे ।

अग्निः सर्वविद्योपदेष्टा परमेश्वरः वर्चः वेदचतुष्टयं प्रादुर्भावयति, ज्योतिः विद्युदाख्यो-ऽयमग्निः ब्रह्माण्डशरीरस्थो वर्चः विद्यावृष्टिहेतुर्भवति। सूर्यः सकलविद्याप्रकाशको जगदीश्वरः स्वाहा होतव्यं वर्चः प्रकाशकविद्युत्सूर्याग्न्यादितेजः करोति । ज्योतिः सूर्यलोकोऽपि वर्चः शरीरात्मबलं प्रकाशयति । (ज्योतिः) सत्यप्रकाशकः (सूर्यः) सर्वव्यापक ईश्वरः (सूर्यः) प्रकाशमानः सूर्यलोकः (ज्योतिः) चक्षुर्व्यवहारप्रकाशकम् (स्वाहा) वेदवाणी यज्ञक्रियामाहे-त्यस्मिन्नर्थं इत्यर्वाचीनाः ।

सात्वत-पक्षे—अनया कण्डिकया राधाकृष्णयोः कृष्णतद्भृत्यवर्गयोः राधातद्भृत्यवर्ग-योश्चाभेदः प्रतिपाद्यते । परब्रह्म-श्रीकृष्णः स्वसंकल्पनिर्मितस्वपरिकरात् सर्वस्मात् न भिद्यते । यथा इन्द्रादिदेवात् तत्परिकरः, आह च यास्कः 'आत्मैवैषां रथो भवत्यात्मायुध-मात्मेषव आत्मा वै सर्वं देवस्य (निरुक्त अ. ७। । देव एव माहाभाग्यात् स्वसंकल्पमात्रेण रथादिस्वोपकरणाकारेण परिणमते विवर्तते वा, तस्मात् रथायुधादिकं तत्स्वरूपमेवेति तदर्थः । यमुना-गिरिराज-वृन्दावन-गोपीगोपगवादिकं भगवत्स्वरूपमेव, संकल्पवशेन भगवत एव तद्रूपेणावस्थानात् । अक्षरार्थस्तु अग्निः यदूनाम् अग्रणीः श्रीकृष्णः ज्योतिः कोट्यर्क-समूहदीप्तिरूपा राधा 'तत्रैव कोट्यर्कसमूहदीप्तिरिति वाक्येन भर्गसंहितायां तस्याः तथात्वप्रतिपादनात् । ज्योतिः पूर्वोक्तदीप्तिलक्षणा राधा अग्निः कृष्ण एव कृष्णो राधा, राधा च कृष्ण इति निष्कर्षः । उक्तञ्च संमोहनतन्त्रे—

'तस्माज्ज्योति-रभूद्द्वेधा, राधामाधवरूपकमिति ।'

आह च कश्चित् कृष्णानुरक्तचेताः समुदितप्रतिभारविः कविरत्न—

किशोरमूर्तिः द्वयमेकजीवितम् पुरः स्फुरद् वीक्ष्य पतामि मूर्च्छितः। इति

किशोरमूर्तिद्वयं राधाकृष्णयुगलम्, स्वाहा सु सुष्ठु आसमन्तात् 'हा' प्राप्तोऽहं स्याम् ।

ओहाङ् गतौ जुहोत्यादिः आत्मनेपदी । सु आ पूर्वात् तस्मात् कर्तरि विच् । राधाकृष्णयोः प्राप्तिर्ममास्तु इति भावः । द्वितीये वाक्ये सूर्यः यदुमार्तण्डः सर्वप्रेरको वा, ज्योतिः राधा, शिष्टं समानम् । तृतीये वाक्ये अग्निः कृष्णः, वर्चः अन्नम्, 'वर्च दीप्तौ' तद्धि शरीरादेः दीप्तिः ताम् अन्ननामसु वर्चस्शब्दः (निघण्टु २, ७, २६) पठ्यते । स च भोग्यत्वसाम्येन भृत्यवर्गे लाक्षणिकः । एवञ्च वर्चो भृत्यवर्गः स्वस्वामिनः श्रीकृष्णस्य स्वरूपमेव । ज्योतिः राधा वर्चः भृत्यवर्गः विशाखादिसखीगणः स्वस्वामिन्या राधायाः स्वरूपमेव । स्वाहाशब्दः पूर्ववत् व्याख्येयः । चतुर्थवाक्ये सूर्यः व्याख्यातपूर्वः । पञ्चमवाक्ये अभेददार्ढ्याय तमेवार्थं ज्योतिः-सूर्यशब्दयोः पूर्वापरभावव्यत्यासेनाचष्टे ज्योतिरिति ।

सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या । जुषाणो अग्निर्वेतु स्वाहा ।
सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा ।।

—शु० य० ३।१०

अग्निहोत्रम्

दशम्यां कण्डिकायां द्वौ मन्त्रौ । 'सजूर्देवेन' इति प्रथमः सायंहोमवचनः । ततः 'सजूर्देवेन' इति द्वितीयो मन्त्रः प्रातर्होमवचनः । द्वयोः प्राजापत्यः ऋषिः, गायत्रीच्छन्दः, लिङ्गोक्ता देवता । (शत. २, ३, १, ३७-३८; का. श्रौ. ४, १४, १४) ।

सायं प्रातः अग्निहोत्रमन्त्रा नवम्यां कण्डिकायां व्याख्याताः । अत्र दशम्यां कण्डिकायां व्याख्यातव्यौ मन्त्रौ सायंप्रातरग्निहोत्रे कर्तव्ये विकल्पार्थौ । सायं प्रातरग्निहोत्रम् "अग्निर्ज्योतिः ज्योतिरग्निः स्वाहा । सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहा" इति मन्त्राभ्यां विधेयम् । अथवा 'सजूर्देवेन सवित्रा' इत्यादिवक्ष्यमाणाभ्यां विधेयमित्याशयः ।

तत्र सायंहोमे चिकीर्षितेऽनेन मन्त्रेण जुहोति– (देवेन) दीप्यमानेन (सवित्रा) प्रेरकेण सूर्येण (सजूः) समानप्रीतिः, अस्तमये हि सूर्योऽग्निमनुप्रविशतीति प्रागुक्तम् । तस्मादग्नि-सूर्ययोः सहावस्थानमेव समानप्रीतिः । जुषी प्रीतिसेवनयोः (१२८९) तौदादिकः आत्मनेपदी । सह जुषते इति कर्तरि क्विपि 'सह' इत्यस्य सभावे 'ससजुषोरुः' (पा. ८, २, ६६) इति षस्य रुत्वे 'र्वोरुपधाया दीर्घ इकः' (पा. ८, २, ७६) दीर्घे सजूरित्यत्रोत्तरपदप्रकृतिस्वरः । जोषणं जूः समाना जूः प्रीतिर्यस्यासौ सजूरिति बहुव्रीहिसमासेन व्युत्पिपादयिषन् महीधरः स्वरदोषादमान्यः । एवम् (इन्द्रवत्या) इन्द्रोपेतया (रात्र्या) रात्रिदेवतया च (सजूः) समानप्रीतिः 'अग्निर्दूरात् नक्तं ददृशे' इति प्रागुक्तम्, तस्मात् सिद्धा रात्र्या समानप्रीतिरग्नेः । एवंभूतः (अग्निः) अग्निदेवः (जुषाणः) सेवमानोऽस्मत्प्रत्तं हविः स्वादयन् । जुषमाणः इति वक्तव्ये छान्दसे लुकि शानचि च जुषाण इति चित्स्वरेणाऽन्तोदात्तः शब्दः । (वेतु) भक्षयतु, वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (१०४८) आदादिकः परस्मैपदी । (स्वाहा) दत्तं च सुहुतमस्तु । प्रातर्होमे च कर्तव्ये प्रत्यक्षं सूर्यमेव लक्ष्यीकृत्य 'सजूर्देवेन' इत्यादिना मन्त्रेण जुहोति । सूर्येण सजुष्ट्वमुषसः सूर्यप्रभाया इति 'इन्द्रवत्योषसा' इत्युक्तम् । शेषं समानमिति देवयाजिनः ।

अस्मिन् अग्निहोत्रानुवाके कण्डिकाद्वये सप्त मन्त्राः (नवम्यां ५ दशम्यां २) तेषु १ सायं होमः, २ प्रातर्होमः, ३ ब्रह्मवर्चसकामस्य सायं होमः, ४ ब्रह्मवर्चसकामस्यैव प्रातर्होमः, ५ सामान्येन प्रातर्होमः, ६ सायं होमविकल्पः इत्येताः क्रियाः व्याख्याताः। त्रिष्वनुवाकेषु कण्डिका दश, मन्त्राणां समुदिता संख्या १८ (तेषां ६ ऋचः)।

आत्मयाजिनस्तु—(सजूः) सः संसारः ज् जयः ऊः रतिः संसारजये रतः(देवेन सवित्रा) नारायणेन (जुषाणः) प्रीतियुक्तः, भक्तिपूर्वं नारायणार्पणं कर्म कुर्वाणः। अथवा (सजूः) संसारजये रतः (इन्द्रवत्या) इन्द्रो देवता यस्याः तया (रात्र्या) पितृयाणाधिष्ठातृदेवतया (जुषाणः) प्रीतियुक्तः (अग्निः) यजमानः, 'यजमानोऽग्निः' (शत. ६, ५, ४, ४) (स्वाहा) ब्रह्मार्पणकर्मणा तथा सकामकर्मणा (वेतु) वं विष्णुं वा, वर्सति स्वर्गं वा एतु प्राप्नोतु। (सजूः) संसारजये रतः (देवेन सवित्रा) कैवल्यमोक्षाधिष्ठातृदेवतया (जुषाणः) प्रीतियुक्तः, तथा (सजूः) संसारजये रतः (इन्द्रवत्या उषसा) क्रममुक्त्यधिष्ठातृदेवतया प्रीतियुक्तः (सूर्यः) ब्रह्मभावं प्राप्तो योगी (स्वाहा) महावाक्योपदेशेन (वेतु) वं ब्रह्म एतु प्राप्नोत्विति।

सात्वतपक्षे—भक्तः प्रभुं विविधं नवनीतापूपादिभोगजात निवेदयन् प्रार्थयते-सवित्रा देवेन सर्वप्रकारेण भास्करेण सह 'सजूः' प्रीतिमान्, यजुर्वेदमुखेन तस्मै भगवता कर्मयोगस्योपदिष्टत्वेन स्वशिष्यत्वात् युक्तो हि गुरोः शिष्यानुरागः। अपि वा स्वप्रियायाः कालिन्द्याः पिता हि सविता, जगति को नाम यः श्वसुरे नानुरज्जति, तथा च आभाणकः—

विज्ञेयो श्वसुरो तीर्थम्, अर्धतीर्थन्तु श्यालिका।
चतुर्धामसमा नारी, त्वेषा प्राणभृतां स्थितिः॥ इति॥

इन्द्रः योगेश्वरकृष्णः विद्यते यस्यां रासक्रीडनरजन्यां सा इन्द्रवती रात्रिः शारदी 'राका' तया 'सजूः' प्रीतिमान् अग्निः सोपासकानां बहुजन्मार्जितपापराशिदग्धा परमात्मा श्रीकृष्णः अस्माभिरपि 'जुषाणः' प्रीतिमान् सूर्यराज्योरिव अस्मास्वपि प्रीतः 'वेतु' अस्मदर्पितं विविधभोजनादिवस्तुजातं 'वेतु' भक्षयतु स्वीकरोतु, वेतिरत्र खादतिकर्मा। इन्द्रवत्या इन्द्रः स्वभर्ताऽनिरुद्धः तद्वती 'उषा' वरुणपुत्री श्रीकृष्णस्य पौत्रवधूस्तया सजूः स्नेहातिरेकवान् वात्सल्यादिति भावः। सूर्यः अविद्यातमोनिरासकः श्रीकृष्णः प्रभुः। शिष्टं समानम्। अनयोः (३, ९-१०) कण्डिकयोः क्रमेण पञ्च द्वौ च सम्भूय सप्तमन्त्राः। 'अग्निर्ज्योतिः' इत्यादेः 'ज्योतिः सूर्यः' इत्यन्तस्य मन्त्रपञ्चकस्य ज्योतिःस्वरूपयोर्लौकिकाऽग्निसूर्ययोः भोक्तृप्रपञ्चोपलक्षकयोः वर्चस्पदाभिधेयस्य अन्नस्य तदुपलक्षितस्य भोज्यप्रपञ्चस्य च सर्वाग्रणीसर्वप्रेरकपरमात्मनोऽभेदम्, 'स्वाहा' पदेन साधकस्य तादृशपरमात्मनः प्राप्तिश्चेत्यर्थं ब्रुवते केचिन्मनीषिणः। द्वितीयकण्डिकायां मन्त्रद्वये इन्द्रः उपास्यते यस्यां सेन्द्रवती इन्द्रोपासनायुक्ता इत्यर्थः। सर्वत्र तृतीयां सप्तम्यर्थे 'जुषाणः' इति प्रथमां द्वितीयार्थे च मत्वा देवे सवितरि इन्द्रोपासन-युक्तायां रात्री उषसि च सजूः प्रीतिमान् भव। जुषाणं-भगवन्तं सेवमानं भवन्तं प्रभुभक्तमग्निः सर्वव्यापकः परमात्मा, सूर्यः सर्वप्रेरकः परमात्मा, वेतु प्राप्नोतु इत्येवं विद्यां गुरोराशिषञ्च कण्डिकैषा (१०) व्याहरति इत्यपि तथैव व्याचक्षते।

[1]उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ।। यजु० तृ० अध्याय: ११ ।।

महोपस्थानानुवाकः – आहवनीयाग्न्युपस्थानम्

महोपस्थानमेव बृहदुपस्थानमाचक्षत आचार्याः । कात्यायनः (का० श्रौ० ४, १२, १) इदमुपस्थानम् वात्सप्रमाह । पयोहोमपक्षे बृहदुपस्थानम् आहवनीयगार्हपत्ययोर्द्वयोरग्न्योर् यजमानः करोति । महोपस्थाने 'उपप्रयन्तः' इत्यारभ्य "परि ते इदम्" इति पर्यन्तं षड्विंशतिकण्डिकाः सन्ति । तत्रैकादश्यां कण्डिकायाम् ऋगात्मक एक एव मन्त्रः । 'एतावन्नु तिष्ठन्नुपति' (शत० २, ३, ४, २३) इति श्रुतेः 'उप प्रयन्तः' इत्यारभ्य 'चित्रावसो' (३, १८) इति पर्यन्तम् अष्टभिः कण्डिकाभिस्तिष्ठन्नेवाग्निमुपतिष्ठते नोपविश्येति । अस्य गोतम ऋषिर्निचृद् गायत्री छन्दोग्निर्देवता, आहवनीयोपस्थाने विनियोगः । (शत० २, ३, ४, १० । का० श्रौ० ४, १२, १-१२) ।

सायमाहुत्यां हुतायां अजमान आहवनीयाग्निमनेन ऋगात्मकेन मन्त्रेणोपतिष्ठते । 'उपान्मन्त्रकरणे' (पा० १, ३, २५) इति सूत्रेणात्मनेपदम् । प्रकृते 'उपप्रयन्तः' इत्यादयो मन्त्रा आहवनीयाग्निस्तुतौ करणम् । तस्माद् आहवनीयाग्निमुपतिष्ठते इत्याकारकम् उपपूर्वकात् तिष्ठतेर् आत्मनेपदत्वं साधीयो युज्यते । 'आहवनीयाग्निम्' इति द्वितीया मन्त्रकरणत्वान्यथानुपपत्त्याऽध्याहारलभ्येन 'स्तोतुम्' इत्यनेनाऽन्वेति । तस्माद् 'उपप्रयन्तः' इत्यादिभिर्गृहोपस्थानमन्त्रैर्यजमान आहवनीयमग्निं स्तोतुम् तत्समीपे तिष्ठतीत्यर्थः संगच्छते (अध्वरम्) करिष्यमाणं यज्ञम् (उपप्रयन्तः) उपतिष्ठमानाः वयं यष्टारः (अग्नये) अग्निप्रसादाय (मन्त्रम्) आर्षं शब्दसमूहम् । 'मन्त्रा मननात्' (निरु० ७, ३, ६) । 'मत्रि गुप्तपरिभाषणे' (१६ ८०) चौरादिकः उभयपदी । मन्त्रणं वा मन्त्र्यते वा भावकर्मणोर् घञ् प्रत्ययः । मननेन त्राणकरमिति महीधरः (वोचेम) उच्यास्म । 'लिङ्याशिष्यङ्' (पा० ३, १, ८६) इति आशीर्लिङि उत्तमपुरुषबहुवचनेऽङि 'वच उम्' । (पा० ७, ४, २०) इति धात्वकारस्य उमादेशे यासुटि छान्दसत्वात् सार्वधातुकत्वाद् इयादेशे सलोपे, यलोपे च रूपम् । कीदृशाय अग्नये (अस्मे) अस्माकं मन्त्रम् 'सुपां सुलुक्' (पा० ७, १, ३९) इति शे आदेशः । (आरे) समीप एव । 'आराद्दूरसमीपयोरित्यमरः । अथवा आरे इति दूरनाम (निघ० ३२६) आरे दूरे स्थितत्वाऽपि यष्टृमन्त्रं (शृण्वते) अवदधते, श्रोतुम् दत्तावधानायेति । काममग्निः समीपे वा स्याद् दूरे वा

[1]ऋ० १, ७४, १ साम० १३, ७९। तै० सं० १, ५, ५, १।

स्यात् यज्ञमुपतिष्ठमानानामस्माकं स्तुतिवचनानि शृणोत्येव, तस्माद् मन्त्रं ब्रूम इत्याशय इति देवयाजिनः।

कात्यायनमते—तिष्ठन्नेव 'उपप्रयन्तः' इति मन्त्रं त्रिर्जपन् आहवनीयमुपतिष्ठत इति वात्सप्रविशेषः।

आत्मयाजिनस्तु—इन्द्रियाणि कथयन्ति (अध्वरं) यजमानं 'यजमानो यज्ञः' (शत० १३, २, २, १)। (उपप्रयन्तः) उपगच्छन्तो वयम् (आरे) दूरे समीपे हार्दाकाशे च (अस्मे) अस्माकमालये (शृण्वते) अस्मदीयं वाक्यं श्रोतुमुद्युक्ताय (अग्नये) आत्माग्नये (मन्त्रं) मननेन त्राणकरं अप्रोक्तं वाक्यसमूहं (वोचेम) उच्यास्मेति।

सात्वतास्तु–नारदमुखेन श्रुतयुधिष्ठिरसन्देशः भगवान् उद्धव-परामर्शेन द्वारिकातः इन्द्रप्रस्थं जगाम युधिष्ठिरस्य यज्ञे समुपस्थातुम्। तत्रागतेन राजभवने सादरं दत्तनिवासेन सुहृद्वरेण कृष्णेन सह मन्त्रणार्थं समाहूय सर्वान् भीमादिभ्रातॄन् धर्मराजो व्याहरत्युपप्रयन्त इति।

मदनुजाः अध्वरं यज्ञम् अध्वर–शब्दः यज्ञनामसु पठितः, (निघण्टु ३।१७।३) अध्वा स्वर्गमार्गस्तं राति ददाति, शोभनेन पथा स्वर्गप्रापकस्तम्, ध्वरो हिंसा तद्रहितं वा। एतेन अग्निष्टोमादिसोमयागे अग्नीषोमीयादिपशवो हिंसनीया इत्येकदेशिमतं निरस्तम्। 'उपप्रयन्तः'= उपगतवन्तः मनसिकृततदनुष्ठाननिश्चया अस्माकं सर्वाधिकहितैषिणः वासुदेवेन सह मन्त्रं मन्त्रणां वोचेम कथयेम। यागोऽयं राजसूयः न सुकरः, तदर्थं विपुलं धनादिकमपेक्ष्यते। नूनं सर्वे भवन्तः शूराः दिग्विजययात्रायां सर्वान् राज्ञो विजित्य तदाहर्तुं शक्नुवन्ति। परम् अद्यत्वे दशसहस्रहस्तिबलः शिशुपालादिप्रबलराजन्यवर्गकृतसन्धानः सम्राट् जरासन्धः कृष्णा–भ्यूहितप्रकारमन्त्रः दुर्जेयः। तस्मिन् जीवति नानायासेन दिग्विजयो वो भवितुमर्हति।

तस्मात् कदा कथं दिग्विजयेन निष्प्रत्यूहं भवितव्यम् इति अस्माभिः श्रीकृष्णेन परामर्शो विधेयः स यथा आचक्षीत तथैव अस्माभिः कर्तव्यमितिभावः। कस्मै वोचेम? अग्नये नीतिविदग्रे-सराय श्रीकृष्णाय। तं विशिनष्टि 'आरे दूरे' इति ('आरे इति दूरनाम'–नि० ३, २६, १) चकारेण समीपेच 'अस्मे' अस्माकं प्रार्थनां, शृण्वते सादरम् आकर्णयते, सः समीपेऽवस्थितः साक्षाद्, दूरे चेत् दूतमुखेन अस्मदीयं समीहितं श्रुत्वा तत्साधनाय सततं प्रयतते, ततोऽधिकः कोऽस्माकं सुहृदिति भावः। वृत्तञ्चैतत् (भागवते १० स्कन्धे ७०–७१ अध्याययोः)। तत्र कर्णेहत्य निरीक्षणीयं मनीषिभिः।

[1]अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ।। शु० य० ३।१२

आहवनीयाग्न्युपस्थानम्

द्वादश्यां कण्डिकायाम् ऋगात्मक एक एव मन्त्रः अग्न्युपस्थाता । अस्य विरूप ऋषिः निचृद् गायत्रीछन्दः अग्निर्देवता (शत० २, ३, ४, ११) (का० श्रौ० ४, १२, १) ।

(अग्निः) अयमुपस्थोयमान आहवनीयाग्निः (दिवः) द्युलोकस्य (मूर्धा) दिवि सूर्यात्मना शिरःस्थानीयः । तदेव विवृणोति – ऊर्ध्वं द्युलोके स्थितत्वात् (ककुत्) वृषस्योन्नतस्कन्ध इव । उव्वटमहीधरौ पक्षान्तरे महन्नामसु निघण्टौ (३, ३, १९) 'ककुहः' इति पाठस्य सद्भावेऽपि ककुदं पश्यतः । पृषोदरादित्वात् अन्त्यलोपेन (ककुत्) महान् अयमग्निर्महानात्मा जगतः कारणमिति चार्थापयतः । (अयम्) एष एव प्रक्रान्तोऽग्निः (पृथिव्याः) भूलोकस्थ (पतिः) पालकः । तापपाकप्रकाशादिभिः पृथिवीलोकस्थानां मर्त्यानामनुग्राहक इति भावः । अयमेवाग्निः (अपाम्) द्युलोकाद् वृष्टिरूपेण पतन्तोनां (रेतांसि) व्रीहियवाद्यन्नरूपेण परिणितानि साराणि । यद्वा रेतांसि कारणानि । अपां वृष्टिलक्षणानां रेतांसि वृष्टौ कारणभूतानि तत्वानि (जिन्वति) प्रीणयति, पोषयति, 'जिवि प्रीणने' (५९४) भौवादिकः परस्मैपदी । अत एव 'ते वा एते आहुती उत्क्रामतः' (शत०................) इति श्रुतिः 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते, आदित्याज्जायते वृष्टिः' (मनु० ३।७६।) इति स्मृतिश्चेति देवयाजिनः ।

आत्मयाजिनस्तु—

(अयम्) आत्माग्निः (दिवः) भृकुट्याः (मूर्धा) म् ब्रह्मा ऊ विष्णुः र् रुद्रः तेषां रूपधारकः सूर्यः (ककुत्) (कं) शिरः तस्मिन् (कु शब्दे) कुं शब्दं ददाति करोतीति व्युत्पत्त्या अनाहतनादेन शिरसि शब्दकारकः (पृथिव्याः) मनसो हार्दान्तरिक्षस्य वा (पतिः) पालकः (अग्निः) आत्माग्निः (अपाम्) इन्द्रियालयान्तरिक्षाणाम् । 'आपः अन्तरिक्षनाम' (निघ० १, ३, ८) । (रेतांसि) सौमरूपेन्द्रियशक्तीः 'रेतो वै सोमः' (शत० २. ५. १, ९) । अथवा गगनामृतरसानां वीर्याणि 'अमृतं वा आपः' (शत० २, ९, ३, ७) 'रसो वा आपः' (शत० ३, ३, ३, ८) (जिन्वति) प्रीणयति वर्धयति पुष्णाति । जिन्वतिः प्रीतिकर्मेति ।

[1] ऋग्वेद ८, ४४, १६ । साम. २७. १५३२. । तै. सं. १, ५, ५. । १ ; ४, ४, १, १ । तै आ. ३, ५, ७, १, ।

सात्वतास्तु–युधिष्ठिर एव स्वसहायकस्य सख्युः सामर्थ्यं वर्णयति–'अग्निरिति'। अग्निः स्वं 'निगिरतो' बकासुरस्य तालुमूलदाहकः (भाग० १०।११।५०) दिवः स्वर्गस्थस्य ब्रह्मेन्द्र-वरुणादेः, अत्र मञ्चाः क्रोशन्ति इतिवत् आधारस्य स्वस्थिते लक्षणा। ककुद् ककुहः अभिभविता, महान्, तस्य देवगणस्य कृष्णेन निर्जितत्वात्। अत्र अकारलोपः, हकारस्य दकारः छान्दसः, 'ककुह' शब्दः महन्नामसु पठितः (निघण्टु ३, ३, १६)। ककुहः 'ककु' सहने 'ककेरुहः' इति 'उह' प्रत्ययः। सहते अभिभवति शत्रून्, सहते क्षमतेऽपराधान् वा इति देवराजः। 'मूर्धा' इदानीन्तनस्य राजन्यवर्गस्य मूर्धा शिरःस्थानीयः पराक्रमेण सर्वश्रेष्ठत्वात् पृथिव्याः सत्राजित्-सुतायाः सत्यभामायाः पतिः स्वामी। एतेन सत्राजिद्दत्तकलङ्कमार्जनाय बलभृतां वरो महान् योद्धा लङ्कासग्रामेऽपि अतृप्तः सेनापतिवर्यो भगवतो रामस्य जाम्ववान् ऋक्षराजः अनेन कृष्णेन पराजित इति सर्वातिशायी पराक्रमोऽस्य, इति ध्वन्यते। ('ब्रह्मणोऽभिभवः' भागवत १०।१३ अध्याये। 'इन्द्रस्य चाभिभवः' १०।२७ अध्याये द्रष्टव्यः)। अयम् असमत्समक्षमुपविष्टः कृष्णः अपि वा ककुत् सुन्दराग्रणीर्लावण्यनिर्जितमन्मथः, न केवलं वीरोऽसौ किं तर्हि दर्शनमात्रेण चित्तचौरः। अपां जलानां रेतांसि साराणि शरीरस्य यथा आत्मा, जलाध्यक्षः वरुणः। अत्र बहुवचनमादरार्थम्। जिन्वति प्रीणयति वरुणापहृतं स्वपितरं नन्दमानेतुं तद्भवनं गत्वा स्वदर्शनेन प्रीणयति।

वरुणो भगवन्तं द्रष्टुकामः स्वभृत्यमुखेन यमुनाजले स्नातुम् अवतीर्णं भगवत्पितर-मपजहार। अपहृतं पितरं प्रत्यानेतुं भगवान् स्वयम् आयास्यति, तदाऽहं स्वाराध्यचरणं भगवन्तमवलोक्य स्वजन्मसाफल्यं प्राप्स्यामि, इत्यभिप्रायेण नन्दे अपहृते शोकार्णवनिमग्नानां व्रजवासिनां प्रसादनाय वरुणालयं समागत्य वरुणाभ्यर्चितपदो वरुणाय समीहितं स्वदर्शनं प्रदाय स्वजनकं नन्दं च सहादाय तत् प्रत्याययौ व्रजम् इति कथा भागवते १०।२८ अध्याये द्रष्टव्या।

अपि वा अपां वारीणां रेतांसि स्रवान् प्रवाहान् इन्द्रादिष्टमेघवृन्दविसृष्टान् मुसलधारा-वृष्ट्यात्मकान् जिन्वति जयति अभिभवति ('जि' अभिभवे भौवादिकः परस्मैपदी ६।४६) आसप्ताहं स्वकरांगुलेरुपरि महागिरेः गोवर्धनस्य धारणात् (भागवत १०।२५)।

'रेतः' 'रिङ्' स्रवणे दैवादिकः आत्मनेपदी 'स्तुरिभ्यां' 'तुट् च' (उ०४।१९७) इत्यसुन्प्रत्यये तुडागमो गुणश्च। रीयते स्रवते रेतः।

यद्वा वृष्टिलक्षणानामपां देवानां रेतस्त्वाद्रेत उच्यते। तथा चोपनिषत् "देवानां रेतो वर्षम्" इति।

[1]उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ।। य० ३, १३ ।।

आहवनीयाग्न्युपस्थानम्

त्रयोदश्यां कण्डिकायाम् 'उभा वाम्' इत्येषा ऋगेकएव मन्त्रोऽग्न्युपस्थानः । अस्य भरद्वाजः ऋषिः, स्वराट् त्रिष्टुप् छन्दः (मिश्रमते त्रिष्टुप् छन्दः) इन्द्राग्नी देवते (शत० २, ३, ४, १२) (का० श्रौ० ४, १२, १) ।

(इन्द्राग्नी) हे आदित्याहवनीयौ । इन्द्रः अस्तं गच्छन् सूर्यः, अग्निर् आहवनीयश्च तयोः सहभावाद् 'आमन्त्रितस्य च' (पा० ८, १, १९) इत्यनेन पदात्परत्वात् आमन्त्रितनिघातः, द्वन्द्वसमासे सम्बोधनम् । 'एष वा इन्द्रो य एष तपति, स यदस्तमेति, तदाहवनीयं प्रविशति (शत० २, ३, ४, १२) इति श्रुतेः । अथवा इन्द्राग्नी आहवनीयो गार्हपत्यश्च द्वावग्नी सम्बोध्येते यज्ञसाधनात्मकैश्वर्यात् आहवनीयोऽग्निरिन्द्रः, अग्रे नीयते प्रथममाधीयते इति अग्निर्गार्हपत्योऽभिधीयते । भौतिकाग्निवायू इत्यर्वाचीनाः । इन्द्राग्न्यौ इति स्थिते 'सुपां सुलुक्' (पा० ७, १, ३९) इति पूर्वसवर्णः । (उभा) उभौ 'सुपां सुलुक्' इत्यादिनाऽऽकारः (वां) युवां (आहुवध्यै) आह्वातुम्, 'तुमर्थे सेसेन्' (पा० ३, ४, ९) इत्यादिना आङ्पूर्वकाद् ह्वयतेः ध्यै प्रत्ययः, 'बहुलं छन्दसि' (पा० ६, १, ३४) इति ह्वः सम्प्रसारणे उवङादेशे च प्रत्ययस्वरेण मध्योदात्तत्वम् । इच्छामीति शेषः । आख्यातोत्तमपुरुषस्यैकवचनस्थाने कध्यै प्रत्यय इति व्याचक्षाण उव्वटो विमृश्यः । किं च (उभा) उभौ युवाम् (राधसः) हविर्लक्षणस्य धनस्य । राधः इति धननाम (निघ० २, १०, १७) राध्नुवन्ति साधयन्ति पुरुषार्थान् येन । राध संसिद्धौ (१२६३) सौवादिकः परस्मैपदी । औणादिकः करणे असुन् प्रत्ययः । राध्नोति हिनस्ति दारिद्रचमिति हिंसार्थको राधधातुरपीति देवराजयज्वा । (सह) युगपत् (मादयध्यै) तृप्तये तर्पयितुम् । मद तृप्तियोगे (१७०६) चौरादिक उभयपदी । तुमर्थे शध्यै प्रत्ययः (पा० ३, १, ९) । इच्छामीति शेषः । (उभा) उभौ वाम् (इषाम्) इष्यमाणानां योगपदार्थानां (रयीणाम्) तत्साधनभूतानां धनानां च (दातारौ) दानशीलौ । ददातेस्तृच्प्रत्ययः । तस्माद् (वाजस्य) अन्नस्य, वाज इत्यन्ननाम (निघ० २, ७, २) वज्यते अभिगम्यते सर्वैरिति । वज गतौ (२५२) भौवादिकः परस्मैपदी, 'अकर्तरि च कारके संज्ञायाम्' (पा० ३, ३, १९) इति कर्मणि घञ् प्रत्ययः । 'चजोः कुघिण्यतोः' (पा० ७, ३, ५२) इति कुत्वेन वागः इति रूपं न शङ्क्यम् । 'अजि-

१ ऋग्वेदः— ६, ३०, १३ । तै० सं० १, १, १४, १ । ५, ५, १ ।

व्रज्योश्च' (पा० ७, ३, ६०) इत्यत्र चकारेणाऽनुक्तसमुच्चयार्थेन वजेरपि कुत्वनिषेधात्-अतएव न्यासकारः— "चकारस्यानुक्तसमुच्चयार्थत्वाद् वजेरपि कुत्वप्रतिषेधः सिद्धो भवति वाज इति । (सातये) दानाय, 'षणु दाने' (१४६५) तानादिकः उभयपदी । 'ऊतियूति०' (पा० ३, ३, ९०) इत्यादिना भावे क्तिनि 'जनसनखनां सञ्झलोः' (पा० ६, ४, ४२) इत्यात्वे निपातनाद् अन्तोदात्तत्वं द्रष्टव्यम् । (उभा) उभौ (वां) युवाम् (हुवे) आह्वयामि । ह्वेञ् शब्दे (१००८) भौवादिकः उभयपदी । लटि उत्तमपुरुषैकवचने छान्दसत्वात् सम्प्रसारणे शपो लुकि उवङ् इति देवयाजिनः ।

आत्मयाजिनस्तु – (इन्द्राग्नी) हे नरनारायणौ । (वाम्) युवाम् (उभा) उभौ (आहुवध्यै) आह्वातुम् इच्छामीति शेषः । (उभा) उभौ (सह) प्रकाशकप्रकाशरूपाभ्यां युगपत् (राधसः) आत्मप्रतिबिम्बवहविर्भ्याम् (मादयध्यै) मादयितुं हर्षयितुं वा इच्छामीति शेषः । 'मदी हर्षग्लेपनयोः' (८१५) भौवादिकः परस्मैपदी, मद तृप्तौ इति धातोर्णिजन्ताद् वा तुमर्थे प्रत्ययः । (उभा) उभौ (इषाम्) अमृतवृष्टीनाम् (रयीणाम्) योगसम्पत्तीनाम् (दातारौ) (उभा) उभौ (वाम्) (वाजस्य) प्राणस्य, 'अन्नं हि प्राणः' (शत० २, १२, १, ६) । (सातये) दानाय (हुवे) आह्वयामीति ।

सात्वतास्तु— पाण्डवाः लाक्षाभवने परमेश्वरकरुणया न दग्धाः । द्रुपदतनयास्वयंवरे मत्स्यभेदपणपूर्त्या राज्ञोऽन्यान् निर्जित्य कृतोद्वाहाः मोदमानाः कुशलिनः इन्द्रप्रस्थं प्रत्यागताः, इत्यवगत्य श्रीकृष्णः गत्वेन्द्रप्रस्थम्, आर्यस्य धर्मराजस्याग्रहात् चतुरो मासान् यावत् तस्थौ । एकदा सार्जुनः कृष्णः अधिरूढरथो वनं जगाम । तत्र जलं पातुम् गतो यमुना-तटं काञ्चित् परमां सुन्दरीं ददर्श । अर्जुनमुखेन विदिततदभिप्रायस्तामुपजगाम । तदा कृष्णा-नुरक्ता सा स्वपित्रा मध्येजलं निर्मापिते स्वनिवासस्थाने प्रीतिभोजनाय अभ्यर्थयाञ्चक्रे कृष्णार्जुनौ–उभाविति 'इन्द्राग्नी' इन्द्रो अर्जुनः इन्द्रतनयत्वात्, अग्निर्दैत्यदानवदहनः कृष्णः इन्द्रश्चाग्निश्चेति द्वन्द्वसमासः । तत्सम्बोधने इन्द्राग्नी ! हे कृष्णार्जुनौ ! 'वां' युवाम् अहं कालिन्दीनामधेया तपनतनया स्वभवने 'आहुवध्यै' आह्वातुमिच्छामि इति शेषः । अपि च 'राधसः' आराधनात् यथाविधि सत्कारादिना सेवनात् 'सह' युगपद् 'मादयध्यै' मादयितुम् 'उभौ' युवां हर्षयितुं ममोत्कण्ठाऽस्ति इति शेषः ।

किञ्च उभौ 'वां' युवां द्वौ 'इषाम्' अभिलषितानां रयीणां विष्णुपाणिग्रहणतत्पाद-सेवादिलक्षणधनानाम् दातारौ, एकः साक्षात्, द्वितीयः प्रेरकत्वात् इतिभावः । स्वाभिप्रायमावि-

ष्करोति। उभा वां-युवां द्वौ वाजस्य विविधरुचिरभोजनस्य सातये दानाय स्वगृहे प्रीति-भोजाय 'हुवे' आह्वयामि इत्यर्थः। तत्प्रार्थनाया तद्गृहे विहितप्रीतिभोजनो तौ तामपि रथे सहोपवेश्य युधिष्ठरसविधे इन्द्रप्रस्थमाजग्मतुः। सप्तदशादिषु पद्येषु अवलोकनीया एषा कथा (भागवते १०।५८ अध्याये) वेदे अभिहितस्यापि तद्गृहे भोजनस्यानुपन्यासो भागवते संक्षेप-लोभात् इत्यवसेयम्।

[1] अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आरोहाथा नो वर्धया रयिम्॥ १६। ३। १४॥

आहवनीयाग्न्युपस्थानम्।

चतुर्दश्यां कण्डिकायां ऋगात्मकः 'अयं ते योनिः' इत्येक एव मन्त्र आहवनीयाग्न्युप-स्थानः। अस्य देवश्रवोदेववातावृषी, स्वराडनुष्टुप् छन्दः, अग्निर्देवता (शत० २, ३, ४, १३ का० श्रौ० ४, १२, १)।

(अग्ने) हे आहवनीयाग्ने। (अयम्) गार्हपत्योऽग्निः (ते) तव (ऋत्वियः) ऋतावृतौ प्राप्तः। ऋतुः प्राप्तोऽस्येत्यर्थे 'छन्दसि घस्' (पा० ५, १, १०६) इति ऋतुशब्दाद् घस्। तस्येयादेशः। (योनिः) जन्मस्थानम्। आहवनीयस्य गार्हपत्यादेवोद्धृतत्वात्। (यतः) यस्माद् गार्हपत्यादग्नेः (जातः) उद्धृतस्त्वम् (अरोचथाः) कर्मकालेऽदीप्यथाः। रुच दीप्तौ (७४५) भौवादिकः आत्मनेपदी। लङि मध्यमपुरुषैकवचनेरूपम्। (तं) स्वयोनिं (जानन्) बुध्यमानः (आरोह) अनुप्रविश। (अथा) अथ तदनन्तरम् 'निपातस्य च' (पा० ६, ३, १३६) इति संहितायां दीर्घः। (नः) अस्मभ्यम् (रयिं) धनसम्पत्ति (वर्धया) वर्धय-समर्धय 'अन्येषामपि दृश्यते' (पा० ६, ३, १३७) इति संहितायां दीर्घ इति देवयाजिनः।

आत्मयाजिनस्तु— (अग्ने) हे ब्रह्माग्ने! (अयं) क्षेत्रज्ञात्मा (ते) तव (ऋत्वियः) समाधिकाले प्रादुर्भावयोग्यः। उत्पादनयोग्यः काल ऋतुरुच्यते (योनिः) आविर्भावस्थानं (यतः) यस्मात् यत्रेत्यर्थः (जातः) त्वमाविर्भूतः (अरोचथाः) दीप्तोऽभवः (तं) आवि-

१ ऋग्वेद ३, २९, १०। अथ० ३, २०, १। तै० सं० १, ५, ५, २; ४, २, ४, ३, ७; १३, ५। तै० ब्रा० १, २, १, १६; २, ५, ८, ८।

र्भावस्थानं क्षेत्रज्ञात्मानं (जानन्) स्वांशं जानन् (आरोह) प्रविश (अथ) अनन्तरं (नः) अस्मभ्यम् (रयिम्) योगलक्ष्मीम् (वर्धय) इति ।

सात्वतास्तु— कंसे निहिते राजसिंहासनारोहणं प्रतिषेधन्तं प्रणिपतन्तं श्रीकृष्णं प्रति पित्रोः अन्यस्य सुहृज्जनस्यचोक्तिः 'अयम्' इति । अयं मधुपुरी–प्रदेशः 'ते' तव योनिः जन्मभूमिः 'ऋत्वियः' राजसिंहासनारोहणकालोऽत्र ऋतुः स प्राप्तो यस्येति तथा । सम्प्रति मथुरायामेव उषित्वा यदुराज्यं साधयेति भावः । तं प्रदेशं विशिनष्टि यत इति । 'यतः' यस्मिन् प्रदेशे कारागार–यातनां सहमानयोरावयोर्गृहे त्वम् 'अरोचथाः' दीप्तवान्, आविर्भाववेलायां लोकोत्तरतेजसा समृद्धः । स्वप्रसूतिधामाऽपि तेजोऽतिरेकेण विद्योतितवान् इति भावः । 'तं' कंस – दत्त – भयङ्कर–यातनावृत्तान्तं 'जानन्' अवगच्छन् 'अग्ने' अग्रणीः परमात्मन् । 'आरोह' मधुपुरी–राजपीठम्, चिरखिन्नानास्माकं पित्रोः सुहृदाञ्च प्रसादनाय । अथ अनन्तरं 'नः' अस्माकं रयिं सम्पत्ति वर्धय विपन्नपूर्वान् धनादिभिः सम्पन्नान् विधेहि इतिभावः ।

[1]अयमिह प्रथमो धायिधातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥ य० ३।१५ ॥

आहवनीयाग्न्युपस्थानम्

पञ्चदश्यां कण्डिकायाम् 'अयमिह प्रथमः' इति ऋग्रूप एक एव मन्त्रः आहवनीयाग्न्युपस्थानः । अस्य वामदेव ऋषिः, जगती भूरिक् त्रिष्टुप् वा छन्दः, अग्निर्देवता (२, ३, ४, १४) (का० श्रौ० ४, १२, १) । (अयम्) आहवनीयाग्निः (इह) कर्मकाले (प्रथमः) मुख्यः यद्वा दक्षिणाग्निसकाशात् प्रथमोपस्थितत्वात् अग्रिमः (धातृभिः) आधातृभिर्ऋत्विग्भिः (धायि) न्यधायि । (डुधाञ् धारणपोषणयोः (१०९२) जौहोत्यादिक उभयपदी) कर्मणि लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' (पा० ६, ४, ७५) इत्यडभावः । कीदृशः सोऽग्निः (होता) आह्वाता सर्वेषां देवानाम् (यजिष्ठः) अतिशयेन यष्टा, यष्टृशब्दात् 'अतिशायने तमबिष्ठनौ (पा० ५, ३, ५५) इति इष्ठन्प्रत्यये यष्टृ+इष्ठ इति स्थिते 'तुरिष्ठेमेयस्सु' (पा० ६, ४, १५४) इत्यनेन सूत्रेण तृचो लोपः । पुनः कीदृशः (अध्वरेषु) यागेषु (ईड्यः) स्तुत्यः ईड स्तुतौ (१०१९) आदादिकः आत्मनेपदी । ईडितुमर्हति कर्मणि ण्यत् प्रत्ययः । तित्त्वात् 'तित्वरितम्' (पा० ६, १. १८५) इत्यनेनान्तस्वरितत्वे प्राप्ते 'ईडवन्दवृशंसदुहां ण्यतः' (पा० ६, १, २१४) इत्याद्युदात्तत्वम् । (यम्) यमाहवनीयमाधाय सम्पन्नयज्ञा अप्नवानः । यावन्तोऽसन्तस्तेऽकारान्ता अपीति कोषसमयः [1] । तस्माद् अप्नः

1 ऋ० ४, ७, १, । तै० सं० १, ५, ५, १ ।

इत्यपत्यनामसु सान्तः (निघ० २. २, ७) शब्दः पठितोऽपीह अप्नः 'इत्यकारान्तः शब्दो ग्राह्यः। अप्नोऽपत्यमस्त्येषामित्यर्थे मत्वर्थे वनिप् प्रत्ययः 'छन्दसीवनिपौ च वक्तव्यौ' (पा०वा० ५, २,१२२) इति। अप्नवानः पुत्रवन्तो भृगवः। अथवा अप्नवाननामा महर्षिः (भृगवः) भार्गव–गोत्रोत्पन्ना महर्षयश्च । भृगोर्गोत्रापत्यानि, इत्यर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (पा० ४, १, ११४) इति सूत्रेण विहितस्य अणप्रत्ययस्य बहुवचने 'अत्रिभृगुकुत्सवशिष्ठगोतमांगिरोभ्यश्च' (पा० २, ४, ६५) इत्यनेन लुकि भृगवः (वनेषु) उत्तराधरयोर्द्वयोररण्योः, अरण्यस्थेषु देवयजनेषु वा (विरुरुचुः) रुच दीप्तौ (७४५) भौवादिकः आत्मनेपदी। वेदेऽयमिह परस्मैपदी। विरोचितवन्तः दीपितवन्त इति भावः। अन्तर्णीतणिजर्थं लिटि प्रथमपुरुषस्य बहुवचने रूपम्। कीदृशमग्निम् (चित्रम्) रक्तश्वेताद्यनेकवर्णज्वालाभिर्विचित्रम् (विशे विशे) विडिति मनुष्यनाम (निघ० २, ३. ५,) वीप्सायां द्विर्वचनम्। मनुष्ये मनुष्ये प्रतिमनुष्यम् सर्वमानवमात्रोपकारार्थम्। प्रजायां वा विट् शब्दः प्रजासु प्रजासु प्रतिप्रजम् सर्वप्रजोपकारार्थम्। 'अनुदात्तं च' (पा० ८, १, ३) इत्यनेन विशे विशे इत्यत्र परस्थं 'विशे' इत्यनुदात्तम् (विभ्वम्) विभुम् सर्वव्यापिनम्। 'वा छन्दसि' (पा० ६, १, १०६) इति सूत्रम् 'अमिपूर्वः' (पा० ६. १, १०७) इत्यत्रापि वाक्यभेदेन सम्बध्यते, तस्मादपि पूर्वरूपं छन्दसि विभाषा भवति। अतएव नेह पूर्वरूपम् अपितु 'छन्दस्युभयथा' (पा० ६, ४, ८६) इति यणादेश इति देवयाजिनः।

आत्मयाजिनस्तु— (अयं होता) ज्ञाननिष्ठानाम् आह्वाता (यजिष्ठः) ज्ञानयज्ञे स्थितः अथवा मन्त्रशास्त्रदृष्ट्या यः हृदयं ज् मनः इः भ्रूमध्यः तेषु स्थितः। (अध्वरेषु) ज्ञानयज्ञेषु (ईड्यः) यागादिभिः स्तुत्यः (प्रथमः) मुख्यः ब्रह्माग्निः (इह) अस्मिन् ज्ञानयज्ञे (धातृभिः) योगिभिः (धायि) ध्याने धारितोऽभूत्। (अप्नवानः) पुत्रवन्तः शिष्यवन्त इत्यर्थः। (भृगवः) गुरवः। भार्गवाङ्गिरसयोर्वंशयोर्गुरुकुलत्वात्। यथा महाभारतस्यादिपर्वणष्टीकायां नीलकण्ठेनोक्तम्—गुरूणां माहात्म्यं निरूपणीयं, तस्मादाचार्येणाख्यायिकामुखेनैव पौलोमेभार्गवाणां गुरूणां माहात्म्यमुक्तमिति। (वनेषु) (यं) (चित्रम्) अद्भुतम्। चिद्ज्ञानम् तद् राति ददातीति चित्रं ज्ञानदातारं वा (विभ्वं) विभुं विभुत्वशक्तियुतं, यणादेशः। अथवा व् ब्रह्म इः परा भ् ईशः वः निवृत्तात्मा तं चतुर्विधं ब्रह्माग्निं (विशे विशे) प्रत्येकशिष्याय (विरुरुचुः) ज्ञानोपदेशेन दीपयन्ति स्म। अन्तर्भूतो णिजर्थः, रोचयामासुर्दीपितवन्त इति।

सात्वतास्तु— भगवदवतारस्य परशुरामस्य वर्णनपरेयम्—अयमिति। 'अयम्' ब्रह्मद्रोग्धृराजन्यनिकरमूर्धच्छेदन–दक्ष–कुठारः, दण्डपाणिरिव पापिनां राज्ञां दण्डयिता विप्रकुला-

वतंसो भृगुकुलकीर्तिवर्धनः परशुरामः 'इह' अस्मिन् जगति प्रथमः मुख्यः नेता, 'धातृभिः' धारकैः, धर्मव्यवस्थापकैः स्ववंशलब्धप्रतिष्ठैर्वयोवृद्धैः पूर्वजैः 'अधायि' हितः निहितः दुर्वृत्त-भूपतिवर्गदण्डनाय नियुक्तः। अयमस्माकं नेता दुराचारिणो भूभुजो हत्वा धर्मं स्थापयिष्यति। इतोऽवधि सर्वैर्ब्राह्मणैर्नेतृत्वेन मान्य इत्येवमुद्घोषितः। कीदृशः ? होता राजन्यबन्धूनां संग्रामार्थ-माह्वाता आगन्तव्यम्, मया सह योद्धव्यम्, पश्यामि राजन्यबन्धो तव पराक्रममित्येवं मुक्तकण्ठमाभणितः। अध्वरेषु यज्ञेषु याजकैर्वेदज्ञैः विप्रैः 'ईड्यः' स्तुत्यः। अयमस्माकम् कुला-लङ्कारः, वर्तमानेऽस्मिन् कः क्षमेतास्मान् ब्राह्मणान् उपतप्तुमित्येवं स श्लाघ्यः। यजिष्ठः स्वयमपि अतिशयेन यष्टा। 'अप्नवानः' प्रशंसायां मतुप्, प्रशस्तापत्या यथार्थं पुत्रवन्तः। यस्य पुत्रः धार्मिकः शूरः, नम्रः, लोकोत्तर-कार्यकारी, यशस्वी स लोके पुत्रवान् इत्युच्यते। "स पुत्रो येन जातेन याति वंशः समुन्नतिम्" इति "एकश्चन्द्रस्तमो हन्ति न च तारासहस्रकम्" इति नीतिवचनात्। भृगवः भृगुगोत्राः मुनयः वनेषु वर्तमाना इति शेषः, तपस्विन इति यावत्। यं परशुरामं लब्ध्वेति शेषः। 'विरुरुचुः' विशेषेण दीप्यन्ते स्म शुशुभिरे, अथवा यं परशुरामं विरुरुचुः अन्तर्भावितण्यर्थोऽत्र रुचिः, विरोचयामासुः स्वाशीर्वचोभिरभिनन्दन्तिस्म। धन्योऽयम् अस्मद्वंशोऽनेन प्रशस्ति-भाजनतां नीतः इत्येवं संश्लाघनीयः। कीदृशं ? तं 'चित्रम्' लोकोत्तरशौर्येण विश्वाश्चर्यंकरम्। 'विभ्वं' विभुम् आविर्भूतदिगन्तविश्रुतकीर्ति 'विशे विशे' विडिति मनुष्यनाम 'विश प्रवेशने' क्विप्। विशन्ति अनुप्रविशन्ति सवकर्म-स्वधिकारित्वेन। यद्वा अनुप्रविष्टा आत्मीयभूराजादेः आश्रिता इति देवराजः (निघण्टु २, ३, ५) सर्वस्मै मनुष्याय सर्वजनोपकारार्थम्। अप्न इत्यपत्यनाम (निघण्टु २, २, ७) आप्नोति अनेन सर्वान् कामानपि वा आप्यते वा महता पुण्येन इति देवराजः। आप्नोतेरसुनि, नुटि ह्रस्वे साधुः।

[1]अस्य प्रत्नामनु द्युतं शुक्रं दुदुहे अह्रयः।
पयः सहस्रसामृषिम् ॥ य० ३। १६॥

आहवनीयाग्न्युपस्थानम्

अस्यां षोडश्यां कण्डिकायाम् 'अस्य प्रत्नाम्' इति ऋगात्मक एक एव मन्त्र आहवनीया-ग्न्युपस्थानः॥ अस्य अवत्सार ऋषिः, गायत्रीछन्दः, गोपयोऽग्नयः देवताः (शत० २, ३, ४, १५, १६; का० श्रौ० ४, १२ १, ३)।

यथा वात्सप्रे विशेषः 'उपप्रयन्तः' (३, ११) इत्यत्रोक्तस् तथैवाऽत्राप्यवगन्तव्यः। अस्या अपि कण्डिकायाः उत्थाय त्रिर्जपः कार्यः। (अस्य) आहवनीयाग्नेरेव (प्रत्नाम्)

[1] ऋग्वेद ९, ५४, १। साम० ७५५। मै० सं० १, ५, ५, १।

सनातनीम् । प्रत्नमिति पुराणनामसु पठितम् (निघ० ३, २७, १) । (द्युतम्) कान्तिम् । द्युत दीप्तौ (७४१) भौवादिकः आत्मनेपदी । द्योतते इति द्युत् कर्तरि क्विप्प्रत्ययः । (अनु) अनुसृत्य अग्नेरेवानादिप्रकाशे इति भावः (अह्रयः) निःशङ्का दोग्धारः, अन्धकारे हि गोदोहने पयसो भूमिपतनशङ्का जायते, यज्ञसिद्धयर्थं दुह्यमानं पयः स्कन्नं सद् यज्ञासिद्धिनिर्देशकमपशकुनं न दिशेदित्याशंकैव लज्जा संकोचो वा । सति चाग्निप्रकाशे दुग्धस्य स्कन्नत्वशङ्कायाः सर्वथाऽनुदयाद् निःसंकोचं दोग्धारः शक्नुवन्ति गां पयो दोग्धुम् । अतएव ह्रियः ह्रीमन्तः संकोचशीलाः ह्री लज्जाऽस्ति येषामित्यर्थे विहितस्य मतुप्प्रत्ययस्य 'गुणवचनेभ्यो मतुपो लुगिष्टः' (पा० वा० ५, २, ९५) इत्यनेन लुकि ह्रियः ह्रीमन्त इत्यर्थः । न ह्रियो ह्रीमन्त इति तत्पुरुषसमासे अह्रयः निराशंकाः । 'तत्पुरुषे तुल्यार्थ' (पा० ६, २, २) इत्यादिना 'अव्यये नञ् कुनिपातानाम्' इति वार्तिकनियमात् पूर्वपदप्रकृतिस्वरादाद्युदात्तत्वम् । नास्ति ह्रीर्लज्जा येषामिति बहुव्रीहिसमासमभ्युपगच्छन्त उव्वटमहीधरादयः स्वराऽसिद्धेरमान्याः; अथवा अह्रयः पयोदोहने व्याप्तिमन्तः त्वरया सर्वं गोदोहनसम्भारमाप्नुवाना दोग्धार इत्यर्थः । 'अह व्याप्तौ' (१२७३) सौवादिकः परस्मैपदी । तस्माद् औणादिकः क्रिन् प्रत्ययः नित्त्वादाद्युदात्तत्वम् । शब्दसाधुत्वे कृतप्रशंसनीयप्रयासा अप्यर्वाचीनाः क्रिप्रत्ययं मन्यमानाः स्वरदोषान्न रमणीयाः । (शुक्रम्) स्वच्छं अथवा वीर्यवर्द्धकम् (पयः) दुग्धम् (सहस्रसाम्) सहस्राणि बहूनि क्षीराज्यदधितक्रादीनि सनोति ददातीति सहस्रसाः धेनुः ताम् । 'षणु दाने' (१४६५) तानादिकः उभयपदी । उपपदसमासे 'जनसनखनक्रमगमो विट्' (पा० ३, २, ६७) इति कर्तरि विट् प्रत्ययः । 'विड्वनोरनुनासिकस्यात्' (पा० ६, ४, ४१) इत्यनेनादादेशे च रूपम् । किंभूतां सहस्रसां धेनुम् । (ऋषिम्) अनायासं दोहनस्थाने स्वयमेवोपपन्नाम् । 'ऋषी गतौ (१२८८) तौदादिकः परस्मैपदी । 'इगुपधात् किन्' (पा० ३, ४, १२०) इति किन् प्रत्ययः । नित्वाद् आद्युदात्तत्वम् । यद्वा वेदे पश्यत्यर्थः ऋषिः । (ऋषिम्) दोग्धारः कदा मां दुहन्तीति कालं प्रतीक्षमाणाम् । दुहेर्द्विकर्मकत्वत् 'अकथितं च' (पा० १, ४, ५१) इत्यनेन गौणकर्मणः (सहस्रसाम् ऋषिम्) इति शब्दद्वयस्य पञ्चम्यर्थे कर्मत्वाद् द्वितीया । (दुदुहे) होमे पयोलाभार्थं दुग्धवन्तः । दुह प्रपूरणे (१०१४) आदादिकः उभयपदी । दुदुहिरे इत्यत्रं सतः 'इरयो रे' (पा० ६, ४, ७६) इति सूत्रेण 'इरे' इत्यस्य 'रे' इत्यादेशे 'दुदुह्रे' इति । सहस्रसः ऋषेर्धेनोः सकासाद् दोग्धारो निराशङ्का अग्निप्रकाशे शुक्रं पयो दुग्धवन्तः इति भावः । अथवा 'तामु हाग्निरभिदध्यौ मिथुन्यनया स्यामिति, तां संबभूव, तस्यां रेतः प्रासिञ्चत्, तत् पयोऽभवत्' (शत० २, २, ४, १५) इति श्रुतेः (अस्य) अग्ने; (प्रत्नाम्) चिरन्तनीम् । (द्युतम् अनु) गवि अनुषक्तां शुक्ररूपापन्नां दीप्तिमेव पयोभूताम् (अह्रयः) संकोचरहिताः गावः दुदुह्र क्षरन्ति ।

अग्निना शुक्ररूपेण सिक्तां स्वकान्तिमेव गावो दुग्धरूपेण क्षरन्तीत्यर्थः। कीदृशं पयः (सहस्रसाम्) छान्दसः लिङ्गव्यत्ययः। नवनीताद्यनेकपदार्थप्रदातृ। (ऋषिम्) गोद्रष्टृत्वं गोपयस्युपचर्यते। 'सा हैनान् उदीक्ष्य हिङ्चकार, ते देवा विदांचक्रुरेष साम्नो हिङ्कारः' (शत० २, २, ४, १२) इत्यादेर्गोद्रष्टृत्वमभ्युपगम्यते इति देवयाजिनः।

आत्मयाजिनस्तु— (अह्रयः) अनर्हत्वलज्जाहीनाः योगिनः (अस्य) ब्रह्माग्नेः प्रत्नाम् मन्त्रशास्त्रदृशा प् परा र् ब्रह्मा त् विष्णुः नः शिवः तेषां रूपस्य धारिकां (सहस्रसाम्) सहस्रज्योतिः, ब्रह्मज्योतीरसरूपाम् (द्युतम्) दीप्तम् (अनु) अनुलक्ष्य (शुक्रं) मानससूर्यम्, 'एष वै शुक्रो य एष तपति, तस्य ये रश्मयस्ते विश्वेदेवाः' (शत० ४, ३, १, २६)। पयः प्राणम् 'प्राणः पयः शीर्षंस्तत् प्राणम्' (शत० ६. ५, ४, १५), ऋषिं वेदस्य सारं तत्वमसीत्यादिमहावाक्यात्मकं महावाचं (दुदुह्रे) होमाय दुदुहिरे इति।

सात्वतास्तु— एकदा दत्तात्रेयप्रसादलब्धवरः समस्तयोगसिद्धिसम्पन्नः सहस्रबाहुरर्जुनः वने भ्रमन् जमदग्नेराश्रमं जगाम। जमदग्निमुनिना सत्कृतो लब्धातिथ्यस्तपोधनेनानेन अकिञ्चनेन येन कामधेनुमहिम्ना ससैन्यस्य मम देवदुर्लभ-विविध-भोजनादिभिर्महदातिथ्यं समाचरितम्। सा कामधेनुः मया स्वपुरीं नेतव्या। रत्नानि राज्ञः सविधे शोभन्ते तस्मात् इदमपि गोरत्नम् मया आत्मसात्कर्तव्यम् इत्यभिसन्धाय अपृष्ट्वैव मुनिं स्वानुचरान् तां नेतुम् आदिदेश। तदादिष्टाः तदनुचराः अनिच्छन्तीमपि क्रन्दन्तीं सवत्सां तां बलात् माहिष्मतीं राज्ञो नगरीं नीतवन्तः। सैषा कथा (भाग० ९। १५। २३–२७) श्लोकेषु वर्णिता अनेन मन्त्रेणावधीयते–अस्येति। 'अस्य' परशुरामतातस्य जमदग्नेः 'प्रत्नाम्' अतिप्राचीनां बहुकालं यावत् तदाश्रमेऽवस्थितां 'द्युतं' सर्वाभिलषितप्रदत्वेन द्योतमानां प्रख्यातां कामधेनुम् अनुभूय मया असाववश्यं नेतव्येति निश्चित्य तद्ग्रहणलोलुपेन तेन राज्ञा आदिष्टा अनुचराः, 'अह्रयः' निर्लज्जाः सत्कर्तुरपि मुनेर्धेनुं नेतारः। ऋषिम् गौणे कर्मणि द्वितीया ऋषेरित्यर्थः। सहस्रसाम् अनन्ताभिलषितप्रदातृ गोः शुक्रं शुद्धं पयः दुग्धमिव 'दुदुह्रे' दुदुहिरे दुग्धवन्तः। दोहनञ्चात्र सारयुक्तवस्तुनः सारस्य पृथक्करणम्। गोशरीरसारं पयः दोहनेन तस्मात् पृथक् क्रियते तद्वत्। अयमभिसन्धिः-यथा दोग्धा गोः शरीरात् सारं तद्दुग्धं पृथक्कृत्यात्मसात्कुरुते, तथैव अस्याश्रमसारभूतां धेनुं ऋषेराश्रमात् अपहरणेन पृथक्कृत्य आत्मसात्कृतवन्तः इति। सहस्रम् सनोति ददातीति सहस्रसाः। 'जनसनखनक्रमगमो विट्' (पा० ३, २, ६७) इति विट्प्रत्यये' 'विड्वनोरनुनासिकस्यात्' (पा० ६, ४, ४१) इत्याकारे वेर्लोपे सहस्रसा इति रूपम्। अपि वा अनु अनुज्ञाताः राज्ञः अनुचराः सहस्रसां प्रत्नां द्युतं दुदुह्रे इति सम्बन्धः। तत्र दृष्टान्तः शुक्रं पयो गोरिति शेषः। गोशुक्रं पयइव ऋषे तां धेनुं राजानुचराः दुग्धवन्तः, अपहरणेन ऋषेः पृथक्कृत्य आत्मसात् कृतवन्त इति भाव।

तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि, वर्चोदा अग्नेऽसि वर्चो मे देहि ।
अग्ने यन्मे तन्वा ऊनं तन्म आपृण ।। य. ३।१७

आहवनीयाग्न्युपस्थानम्

सप्तदश्यां कण्डिकायां 'तनूपा अग्ने' इत्येको मन्त्र आहवनीयाग्न्युपस्थानः । अस्य अवत्सार ऋषिः, त्रिष्टुप् छन्दः, अग्निर्देवता (शत. २,३,४,१९-२०; का. श्रौ. ४,१२.१) ।

(अग्ने) हे आहवनीयाग्ने ! त्वं (तनूपाः) याजकसम्बन्धिशरीराणां पालयिता । तनूं पाति गोपायतीति कर्तरि विच् प्रत्ययः । एवमेव 'आयुर्दाः' 'वर्चोदाः' इत्यत्रापि ज्ञातव्यम् । (असि) प्रज्वलिते जठराग्नावेव शरीररक्षेति भावः । (मे)मम (तन्वं) शरीरम् । तनूमिति पूर्वरूपे प्राप्ते 'वा छन्दसि' (पा. ६, १, १०६) इत्यस्य 'अमि पूर्वः' (पा. ६, १, १०७) इत्यत्रापि वाक्यभेदेन सम्बन्धात् तदभावे 'तन्वादीनां छन्दसि बहुलम् (पा. वा. ६।४।८६) इत्यनेन यणादेशः । (पाहि) रक्ष । (अग्ने) त्वम् (आयुर्दाः) चिरायुष्यप्रदः (असि),(आयुः मे देहि) अपमृत्युनिरासपूर्वकं चिरजीवितं मह्यं देहि । शरीरस्वास्थ्ये मृत्योर्भयं नाशङ्क्यते इति तदेव चिरजीवितम् । (अग्ने) त्वं (वर्चोदाः) वैदिककर्मानुष्ठानसमृद्धं तेजो वर्चः ब्रह्मवर्चसमित्यर्थः तस्य दाता (असि) । ब्रह्मवर्चसिनो विप्रास्तपसेद्धा अग्निरिव ज्वलन्ति दीप्यन्ते । तद् (वर्चो मे देहि) । (अग्ने) (मे) मम (तन्वाः) देहस्य (यत्) यत्किंचित् वैकल्यं, न्यूनता, इन्द्रियाणां दर्शनश्रवणादिराहित्यम् (तत्) सर्वं (मे) मम(आपृण) समन्तात् पूरय समर्धयेत्यर्थः । पृण प्रीणने (१३३०) तौदादिकः परस्मैपदी, इह पूरणार्थे प्रयुक्त इति देवयाजिनः ।

आत्मयाजिनस्तु— (अग्ने) हे ब्रह्माग्ने! त्वं (तनूपाः) तनूं ब्रह्माण्डरूपं शरीरं पाति पालयतीति तनूपाः (असि) (मे) मम (तन्वम्) लिङ्गशरीरम् (पाहि) संसाराद रक्ष । (अग्ने) ब्रह्माग्ने! (आयुर्दा असि, आयुर्मे देहि) । (अग्ने) ब्रह्माग्ने! त्वं (वर्चोदाः) ब्रह्मवर्चसस्य दाता (असि) (मे) मह्यं (वर्चः) ब्रह्मवर्चसं (देहि) । (अग्ने) हे ब्रह्माग्ने (मे) मम (तन्वाः) शरीरस्य (यत्) चक्षुःकरादिरूपम् (ऊनम्) ज्ञानयज्ञानुष्ठानेऽशक्तं (तत्) तदङ्गं (मे) (आपृण) सर्वतः पूरयेति ।

सात्वतास्तु— रथमारुह्य द्वारिकां जिगमिषुं हरिम् अभिधावन्ती,द्रोणपुत्रेण अश्वत्थाम्नः प्रयुक्तस्य ब्रह्मास्त्रस्य प्रभावात् स्वमभिगच्छन्तं जाज्वल्यमानशरं दर्शंदर्शमतिभीता त्रायस्व, कामं दहतु मदीयं शरीरमयं शरः, मा गर्भसत्त्वं धाक्षीदिति, व्याहरन्ती साश्रुनयना अर्जुनपुत्रवधूरुत्तरा परीक्षितो जननी बद्धकरा रुदन्ती श्रीकृष्णमभ्यर्थयांचक्रे । तदीया अभ्यर्थनोक्तिः- तनूपा इति ।

अग्ने जगदग्रणीः परमात्मन् ! मे तन्वं तनूं सगर्भां पाहि रक्ष । अतस्त्वं तनूपाः सर्वस्य जगतः तनूनां शरीराणां पालकोऽसि, ब्रह्मणः सर्जनं रुद्रस्य संहरणमिव च विष्णोस्तव जगद्रक्षणमेव व्रतमिति भावः । स जीवः तत्तेजश्च रक्षणीयम् । का नाम रक्षा मृतस्य निस्तेजसश्चेत्याशयेनाह—'आयुर्दा' आयुषो दाता 'वर्चोदा' वर्चसो दाता यतस्त्वमसि, हे अग्ने ! तस्मात् तद्द्वयं मह्यं देहि प्रयच्छ । अमोघं द्रौणेरस्त्रम्, अतस्तेन क्रियमाणं 'ऊनम्' यत्किञ्चित् सम्भाव्यमानम् अङ्गवैकल्यं तत् मे मम 'आपृण' पूरय, वैकल्यपरिहारेण यथापूर्वं शरीरसाकल्यं सम्पादय, अस्त्रबलात् सगर्भस्य काचिद् हानिर्माभूदित्यर्थः । अस्त्र-निवारणेन प्रसादयेति भावः ।

"इन्धानास्त्वा शतं हिमा द्युमन्तं समिधीमहि ।
वयस्वन्तो वयस्कृतं सहस्वन्तः सहस्कृतम् ।
अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ।
चित्रावसो स्वस्ति ते पारमशीय ।। य. ३।१८

आहवनीयाग्न्युपस्थानम्

अष्टादश्यां कण्डिकायाम् 'इन्धानास्त्वा' इति मन्त्र आहवनीयाग्न्युपस्थानः । अस्य अवत्सारः ऋषिः, निचृद् ब्राह्मी पङ्क्तिर्वा महापङ्क्तिर्वा छन्दः, अग्निर्देवता । 'चित्रावसो' इति यजुषः रात्रिर्देवता । 'चित्रावसो' इति यजुर्मन्त्रोऽपि स्थित्वा त्रिर्जप्य इति वात्सप्रे विशेषः । यस्याः षट् पादा अष्टाक्षराः सा महापंक्तिः । अत्र षष्ठः पादः सप्ताक्षरः (शत. २, ३, ४, २१-२२) (का. श्रौ. ४, १२, १-३) ।

(अग्ने) हे आहवनीयाग्ने! पादादित्वात् 'आमन्त्रितस्य च' (पा. ६, १, १९८) इत्यनेन 'अग्ने' इत्यत्राद्युदात्तत्वम् (शतं) अनन्तान् (हिमाः) हेमन्तान् । अतएव तैत्तिरीयाश्रुतिः 'शतं हिमाः' (१, ५, ८, ५) इत्याह । शतं त्वा हेमन्तानिन्धिषीयेति वा चैतदाहेति । 'कालाध्वनोरत्यन्तसंयोगे' (पा. २, ३, ५) इत्यनेन द्वितीया । (इन्धानाः) स्वयं दीप्यमानाः । ञिइन्धी दीप्तौ (१४४९) रौधादिकः आत्मनेपदी । वर्तमाने लटः शानजादेशे श्नमि 'श्नान्नलोपः'(पा. ६, ४, २३)इति श्नमः परस्य धात्ववयवस्य नकारस्य लोपे 'श्नसोरल्लोपः' (पा. ६, ४, १११) इत्यनेन श्नमोऽकारस्य लोपे 'इन्धानाः' इत्यत्र 'तास्यनुदात्तेत्' (पा. ६, १, १८६) इत्यादिना लसार्वधातुकस्य शानचो निघातत्वे प्राप्ते 'विन्दीन्धिखिदिभ्यो न' इति तत्रत्येन वार्तिकेन तन्निषेधात् शानचश्चित्त्वात् चित्स्वरेणान्तोदात्तत्वे प्राप्ते 'विभाषा वेण्विन्धानयोः' (पा. ६, १, २१५) इत्याद्युदात्तत्वम् । (त्वा) त्वाम् (द्युमन्तं) दीप्तिमन्तम् अर्चिष्मन्तं (समिधीमहि) संदीपयामहे । कीदृशाः वयम् (वयस्वन्तः) वयस् इत्यन्ननाम (निघ. २, ७, ७) ततो भूम्नि मतुप्प्रत्ययः, बहुविधान्नोपेताः वयं(वयस्कृतं) वयोऽन्नं करोति

वृष्टिलक्षणाभिरद्भिः सम्पादयतीति कर्तरि क्विप्प्रत्ययः, तम् एवं (सहस्वन्तः) सह इति बलनाम (निघ. २, ९, १७) इहात्मबलमभिप्रेतम् । 'षह मर्षणे'(८५२)भौवादिकः आत्मनेपदी, इह त्वभिभवे । सहते अभिभवति शत्रूननेन तम्, करणे औणादिकः असुन् प्रत्ययः प्रशस्तोत्साहवन्तः प्रशंसायां मतुप्प्रत्ययः (सहस्कृतम्) सह उत्साहं करोति वर्धयति तम् त्वां समिधीमहीत्यनुषज्यते । पुनः कीदृशाः वयम् (अदब्धासः) शत्रुभिरपराभूताः अहिंसिताः सर्वदा विजिगीषव इत्यर्थः । दभ्नोतिर्हिंसानामसु पठितः (निघ. २, १९) कर्मणि निष्ठायां दब्धो हिंसितोऽभिभूतः । न दब्धा अदब्धाः । 'आज्जसेरसुक्' (पा. ७, १, ५०) इति जसेर् असुगागमः । अदब्धासः वयम् । कीदृशम् अग्निम् (सपत्नदम्भनम्) सपत्नाः शत्रवो दभ्यन्ते हिंस्यन्तेऽनेनेति करणे ल्युटि उत्तरपदप्रकृतिस्वरमहिम्ना लिति पूर्वस्य धातोर् उदात्तत्वेन मध्योदात्तत्वम् । शत्रूणां हिंसितारम् । पुनः कीदृशमग्निं समिधीमहि (अदाभ्यम्) केनापि हिंसितुमशक्यमिति ।

'चित्रावसो' इति यजुः रात्रिदेवत्यम् । 'रात्रिर्वै चित्रावसुः सा हीयं संगृह्येव चित्राणि वसति । (शत. २, ३, ४, २२) इति श्रुतेः । चित्राणि आश्चर्याणि वसूनि ग्रहनक्षत्रतारकादीनि धनानि यस्याः इति बहुव्रीहिसमासः । 'अन्येषामपि दृश्यते' (पा. ६, ३, १३७) इति पूर्वपदस्य दीर्घः । हे विचित्रवसुमति रात्रे ! (स्वस्ति) स्वस्तीत्यविनाशिनामसु पठितम् (निघ. ५, ५, ३३) शोभना अस्ति सत्ता यस्याः सेति देवराजयज्वा, तथा चान्तोदात्तत्वम् । इदं क्रियाविशेषणम् । कल्याणं यथा स्यात् तथा (ते) तव (पारम्) अपरं तीरम् अन्तमित्यर्थः । (अशीय) अशू व्याप्तौ (१२६५) सौवादिकः आत्मनेपदी, 'बहुलं छन्दसि' (पा. २, ४, ७३) इत्यनेन व्यत्ययेन शपो लुकि लिङि उत्तमैकवचने रूपमिति, प्राप्नुयामिति । अस्मास्वनवहितेषु सुप्तेषु राक्षसा देवयजनं मा प्रविक्षन् इति रक्षार्थं रात्रिः प्रार्थ्यते इति देवयाजिनः ।

आत्मयाजिनस्तु— वागादयः कथयन्ति (अग्ने) आत्माग्ने ! (इन्धानाः) त्वदनुग्रहेण दीप्यमानाः (वयस्वन्तः) मन्त्रशास्त्रदृशा वः निवृत्तात्मा, अः सर्वव्यापी, सः ईश्वरः, यः योगः जीवेशयोगवन्तः (सहस्वन्तः) योगबलवन्तः (अदब्धासः) कामादिभिरनुपहिंसिता वयम् (शतं हिमाः) पूर्णायुःपर्यन्तम् (त्वा) त्वां (द्युमन्तम्)परा नाम ज्योतिस्तद्वन्तम् (वयस्कृतं) जीवेशयोगकारकम् (सहस्कृतम्) योगबलजनकं (सपत्नदम्भनम्) कामादीनां हिंसितारम् (अदाभ्यम्) केनापि हिंसितुमयोग्यम् अविनाशिनं (समिधीमहि) प्राणसमिधा तथा इन्द्रियशक्तिरूपाज्येन सम्यग् दीपयाम (चित्रावसो) हे संसाररूपरात्रे ! (स्वस्ति) क्षेमं यथा स्यात् तथा (ते) तव (पारम्) (अशीय)प्राप्नवानि । यथा लोके मनुष्येषु सुप्तेषु चौरा गृहे प्रविशन्ति तद्वत् अत्र योगयज्ञे कामादयः प्रविशन्तीति शङ्कया तन्निवारणाय संसाररात्रेः प्रार्थनमिति ।

सात्वतास्तु – द्वारिकायां भगवतः आधिपत्ये चिरं सानन्दम् वसन्तो निर्भयं समुपभुक्त-

देवदुर्लभवैभवोपभोगाः, कृतकृत्यमात्मानं मन्वानाः यादवा ऊचुः—इन्धानास्त्वेति—

शतं हिमाः शतं वर्षाणि यावज्जीवं 'जिजीविषेच्छतं समाः' 'शतायुर्वै पुरुषः' इति च श्रुतेः। इन्धानाः दीप्यमानाः समृद्ध्या विद्यया तेजसा चेत्यर्थः। वयस्वन्तः प्रशस्तान्नाः, सहस्वन्तः प्रचुरबलाः, क्रमेण प्रशंसायां भूम्नि च मतुप्। अदब्धाः केनचित्सपत्नेन अनुपहताः, वयस्कृतम् अन्नबलयोः सम्पादकम्, अदाभ्यम् देवैर्दैत्यैश्च अनभिभवनीयम् किमुत मनुष्यैः। सर्वस्य जेतारं केनाप्यपराजितम्, द्युमन्तं तेजःप्रचुरम्, तेजपुञ्जमूर्तिम्. सपत्नदम्भनम् शत्रूणां घातकं, त्वा त्वां समिधीमहि दीपयाम। "पयसा कमलं कमलेन पयः, पयसा कमलेन विभाति सरः" इति सुकविसुभाषितन्यायेन त्वया वयं अस्माभिश्च त्वं, त्वया अस्माभिश्च द्वारिकेयं, किं बहुनैते वयं सर्वे मिथः सम्पृक्ताः नितरां विभ्राजामहे। द्वारिकायां त्वद्भुजबलपालितायां चित्राणि विचित्राणि स्वर्गादानीतानि परिजातादीनि संगृह्य वसति इति चित्रावसुः। अथवा चित्राणां शृङ्गारादीनां रसानां 'मल्लानामशनिः इति। पद्योक्तप्रकारेण वसुः निवासः आश्रयः रसकदम्बमूर्तिः तत्सम्बोधने चित्रावसो! द्वारिकायां लोकोत्तारविविधपदार्थसंग्राहक रसकदम्बमूर्ते वा भगवन् ते त्वत्प्रसादात् 'स्वस्ति' कल्याणं यथा स्यात् तथा जीवितस्य पारं समाप्तिमशीय प्राप्नुयाम। वचनव्यत्ययः आर्षः। यथाऽद्यत्वे जनसमाजसेवकं विहितपरोपकारं राष्ट्रकल्याणनिरतं जनं मानपत्रादिना सम्मानयन्ति तथेदं यदुभिः भगवते दत्ताम् अभिनन्दनपत्रमेवेति भावः।

सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणां स्तुतेन।
सं प्रियेण धाम्ना समहमायुषा सं वर्चसा संप्रजया
सं रायस्पोषेण ग्मिषीय॥ य. ३।१६

आहवनीयाग्न्युपस्थानम्

ऊनविंश्यां कण्डिकायां 'सं त्वमग्ने' इति मन्त्रोऽग्न्युपस्थानः। अस्य अवत्सारः ऋषिः, जगतीछन्दः, अग्निर्देवता (शत. २, ३, ४, २४; का. श्री. ४, १४, १; ४)।

पूर्वोक्तैर्महोपस्थानमन्त्रैर् उपस्थायाग्निमुपतिष्ठते। अनेनोपविश्यैव। 'अथासीनः' (शत. २, ३, ४, २४) इति श्रुतेः।

(अग्ने) हे आहवनीयाग्ने! (त्वं) (सूर्यस्य) आदित्यसंबन्धिना (वर्चसा) तेजसा (सम् अगथाः) समगच्छथाः। 'तद्यदस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह' (शत. २, ३, ४, २४) इति श्रुतेः। 'लुङि मध्यमपुरुषैकवचने 'समो गम्यृच्छिभ्याम्' (पा. १, ३, २९) इत्यत्मनेपदत्वम्। 'वा गमः' (पा. १, २, १३)इति कित्वम्। 'अनुदात्तोपदेश'(पा. ६,४,३७) इत्यादिना मकारलोपे, 'मन्त्रे घसह्वर' (पा. २, ४, ८०) इत्यनेन च्लेर्लुकि रूपम्। (ऋषी-

णाम्) मन्त्रदृष्टॄणाम् (स्तुतेन) भावे क्तः प्रत्ययः, स्तुत्या । अथवा ऋषीणां मन्त्राणां स्तुतेन स्तोत्रेणेति योज्यम् । अनन्ता मन्त्राः स्तुवन्त्यग्निम् । 'तद् यदुपतिष्ठते तेनैतदाह (शत. २, ३, ४, २४) इति श्रुतेः (सम्) समगथाः । (प्रियेण धाम्ना) प्रियाभिर् आहुतिभिः 'आहुतयो वा अस्य प्रियं धाम आहुतिभिरेव तदाह' (शत. २, ३, ४, २४) इति श्रुतेः । (सं) समगथाः ।

यथा त्वमेतैः समगच्छथाः एवम् (अहम्) अहमपि यष्टा (आयुषा) अपमृत्युनिरासपूर्वकं दीर्घायुषा त्वदनुग्रहेण (संग्मिषीय) संगतो भूयासम् । आशीर्लिङि उत्तमपुरुषैकवचने 'इटोऽत्' (पा. ३, ४, १०६) इत्यकारे, सीयुटि छान्दसे इडागमे, 'गमहन' (पा. ६, ४, ९८) इत्युपधालोपे रूपम् । (वर्चसा) ब्रह्मचर्यनिष्ठानजनिततेजसा । (सं)संगंसीय । (प्रजया)पुत्रपौत्रादिसन्तानेन (सं) संगंसीय (रायः) धनादेः, राय इति धननाम (निघ. २, १०, १६) (पोषेण) पुष्ट्या समृद्ध्या (सं) संगंसीयेति देवयाजिनः ।

आत्मयाजिनस्तु– भूतात्मा प्रार्थयते– (अग्ने) हे ब्रह्माग्ने ! त्वं (सूर्यस्य) मानससूर्यस्य (वर्चसा) ज्योतिषा (समगथाः) संगतोऽसि । (ऋषीणाम्) मन्त्राणां (स्तुतेन) ईशनेन सामर्थ्येन (सं) समगथाः । (प्रियेण धाम्ना) इन्द्रियशक्तिसमूहेन (सम्) समगथाः । (अहम्) भूतात्मा (आयुषा) अपमृत्युदोषरहितेनायुषा (सं ग्मिषीय) संगतो भूयासम् (वर्चसा) ब्रह्मतेजसा (सं) संग्मिषीय (प्रजया) शिष्यैः (सं) संग्मिषीय (रायस्पोषेण) योगलक्ष्म्या (सं) संग्मिषीयेति ।

सात्वतास्तु– कुरुक्षेत्रे सूर्योपरागे समागतस्य दृष्टयदुवैभवस्य भगवत्पितुर्वसुदेवस्य महर्षिपुञ्जैर्यथाविध्यनुष्ठापितस्यावलोकनेन प्रसीदतः समातृभ्रातृकस्य सभार्यस्य युधिष्ठिरस्य वाक्यम्-'सं त्वमग्ने' इति । अग्ने ! विश्वाग्रणीः परमात्मन् कृष्ण ! त्वं सूर्यस्य वर्चसा तेजसा समगथाः सङ्गतोऽभवः, सूर्यसमानतेजाः सञ्जातस्त्वमितिभावः । एवम् ऋषीणां कुरुक्षेत्रे समागतानां सर्वेषां महर्षीणां स्तुतेन स्तवनेन तथा प्रियेण धाम्ना विश्वप्रीत्यास्पदेन धाम्ना द्वारिकाख्यनगरेण तत्रत्यस्वनिवासभवनेन वा समगथा इति सम्बन्धः । सर्वे ऋषयस्त्वां स्तुवन्ति, तत्रत्यं नगरं त्वद्भवनञ्चावलोक्यावलोक्य समाकृष्टमानसा सर्वे जनाः विस्मिताः मुक्तकण्ठं श्लाघन्ते त्वाम् इति भावः । अतस्त्वमिव त्वदनुग्रहात् आयुषा अपमृत्युभयरहितेन जीवितेन शतवर्षपरिमितेन आयुषा सङ्ग्मिषीय सङ्गतः स्याम्, एवं वर्चसा तेजसा प्रजया पुत्रपौत्रादिना मदधिष्ठितजनसमाजेन वा रायस्पोषेण धनपुष्ट्या प्रभूतेन धनेन चेति यावत् । संग्मिषीय इति सर्वत्र सम्बद्ध्यते । त्वमिव सर्वथा सर्वत्र सदा समृद्धः स्याम् इति निष्कर्षः । युधिष्ठिरस्य मानसो चैषा विचारणा न बहिः स किमपि व्याहृतवान् गाम्भीर्यादितिभावः ।

अन्धस्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज स्थोर्जं
वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ।। य. ३।२०

गवोपसर्पणम्

विंश्यां कण्डिकायां 'अन्ध स्थ' इत्यादिर्मन्त्रो गवोपसर्पणः । अस्य याज्ञवल्क्यः ऋषिः, भुरिग्बृहतीच्छन्दः, गौर्देवता (शत. २, ३, ४, २५; का. श्रौ. ४, १२, ५) ।

अथ कर्माङ्गभूताम् अग्निहोत्रपयसो दोग्ध्रीं गां प्रति गच्छति हे गावः ! यूयम् (अन्धः) अन्नरूपाः क्षीरादिष्वन्नत्वमुपचर्यते अन्नस्य क्षीरादिजनकत्वात् । अन्ध इत्यन्ननाम (निघ. २, ७, १) 'आध्यानीयं भवति' (निरु. ५, १, १) इति यास्कदृशा रूपमिदम् आङ्पूर्वकाद् ध्यायतेः, ध्यै चिन्तायाम् (९०८) भौवादिकः परस्मैपदी इत्यतः निष्पन्नम् । 'अदेर्नुम्धौ च' (उ. पा. ४, ६४५) इत्युणादेरिदम् असुनि नुमागमे धादेशे च, अद् भक्षणे (१०११) आदादिकः परस्मैपदी इत्यतो निष्पन्नम् । अन् प्राणने (१०७०) आदादिकः परस्मैपदी इत्यस्माद् असुन् प्रत्ययो बाहुलकाद् धुग् – आगमश्चेति – क्षीरस्वामी । सर्वमिदं यज्वना विशदीकृतम् । (स्थ) भवथ । 'अन्ध स्थ' इत्यत्र 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' (पा. वा. ८, ३, ३६) इति विसर्गलोपः । अथवा 'अन्ध'इत्यनेन वीर्यजनकत्वादिह लक्षणया वीर्यं ग्राह्यम् । वीर्यरूपाः स्थ । (वः) युष्मदनुग्रहेण (अन्धः) क्षीराज्याद्युपचरितम् अन्नम् (भक्षीय) भज सेवायाम् (९९८) भौवादिकः उभयपदी, इत्यस्य आशीर्लिङि उत्तमपुरुषैकवचने रूपम् । सेविषीय प्राप्यासमित्यर्थः । यूयं (महः) पूजास्वरूपाः पूज्याः । मह पूजायाम् (७३०) भौवादिकः परस्मैपदी । भावे असुन्-प्रत्यय औणादिकः । (स्थ) भवथ (वः) युष्मत्सकाशात् (महः) पूज्यत्वम् (भक्षीय) लप्सीयेति । 'गां पदा न स्पृशेत्' इति स्मृतिसमयाद् गवां पूज्यत्वप्रसिद्धेः । अथवा महःशब्देन दश वीर्याणि ग्राह्याणि—"गौर्वै प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्" (शत. ३।३।३।२) इति श्रुत्योक्तानि । तत्र प्रतिधुक् दुग्धम्, शृतम् उष्णीकृतं दुग्धम्, शरः 'मलाई' इत्याख्यो दुग्धमण्डः, मस्तु दधिद्रवः, आतञ्चनं दधिघनीभावः, आमिक्षा स्फुटितं पयः, वाजिनम् आमिक्षाजलमिति । गव्यानि दशेमानि वीर्यकराणि द्रव्याणि महसस्तेजसः सम्पादकत्वात् महःपदवाच्यानि । उक्तं दशविधं वीर्यम् युष्मत्प्रसादाल्लप्सीयेति भावः । (ऊर्जः) यूयं बलस्वरूपाः । ऊर्ज बलप्राणनयोः (१५५०) चौरादिकः उभयपदी । ऊर्जयति बलयतीति कर्तरि क्विप् प्रत्ययः । (स्थ) भवथ । ऊर्ज् शब्दो रसवचन इत्युव्वटः । (वः) युष्मत्सकाशात (ऊर्जम्) बलं (भक्षीय) सेविषीय, लप्सीयेत्यर्थः । यूयं (रायः) धनस्य (पोषः) पुष्टिः धनसमृद्धिकराः (स्थ) (वः) युष्मत्प्रसादात् (रायः पोषम्) धनपुष्टिं धनसमृद्धिं (भक्षीय) सेविषीयेति देवयाजिनः ।

आत्मयाजिनस्तु—आत्मा कथयति, हे चक्षुरादयः! यूयम् (अन्धः) अन्नरूपाः (स्थ=) (वः) युष्मतसम्बन्धि (अन्धः) अन्नं (भक्षीय) सेवेय । (महः) तेजोरूपाः (स्थ) (वः) युष्मत्सम्बन्धि (महः) तेजः (भक्षीय) तथा (ऊर्जः) बलरूपाः (स्थ) (वः) युष्माकम् (ऊर्जं) बलं (भक्षीय) । (रायस्पोषः) धनपुष्टिरूपाः (स्थ) (वः) युष्माकं (रायस्पोषं) धनपुष्टिं (भक्षीय) । आत्मनीन्द्रियाणां लय उक्तः' इति ।

सात्वतास्तु—भगवान् कृष्णः गाश्चारयन् गोस्तुतिव्याजेन स्वसखेभ्यः गोपालबालेभ्यः गोर्महत्त्वं प्रख्यापयितुं गाः सम्बोध्य आह । अस्मिन्मन्त्रे अन्धःशब्दः महःशब्दः ऊर्ज् शब्दः रायस्पोषशब्दश्च क्रमेण अन्न–पूज्य–बल–धन–समृद्धिवचनाः । तथा च भो गावः यूयम् अन्नादिरूपाः स्थ भवथ । युष्मत्प्रसादाद् वयं सर्वे गोपालाः भक्षीय भजेम अन्नादिकं सर्वम्, वचनव्यत्ययः । सगोपालबालोऽहं कृष्णः भजेय सेवेय लभेय इत्यर्थो वा । विशेषाभावात् महीधरव्याख्यैव अत्र सात्वतानामभीष्टा । अन्ध इत्यन्ननाम (निघ. २।७।१) आध्यानीयं भवति(निरु. ५।१।१)इति भाष्यम् । आभिमुख्येन हि ध्यातव्यं सर्वेणान्नं,प्रीतेः शरीरस्थितेश्च तदायत्तत्वात् इति स्कन्दस्वामी । आङ्पूर्वात् ध्यायतेरसुनि बाहुलकात् यकाराकारयोर्लोपः, उपसर्गस्य ह्रस्वत्वं नुडागमश्च धातोः । यद्वा 'अद्' भक्षणे (अदा. प.) इत्यस्मात् अदेर्नुम्-धौ च (उ. ४।६४५) इति कर्मणि कर्तरि वा कारके असुनि नुमागमो धकारश्चान्त्रादेशः । अद्यते प्राणिभिः अत्ति तान् वा स्वयमिति । तथा च श्रुतिः 'अद्यते अत्ति च भूतानि (तै. उ. २।२) इति । 'अनिति अनेनान्धः' इति क्षीरस्वामी । अनितेरसुनि बाहुलकात् धुगागमः ।

"रेवती रमध्वमस्मिन्योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये ।
इहैव स्त मापगात ।। —य. ३।२१

गवोपसर्पणम्

एकविंश्यां कण्डिकायां 'रेवतीरमध्वम् इत्येक एव मन्त्रो गवोपसर्पणः । अस्य याज्ञवल्क्य ऋषिः, उष्णिक् छन्दः, गौर्देवता । (शत. २, ३, ४, २६) (का. श्रौ. ४, १२, ५) ।

(रेवतीः) हे धनसमृद्धिसम्पन्नाः गावः! 'रेवन्तो हि पशवः (शत. २, ३, ४, २६) इति श्रुतेः । प्रशस्तः क्षीरादिरयिरस्ति यासामित्यर्थे रयिशब्दात् प्रशंसायां मतुपि 'रयेर्मती बहुलम्' (पा. वा. ६, १, ३४)इति सम्प्रसारणे र इ इ मत् इति स्थिते 'सम्प्रसारणाच्च' (पा. ६, १, १०८) इति पूर्वरूपे रइ मत् इति स्थिते 'छन्दसीरः' (पा. ८, २, १५) इति मकारस्य वकारादेशे गुणे रेवत् शब्दे 'रेशब्दाच्च' (पा. वा. ६, १, १७६) इति मतुपः उदात्तत्वे, स्त्रीत्वविवक्षायाम्, 'उगितश्च' (पा ४, १, ६) इति ङीपि रेवती इति मध्योदात्तः शब्दः । अत्र मन्त्रादौ 'आमन्त्रितस्य च' (पा. ६, १, १९८) इत्यनेनाद्युदात्तत्वम् । (अस्मिन्)

प्रत्यक्षं दृश्यमाने (योनौ) दोहनस्थाने अथवा गोयूथसम्बन्धिनि प्रजनने (रमध्वम्) क्रीडत प्रसीदतेत्यर्थः। (अस्मिन्) दृश्यमाने (गोष्ठे) गोवाटे। गोष्ठगृहाद् बहिर्गवां सञ्चारभूमिरिह गोष्ठः। (अस्मिन्) एतस्मिन् (लोके) यजमानकर्तृकदर्शने। लोकृ दर्शने (७६) भौवादिकः आत्मनेपदी। (अस्मिन् क्षये) सद्मनि, 'क्षि निवासगत्योः'(१४०८)तौदादिकः परस्मैपदी। क्षियन्ति निवसन्त्यत्रेति विग्रहे, 'पुंसि संज्ञायां घः प्रायेण' (पा. ३, ३, ११८) इति सूत्रेणाऽधिकरणे घः प्रत्ययः। ततः 'क्षयो निवासे' (पा. ६, १, २०१)इत्यनेनाद्युदात्तत्वम्। अस्मिन् यजमानस्य गोष्ठाने रमध्वम्—इति। हे गावः ! (इह) यजमानगेहे (एव) (स्त) तिष्ठत। (मा अपगात) यजमानं मां त्यक्त्वाऽन्यत्र नापगच्छतेति। इण् गतौ' (१०४५) आदादिकः परस्मैपदी लुङि मध्यमपुरुषबहुवचने 'इणो गा लुङि' (पा. २,४,४५) इतीणो 'गा' इत्यादेशे, च्लेः सिचः 'गातिस्था०' (पा. २, ४, ७७) इत्यादिना लुकि, माङो योगाद् अडागमाऽभावे रूपम्। अपपूर्वक एतिर्दूरीभवने द्रष्टव्य इति देवयाजिनः।

आत्मयाजिनस्तु— (रेवतीः) शमादिधनवत्यः हे वागादयः ! (अस्मिन्, योनौ) जीवरूपायां परशक्तौ। यथा श्रुतिः 'इयं वा अस्य सर्वस्य योनिरस्यै वा इमाः प्रजाः प्रजाताः' (शत. ४, १, २, ९)। (अस्मिन्) (गोष्ठे) इन्द्रियालये (अस्मिन्, लोके)शरीरे (अस्मिन्, क्षये) संसारे (रमध्वम्) क्रीडत। (इह, एव) संसार एव (स्त) (मा अपगात) अन्यत्र समाध्यादौ मा गच्छतेति।

सात्वतास्तु—एषा कण्डिका पूर्ववत् भगवदुक्तगोसम्बोधनात्मिका 'रमध्व' सुखंविहरत, यथेष्टं शष्पादिकं भक्षयत, अर्थात् मयि तिष्ठति नास्ति हिंस्रादि-प्राणिभ्यो भवतीनां भयम्। 'इहैव स्त' अस्मिन्नेव प्रदेशे तिष्ठत 'मापगात' प्रदेशान्तरं न व्रजत। तथा सति अस्माकं भवदनुचराणां भवद्गवेषणाक्लेशः सिंहाद्याक्रमणाशङ्का च स्यादिति भावः। शब्दार्थस्तु महीधरव्याख्यातवर्त्मनैव अवसेयः। अपि वा मधुर - मुरलीनिनादसमाकृष्टमानसाः भगवत्पादमूलमुपागता गोपिकाः प्रति कृष्णोक्तिः। रेवती रेवत्यः गवादि-धनसम्पन्ना वस्त्रालङ्कारादिसमलङ्कृतगात्रा यूयं (योनौ) जन्मभूमौ अभिजने पितृगृहे (गोष्ठे) ग्रामतो नातिदवीयसि गवावस्थानप्रदेशे दोहनाय (लोके) उपभोगस्थाने पतिगृहे, (क्षये) निवासे पतिपुत्रादिनिर्मिते नूतननिवासस्थाने, यत्र स्वयं वसति स निवासः, यत्र पूर्वैरुषितं सोऽभिजनः (पा. ४, ३, ९०) सिद्धान्तकौमुदी। (इहैव स्त) तिष्ठत, एतेषु स्थानेषु भवतीनां रमणमवस्थानञ्च युज्यते (मापगात) ततोऽपेत्य दूरे मा गात मा गच्छत, तानि स्थानानि परित्यज्य अस्मत्समीपं न गच्छत। मत्समीपे रात्रौ कुलवधूनामवस्थानमनुचितमिति भावः। अथवा (योनौ जगत्कारणे, (गोष्ठे) गोग्रहणम् इन्द्रियशरीरादीनां सर्वेषामुपलक्षकम्, जगतोऽधिष्ठाने लोके सर्वसाक्षिणि (क्षये) क्षयन्ति निवसन्ति सर्वे यत्र इति व्युत्पत्त्या

जगन्निवासे मयि मत्समीपे रमध्वम् विहरत । इहैव स्त मत्समीपे एव स्त, तिष्ठत 'मापगात' व्रजं न गच्छत । 'स्त मापगात' इति वाक्यमन्वयवैलक्षण्यानुप्राणितश्लेषेण विधि-निषेधपरकं स्वीकृतिप्रत्याख्यानद्वयाभिप्रायकमनूदितम "प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः" इति श्लोके (भाग. १०।२९।१९) सुमध्यमाः गोपिकाः यूयं व्रजं प्रतियात प्रतिगच्छत । इह मत्समीपे अरण्ये स्त्रीभिः भवतीभिः न स्थेयम् इति निराकरणम् (निषेधः) । प्रतियात व्रजं न इत्यन्वयेन यूयं व्रजं न प्रतिगच्छत । इह मत्समीपे स्थेयं स्थातव्यम् इति स्वीकृतिरिति तदर्थः ।

"संहितासि विश्वरूप्यूर्जमाविश गौपत्येन ।
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् ।
नमो भरन्त एमसि ॥२२॥

१—गवोपस्पर्शनम् २—गार्हपत्याग्न्युपस्थानम्

द्वाविंशयामस्यां कण्डिकायां द्वौ मन्त्रौ 'संहितासि' इत्येको मन्त्रो गवोपस्पर्शनः । अस्य वैश्वामित्रो मधुच्छन्दा ऋषिः, भुरिग् आसुरी गायत्री छन्दः,गौर्देवता ।'उप त्वाग्ने'इति द्वितीयो मन्त्रो गार्हपत्याग्न्युपस्थानः, अस्य ऋषि प्रागुक्तः, गायत्री छन्दः, अग्निर्देवता ।(शत. २, ३, ४, २७-२८; का. श्रौ. ४, १२, ६-७) ।

प्रथमेन मन्त्रेण यजमानो गाम् अभिमृशति—हे गोः ! त्वं (संहिता) क्षीरदानाय यज्ञकर्मणि संपृक्ता (असि) 'प्रवृद्धादीनां च' (पा. ६, २, १४७) इत्यन्तोदात्तत्वम् । अथवा क्षीणप्राणिनां पयोदानैः सन्धानं स्वास्थ्यसम्पादनं संहिता सा अस्त्यस्या इति मत्वर्थे 'अर्श आदिभ्योऽच्' (पा. ५, २, १२७) इति अच् प्रत्ययः । चित्त्वाच्चान्तोदात्तत्वम् (विश्वरूपी) विश्वानि शुक्लकृष्णादीनि विविधानि रूपाणि यस्याः सा, 'जातेरस्त्रीविषयादयोपधात्' (पा. ४, १, ६३) इत्यर्वाचीनसंमतः ङीप्प्रत्ययो न रमणीयः, विश्वरूपीशब्दस्य गुणवाचकत्वेन जातित्वाभावात् । तस्माद् 'षिद् गौरादिभ्यश्च' (पा. ४, १, ४१) इत्यत्र गौरादेर् आकृतिगणत्वाद् ङीष्, प्रत्ययस्वरेणान्तोदात्तत्वं च । त्वम् (ऊर्जा) क्षीरादिरसेन तथा (गौपत्येनं) गोस्वामित्वेन । गवां पतिर्गोपतिः । गोपतेर्भावः इत्यर्थे 'पत्यन्तपुरोहितादिभ्यो यक्' (पा. ५, १, १२८) इत्यनेन यक्प्रत्ययः । प्रत्ययस्वरेणाऽन्तोदात्तत्वं च । (मा) माम् यजमानं (आविश) मयि सर्वतः प्रविश । त्वत्कृपया मम गृहे क्षीरादिरसप्राचुर्यम् प्रवर्तताम्, मदीयं गोपतित्वं च प्रथतामिति ।

अनन्तरं 'उप त्वा' इत्यृचा गार्हपत्यमग्निमुपतिष्ठते । आहवनीयस्याग्नेर्योनिर्नाम

१—'उपत्वा' ऋग्वेद १, १, ७ । साम. १४ । तै. सं. १, ५, ६, २ ।

गार्हपत्योऽग्निः। गार्हपत्यं योनिभूतं त्यक्त्वा प्राग् आहवनीयमग्निमुपस्थितेत्यागसा क्रुद्धो गार्हपत्याग्निर्यजमानं न हिंस्यादित्यपराधक्षमापनार्थं गार्हपत्यं नमस्करोति—'नम एवास्मा एतत् करोति यथैनं न हिंस्यात्' (शत. २, ३, ४, २८) इति श्रुतेः। (दोषावस्तः) रात्रौ अपि प्रकाशमानो वसति न शाम्यति, द्योतते इति यावत् दोषावस्ता तत्सम्बोधनं दोषावस्तः बस निवासे (१००५) भौवादिकः परस्मैपदी अनिट्। दोषा रात्रिं वस्ते स्वतेजसा आच्छादयतीति दोषावस्ता अग्निर् इत्यर्वाचीना न साधवः, वस्तेः सेट्कत्वात्। "अग्नौ ह वै देवाः सर्वान् पशून्निदधिरे, ये च ग्राम्याः ये चारण्याः विजयं वोपप्रैष्यन्तः कामचारस्य वा कामाय अयं नो गोपिष्ठो गोपायद् इति वा। तानु हाग्निर् निचकमे। तैः संगृह्य रात्रिं प्रविवेश। (शत. २, ३, ४, १-२) इति श्रुतेः। ऋग्भाष्ये (१, १, ७) सायणः दोषा रात्रौ वस्तर् अहनि चेति द्वन्द्वसमासे कार्तकौजपादित्वात् (पा. ६, २, ३७) आद्युदात्तत्वमाह, तन्नास्मभ्यं रोचते, मन्त्रपठितेन 'दिवेदिवे' (प्रतिदिनम्) इत्यनेनैव 'अहर्निशम्' इत्यर्थस्य गतार्थत्वात्। (निघ. १, ९) अहर्नामसु 'वस्तोः' इत्यस्यैव समुपलम्भात्, स्वतन्त्रस्याहर्वाचकस्य वस्तर्' इति शब्दस्यानुपलब्धेश्च।

(अग्ने) गार्हपत्याग्ने! (दिवेदिवे) अहन्यहनि प्रतिदिनम्, दिवेदिवे इत्यहर्नामसु पठितम् (निघ. १, ९, १०)। दिवु धातुः क्रीडाविजिगीषाव्यवहारद्युत्याद्यर्थः (११०७) दैवादिकः परस्मैपदी। ततो दीव्यति द्योतते प्रकाशते अत्र पदार्थजातमित्यर्थे 'दिवेर्डिविः' इति डिविः प्रत्ययः। 'ऊडिदंपदाद्यप्पुंरैद्युभ्यः' (पा. ६ १, १७१) इति विभक्तिस्वरेण 'दिवे' इत्यन्तोदात्तम्। (वयं) कृतापराधाः (धिया) श्रद्धान्वितया प्रज्ञया। धीः इति प्रज्ञानाम (निघ. ३, ९, ७) (नमः) नमस्कारं (भरन्तः) तुभ्यं समर्पयन्तः। यद्वा नम इत्यन्ननाम (निघ. २, ७. २१) तुभ्यं त्वत्प्रीतये हविष्यं भरन्त आहरन्तः (त्वा) त्वाम् (उप आ इमसि) सर्वतोभावेन उपगच्छामः। 'व्यवहिताश्च' (पा. १, ४, ८८) इत्युपेति आ इमसि इत्यनेन सम्बन्ध्यते। इमः इति वक्तव्ये 'इदन्तो मसि' (पा. ७, १, ४६) इत्यनेन 'मस्' इत्यस्य इदागमः। इति देवयाजिनः।

आत्मयाजिनस्तु—आत्मा कथयति— हे बुद्धे! (विश्वरूपी) त्वं (संहिता) योगवर्त्मनि सम्यग् हिता (असि) (ऊर्जा) ब्रह्मज्ञानरसेन (गोपत्येन) इन्द्रियाणां स्वामित्वेन (मा) माम् आत्मानम् (आविश) सर्वतः प्रविश। प्राणाः कथयन्ति-(दोषावस्तः) हे रात्रिरूपशरीरे वसनशील! (अग्ने) आत्मप्रतिबिम्ब! (वयं) (दिवेदिवे) प्रतिदिनं (धिया) ब्रह्ममत्या (नमः) अन्नरूपं (त्वा) त्वाम् (भरन्तः) बिभ्रतः ब्रह्मणि धारयन्तः (उपैमसि) प्राप्नुमः। अथवा नमो भरन्तः—नमस्कारं कुर्वन्तः अर्थात् अस्मभ्यं चैतन्यप्रदातृत्वेन पूज्यं मन्यमानाः त्वाम् (आत्मानम्)। उपैमसि वयं प्राप्नुमः इति।

सात्वतास्तु– इन्द्रेण सहिताम् अभिषेक्तुमुपगतां कामधेनुं प्रति भगवतः उक्तिरियम्— हे कामधेनो! त्वं (संहिता) सन्निहिता मम सविधे उपगतासि। सम्यक् हिता सर्वाभीष्टप्रदानादतीव हितकारिणी वा असि भवसि। किञ्च (विश्वरूपी) संकल्पवशात् बहुविधरूपधारिणी, वशिष्ठाश्रमे वशिष्ठेन स्पर्धमानस्य विश्वामित्रस्य ससैन्यस्य तत्सेनाधिकप्रबलसेनारूपं धृत्वा पराजयकारिणी,यथाकामं विविधरूपधारणक्षमाऽसि। त्वं(गोपत्येन)गोपालत्वेन (ऊर्जा) क्षीरदध्यादिविविधरसेन च(मा)माम् एकत्वमविवक्षितम्अस्मान् व्रजवासिनस्सर्वान् (आविश) प्रविश, त्वदनुग्रहात् क्षीरदध्यादिरसप्रचुराः बहुगोस्वामिनश्च वयं भवेमेत्यर्थः। 'उप त्वा' इत्यादिना 'स नः पितेव' इत्यन्तेन मन्त्रत्रयेण जरासन्धकारानिबद्धानां राज्ञां सन्देशस्य विवरणम् 'उप त्वा' इति। (अग्ने) दुर्जनवनदाहक! स्वदर्शनेन स्वान्तध्वान्तनिवारक!(दोषावस्तः)दोषा अविद्यारजनी तां वस्ते आच्छादयति निवारयति तत्सम्बोधनम् (वयं) (नमः) नमस्कारं (भरन्तः) सम्पादयन्तः (धिया) मनसा (दिवेदिवे) प्रतिदिनम् (उप)समीपे (आ इमसि) आगच्छामः त्वां सततं ध्यायामः। अपि वा दोषा शारदी पूर्णिमा तस्यां गोपिकाभिः वसति सह निवसन् रासक्रीड़ां करोति तत्सम्बोधनं शरत्पौर्णमास्यां रासक्रीड़ाकारिन्! तत्र योगबलात् अनेकरूपग्रहणेन योगेश्वर ! एतेन जरासन्धकारातो विमोक्षो न दुष्कर इति भावः।

"राजन्तमध्वराणां गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे" ॥ य. ३।२३॥[1]

गार्हपत्याग्न्युपस्थानम्

त्रयोविंश्यां कण्डिकायां 'राजन्तम्' इत्येक एव ऋगात्मको मन्त्रो गार्हपत्याग्न्युपस्थानः। अस्य वैश्वामित्रो मधुच्छन्दा ऋषिः, गायत्री छन्दः, अग्निर्देवता (शत. २, ३, ४, २८; का. श्रौ. ४, १२, ७)।

द्वाविंश्या कण्डिकाया इहापि 'उप एमसि' इति क्रियापदमनुवर्तते। गार्हपत्याग्निश्चोपस्थातुं प्रक्रान्त एव। तस्माद् गार्हपत्याग्नि वयं उप एमसि। कथंभूतमग्निं वयं उप एमसि। कथंभूतमग्निम्। (राजन्तम्) प्रकाशमानम् (अध्वराणां) क्रतूनां (गोपाम्) रक्षितारम्। गोपायतीति गोपाः, गुपू रक्षणे (३९५) भौवादिकः परस्मैपदी। कर्तरि विच् प्रत्ययः। 'आयादय आर्धधातुके वा' (पा. ३, १, ३१) इत्यनेन कृतस्य 'आय' इत्यस्याकारयकारयोर्लोपे रूपम्। (ऋतस्य) सत्यलक्षणस्य व्रतस्य, ऋतमिति सत्यनाम (निघ. ३, १०, ६)। (दीदिविम्) दीपयितारम् दिवु क्रीडाविजिगीषाद्यर्थः (११०७) दैवादिकः परस्मैपदी।

१—(ऋ. १।१।८) (तै. सं. १।५।६।२)।

तस्मात् 'दिवो द्वे दीर्घश्चाभ्यासस्य' (पा. ३, ४, ५५) इति क्विन् प्रत्ययः धातोर्द्वित्वं दीर्घश्चाभ्यासस्य। नित्त्वादाद्युदात्तत्वं च। अग्निसांनिध्ये व्रतं स्वीकृत्य व्रतिनः सत्यां वाचं प्रकाशयन्त इत्यभिप्रायः। (स्वे) स्वकीये (दमे) गृहे, दाम्यन्ति उपशाम्यन्ति विश्राम्यन्ति गृहिणो यत्र, दमु उपशमे(१२०३)दैवादिकः परस्मैपदी। अधिकरणे घञ् प्रत्ययः 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (पा. ७, ३, ३४) इत्यनेन वृद्ध्यभावः। ञित्त्वादाद्युदात्तत्वम्। (वर्धमानम्) चातुर्मास्यादिभिरेधमानम् इति देवयाजिनः।

आत्मयाजिनस्तु– वयं (राजन्तम्) ब्रह्मवर्चसेन भ्राजमानं (अध्वराणां) ज्ञानयज्ञानां मध्ये (गोपां) इन्द्रियाणां गोप्तारम् (ऋतस्य) सत्यस्वरूपस्य ब्रह्माग्नेः (दीदिविम्) प्रदीपयितारम् (स्वे) आत्मस्वरूपे (दमे) विष्णौ (वर्धमानम्) एधमानम् आत्माग्निम् उपैम इति।

अथवा (अध्वराणां) सत्वनिष्ठतयाऽऽत्मस्वरूपाहिंसकानां (गोपाम्) इन्द्रियाणां गोप्तारम्। (ऋतस्य) कर्मात्मकस्य जगतः, ऋतमिति कर्मनाम (दीदिविम्) प्रदीपयितारं, प्रकाशकम् इत्यर्थः।

सात्वतास्तु– (राजन्तं) स्वतेजसा सर्वत्र विभ्राजमानं क्षत्रियप्रवरं वा (अध्वराणाम्) अध्वना वेददर्शितवर्त्मना रान्ति ददति-धनादिकं यागाद्यर्थं प्रयच्छन्ति ते अध्वराः वदान्यास्तेषां 'गोपां' रक्षकम्। (ऋतस्य) सत्यस्य स्वकीयपारमार्थिकस्वरूपस्य (दीदिविम्) अतिशयेन दीपयितारं प्रकाशकमुपासकान् ज्ञानिनश्च प्रतीत्यर्थः। (स्वे) स्वकीये (दमे) गृहे, (वर्धमानं) वृद्धिमन्तं सर्वैर्यदुभिः शिरोनिहितनिदेशम् उपैम इति शेषः।

" [1]स नः पितेव सूनवेऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये" ॥ य. ३।२४॥

गार्हपत्याग्न्युपस्थानम्

चतुर्विंश्यां कण्डिकायां 'स नः पितेव' इत्यृगात्मक एक एव मन्त्रः। अस्य वैश्वामित्रो मधुच्छन्दा ऋषिः, विराड्गायत्री छन्दः, अग्निर्देवता (शत. २, ३, ४, २९; का० श्रौ० ४, १२, ७)।

(अग्ने) हे गार्हपत्याग्ने! पादादित्वात् 'आमन्त्रितस्य च' (पा. ६, १, १९८) इत्यनेनाद्युदात्तत्वम्। (सः) उक्तगुणः त्वं (नः) अस्मत्कृते (सूनवे) तनुजाय, सूनुरित्यपत्यनाम

१—ऋग्वेद १, १, ९। तै. सं. १, ५, ६, २।

(निघ. २, २, १२)। (पिता इव) जनक इव (सूपायनः) सुष्ठु प्राप्तव्यः। सु उपेत्युपसर्गद्वयपूर्वकाद् एतेः 'छन्दसि गत्यर्थेभ्यः' (पा. ३, ३, १२९) इति कर्मणि युच्प्रत्ययः। चित्त्वादन्तोदात्तत्वम्। अथवा शोभनम् सुखम् उपायनम् उप आसन्ना अयनं प्राप्तिर्यस्येति, यद्वा सु शोभनानि उपायनान्युपहारा दातव्यत्वेन यस्येति, पितरो हि पुत्रेभ्यो नानाविधान् उपहारान् आहरन्ति इति बहुव्रीहिसमासे 'नञ्सुभ्याम्' (पा. ६, २, १७२) इत्यन्तोदात्तत्वम्। (भव) एधि। (नः) अस्माकं यजमानानां (स्वस्तये) कल्याणाय (सचस्व) समवेहि। षच समवाये (९९७) भौवादिकः उभयपदी। यद्वा (नः) अस्मान् त्वत्पुत्रकल्पान् (स्वस्तये) सुरक्षणाय (सचस्व) सेवस्व, सावधानो रक्षेत्यर्थः। षच सेवने (१६३) भौवादिकः आत्मनेपदीति 'सचस्वा' इति सांहितिको दीर्घ इति देवयाजिनः।

आत्मयाजिनस्तु— आत्मा ब्रवीति (अग्ने) हे परमेश्वराग्ने! (सः) विष्णुस्वरूपस्त्वं (नः) योगिनामस्माकं कृते (सूपायनः) मन्त्रशास्त्ररूढ्या स् विष्णुः ऊः शम्भुः पः प्रजापतिः, तेषामयनम् आश्रयो महाविष्णुः (भव)। (पितेव) यथा पिता (सूनवे) पुत्राय गुरुस्वरूपो भवति, तथा (नः) अस्माकं (स्वस्तये) मुक्तिस्वरूपकल्याणाय (सचस्व) मया सह समवेतो भव जीवेशयोरेकीभाव एव मोक्षः इति।

सात्वतास्तु— अन्ते राजानः प्रार्थयन्ते स नः पितेवेति' अर्थः स्पष्टः। अस्मत्सुहृदस्तु द्वाविंशकण्डिकाया अर्धं विद्याप्रार्थनापरं ततः सार्धकण्डिकाद्वयं गुरुं सम्बोध्य शिष्यप्रार्थनाया अभिधायकम् इति मन्यन्ते। हे विद्याभिमानिनि देवि! त्वं(संहिता)अतिशयेन अस्माकं हितकारिणी, तस्मात् (ऊर्जा) स्वशक्त्या तद्बलाद्, (गौपत्येन) वाचस्पत्येन निमित्तेन तदर्थं (मा) माम् (आविश) प्रविश। करुणया स्वदिव्यशक्तिप्रभावात् वाचस्पतिं माम् विधेहि इति भावः। विद्यागुरुविशेषणानि सुस्पष्टान्येव। विद्यागुरो! त्वां वयम् उपेमः विधिवदुपसीदामः। त्वञ्च सुतं पितेव अस्मान् रक्षेतिभावः।

[1]"अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥य. ३।२५॥"

गार्हपत्याग्न्युपस्थानम्

पञ्चविंश्यां कण्डिकायां 'अग्ने त्वं नः'इत्यृगात्मक एक एव मन्त्रः। अस्य सुबन्धुर्ऋषिः, भुरिग्बृहतीछन्दः, अग्निर्देवता। (शत. २, ३, ४, ३१; का. श्रौ. ४, १२, ७)।

(अग्ने) हे गार्हपत्याग्ने! मन्त्रादावामन्त्रितमाद्युदात्तमिति पूर्वमुक्तम्। (त्वं) (नः)

१—(ऋ. ५।२४।१) (साम. ४४८; ११०७) (तै. सं. १।५।६।२; ४।४।४।८)।

अस्माकं (अन्तमः) अन्तिकतमः, अन्तम इति समीपनाम (निघ. २ १६६) अतिशयेनाऽन्तिक इत्यर्थे तमपि प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा. ६, ३, १०९) इत्यनेन तादिवर्णलोपः । यत्तु पक्षान्तरे महीधरः अम् गतौ इत्यतः अमति समीपं प्राप्नोतीति कर्तरि क्विपा अम् इति तमपि अन्तम इति शब्दसिद्धिमाह । अर्वाचीनाश्च 'अन प्राणने' आदादिकः परस्मैपदी, इत्यतः अनिति जीवयति इति सोऽतिशयित इत्याहुस्तन्न साधु-पुरीतत्, संयत् इत्यादिषु 'गमादीनामिति वक्तव्यम्'(पा. वा. ६, ४, ४०)इति वार्तिकेन क्विपि अनुनासिकलोपे ह्रस्वस्य पिति कृति तुगागम इव क्विबन्ते'अम्''अन्'इत्यनयोरप्यनुनासिकलोपादिप्रसक्तेः। ब्रह्मचर्याश्रमाद् आरभ्य व्रतं चरतामग्निरन्तम इत्यभिसन्धिः । अग्निः संनिहिततमः, जन्मप्रभृति मरणं यावत् अग्नेर्व्यापृतत्वात्, अन्ये देवाश्चाग्निद्वारकसम्बन्धाद् असंनिहिता इत्यभिप्रायो वा । (उत) अपि च (त्राता) रक्षकः जठराग्निरूपेण भुक्तं रसादिशुक्रान्तं परिणमयन् प्राणिमात्रस्य जीवनप्रदत्वेम त्रातृत्वमग्नेः । (वरूथ्यः) गृह्यः गार्हपत्यः । वरूथमिति गृहनाम (निघ. ३, ४, १७) । वृञ् वरणे (१२५५) सौवादिकः उभयपदी । ततः जॄवृञ्भ्यामूथन्' (उ. २, ६) इति ऊथन्प्रत्यय औणादिकः । वरूथे भव इत्यर्थे भवार्थे यत् प्रत्ययः । तित्वात् स्वरितश्च । अथवा वृणोति परित आच्छादयति वरूथः पुत्रपौत्रादिसन्तानस्तस्मै हितो वरूथ्यः । अयं गार्हपत्याग्निर्न केवलं गृहपतेरेव पालकस्तदीयपुत्रपोत्रादिसन्तानस्यापि हित इति भावः । यतस्त्वं नः अन्तमः त्राता वरूथ्यश्च, अतः प्रार्थयामहे अस्मभ्यं त्वं (शिवः) मङ्गलकारी शान्तः (भवा) (भव) 'द्व्यचोऽतस्तिङः' (पा. ६, ३, १३५) इति सहितायां दीर्घे 'भवा' इति अयम् (अग्निः) गार्हपत्याग्निरेव अङ्गनाद् उद्धरणाद् आहवनीयो भवतीति शेषः ।(वसुः)प्राणिमात्रस्य वासयिता जीवनहेतुः । वस निवासे(१००५) भौवादिकः परस्मैपदी, ततः 'शॄस्वृस्निहिः' (पा. उ. २, १०) इत्यादिना उन् प्रत्ययः । नित्त्वादाद्युदात्तः वसुशब्दः । यद्वा वसु धननाम (निघ. २, १०, १५) तापपाकप्रकाशैरुपकुर्वन् उपस्कर इव (वसुश्रवाः) वसुना धनादिदानेन श्रवो यशो यस्येति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः । याजकानामभीष्टपूरणैः प्रथितयशा इत्यर्थः । एवंभूत हे अग्ने ! (अच्छा नक्षि) अभिव्याप्नुहि सर्वानस्मान् । 'अच्छाभेर् आप्तुमिति शाकपूणिः' (निरु. ५, २८) इति यास्कवचनाद् अभेरर्थे अच्छ शब्दः । 'निपातस्य च' (पा. ६, ३, १३६) इति संहितायां दीर्घे अच्छा इति । नक्षतिः गतिकर्मा (निघ. २, १४, ३१) । नक्ष गतौ (६६२) भौवादिकः परस्मैपदी । मध्यमपुरुषैकवचने 'बहुलं छन्दसि' (पा. २, ४, ७३) इति शपो लुकि नक्षि । यद्वा नक्षतिः व्याप्तिकर्मा (निघ. २, १८, २) ग्राह्यः । यद्वा व्याप्तिकर्मसु (निघ. २, १८) 'नशत्' इति दर्शनाद् व्याप्त्यर्थे नश्धातुर्मन्तव्यः । तस्येदं प्रागुक्तप्रकारेण रूपम् । महीधरः स्वच्छार्थे अच्छशब्दं संबुद्धावाह । (द्युमत्तमम्) अतिशयेन द्युमत् कान्तिमद् द्युमत्तमम् अतिशयकान्तिप्रदम् (रयिम्) धनसम्पत्तिम् (दाः) देहि । ददातेर्लुङि मध्यमपुरुषैकवचनेऽमाङ्योगेऽपि छान्दसोऽडभाव इति देवयाजिनः ।

आत्मयाजिनस्तु—(अच्छ) हे मायामलविरहित! (अग्ने) ब्रह्मानल! (वसुः) व् ब्रह्मा अः परा, स् विष्णुः उः शिवः एवं चतुष्प्रकारः(अग्निः)मायाविकारभक्षकः स्वात्मलयकारकः 'अन्नाद एवाग्निः' (शत. ११, १, ६, १) 'अन्नं वै विराट्' (शत. १२, २, ४, ५) इति श्रुतेः। (वसुश्रवाः) विष्णवादीनां स्वरूपमेव यशःकारणं यस्य सः (त्वं) (नः) अस्माकम् (अन्तमः) अन्ते अन्तिके भवनशीलः। (उत) अपि च (त्राता) संसाराद् गोपायिता(शिवः) सुखस्वरूपः (वरूथ्यः) संसारविजये त्रिः परिधिरूपकवचार्हः (भव)। (अच्छा नक्षि) अस्मान् अभिव्याप्नुहि, नक्षिराप्नोतिकर्मा। (द्युमत्तमम्) पूर्णब्रह्मवर्चसयुक्तं (रयिं) योगसमृद्धि (दाः) देहीति।

सात्वतास्तु— उत्तराक्रन्दन–(भाग. १, ८, ९-१०) समुपजातदयार्द्रहृदयेन भगवता स्वसुदर्शनतेजसा ब्रह्मास्त्रे अमोघेऽपि निजजनरक्षणाय निवारिते अस्त्रज्वालावियुक्तैः स्वपुत्रैः पुत्रवध्वा द्रौपद्या चोपेता कुन्ती समागत्य भगवन्तं स्तौति (भाग. १, ८, १७-४३) 'अग्ने त्वम्' इति।

(नः) अस्माकम् (अन्तम!) अन्तिकतम! अतिशयेन सन्निकटसम्बन्धिन्! भ्रातृपुत्रत्वादिति भावः। (अग्ने!) विपद्दाहक! (त्राता) रक्षकः (शिवः) कल्याणकारी। अतएव (उत) अपि वरूथ्यः वरूथः पुत्रादिसमूहः तस्मै हितः। वरूथमिति गृहनाम (निघ. ३, ४, १७) वरूथम् 'वृञ्' वरणे सौवादिक उभयपदी 'जॄवृञ्भ्यामूथन्' (उ. २।६)। शत्रुप्रहाराद् वर्मवत् शीतोष्णादेः प्रहारात् रक्षकं स्वस्थित्याच्छादकत्वात्। तस्मै गृहाय हितः, गृहग्रहणम् सपरिकरगृहस्वामिन उपलक्षकम्, सपरिवारम् अस्मदुपकारको भव। त्वं (वसुः) जगतां वासयिता (वसुश्रवाः) वसोः मम भ्रातुर्वसुदेवस्य 'श्रवः' कीर्तिर्येन तादृशः मद्भ्रातृकीर्तिवर्धनः। सत्पुत्रेण पितुः कीर्तिर्वर्धत एव। अस्मत्पितृकुलकीर्तिवर्धनस्त्वमिति भावः। वसुश्रवःपदेन सम्बन्धातिशयो ध्वन्यते। (अग्निः) अङ्गिता स्वभक्तत्राणार्थं सर्वत्र गन्ता। अतो नः परित्यज्य द्वारिकां न गच्छ, प्रतिनिवर्तस्व अस्मद्गृहम् आर्तानामस्माकं त्राणाय इत्यभिप्रायः। (अच्छ) आभिमुख्येन (नक्षि) व्याप्नुहि। अभिव्याप्नुहि सततं सन्निहितो भव। अपि वा (अच्छ) निर्मलहृदय! नक्षि गच्छ नो गृहं परित्यज्य द्वारिका-प्रस्थानसंकल्पम्, किञ्च (द्युमत्तमम्) अतिशयेन द्योतमानं (रयिं) धनं लौकिकसमृद्धिमामुष्मिकसमृद्धिञ्च मोक्षाख्यां (दाः) देहि।

[1]"तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः।
स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥३।२६॥"

१—(ऋ. ५।२४।६) (साम. ११०९) (तै. सं. १, ५, ६, ३; ४।४।४।८)।

गार्हपत्याग्न्युपस्थानम्

षड्विंश्यां कण्डिकायां 'तं त्वा शोचिष्ठ' इत्येको मन्त्र ऋग्द्वयात्मकः। 'तं त्वा शोचिष्ठ' इत्यर्धर्चः ऋग्वेदे पश्चादाम्नातः । 'स नो बोधि' इति च प्रागिति विशेषः। अस्य सुबन्धुर्ऋषिः, स्वराड्बृहतीछन्दः, अग्निर्देवता गार्हपत्योपस्थाने विनियोगः। (शत. २, ३, ४, ३१) (का. श्रौ. ४, १२, ७)।

(शोचिष्ठ) अतिशयेन शोचिष्मन् द्युतिमन् ! शोचिरिति ज्वालानामसु पठितम् (निघ. १, १७, ६)। शोचतिर्ज्वलतिकर्मा (निघ. १, १६, ५) शुच शोके (१८३) भौवादिकः परस्मैपदी। वेदे प्रायेणाऽयं दीप्त्यर्थः। 'अर्चिशुचि०' (पा. ३, २, १०८) इत्यादिना इसिः प्रत्ययः; शोचिर्दीप्तिः अग्निज्वालेति यावत्। शोचिरस्यातीति शोचिष्मान्, अतिशयेन शोचिष्मान् शोचिष्ठः। इष्ठनि प्रत्यये 'विन्मतोर्लुक्' (पा. ५, ३, ६५) इत्यनेन मतुपो लुकि, 'टेः' (पा. ६, ४, १५५) इत्यनेन च टेः 'इस्' इत्यस्य लोपे शोचिष्ठ इति रूपम्। तत्सम्बोधनम्। (दीदिवः) अन्येषां दोपयितः ! अस्ति दीधीङ् दीप्तिदेवनयोः (१०७६) आदादिक आत्मनेपदी, इत्यस्य पर्यायो वेदे दीप्त्यर्थकः दी धातुस्तस्येदं क्वसुप्रत्यये छान्दसं रूपम्। यद्वा दिवुधातुः क्रीडाद्यर्थकः (११०७) दैवादिकः परस्मैपदी, अस्माद् लिडादेशे क्वसौ द्वित्वे छान्दसे इडागमाऽभावे 'तुजादीनां दीर्घोऽभ्यासस्य' (पा. ६, १, ७) इत्यभ्यासदीर्घे 'मतुवसो रु सम्बुद्धौ छन्दसि' (पा. ८, ३, १) इत्यनेन सकारस्य 'रु' इत्यादेशे विसर्गे रूपम्। (तं) तथागुणोपेतं (त्वा) त्वां गार्हपत्याग्निम् (सुम्नाय) सुखाय, सुम्नमिति सुखनाम (निघ. ३, ६, १६) सुष्ठु मीयते परिच्छिद्यते इति सुम्नम् 'रास्नासास्नासुम्नद्युम्ननिम्नेति भोज इति देवराजयज्वा। अथवा द्वितीयार्थे चतुर्थी। सुम्नं सुखं (नूनम्) निश्चयेन (ईमहे) याच्ञाकर्मसु पठितम् (निघ. ३, १९, १) याचामहे (सखिभ्यः) सुहृद्भ्यः सुहृदां कल्याणाय च त्वां सुम्नमीमह इति। (सः) त्वम् (नः) अस्माकं प्रार्थनां 'नश्च धातुस्थोरुषुभ्यः' (पा. ८, ४,२७) इत्यनेन णत्वम्, (बोधि) बुध्यस्व। बुध अवगमने (८५८) भौवादिकः परस्मैपदी। लोटि मध्यमपुरुषैकवचने 'सेर्ह्यपिच्च' (पा. ३, ४, ८) इति सेर्हिरादेशः। छान्दसे शपो लुकि 'हुझल्भ्यो हेर्धिः' (पा. ६, ४, १०१) इति 'धि' इत्यादेशे। धकारलोपे गुणे च रूपम्। न केवलं नः बोधि, (हवम्) अस्माकं आह्वानं प्रार्थनां 'भावेऽनुपसर्गस्य' (पा. ३, ३, ७५) इति ह्वयतेर्भावे 'अप्' प्रत्ययः मम्प्रसारणं च। प्रत्ययस्य पित्त्वाद् 'अनुदात्तौ सुप्पितौ' (पा. ३, १, ४) इत्यनेनानुदात्तत्वात् पारिशेष्याद् धातुस्वरेणाद्युदात्तत्वम्। (श्रुधी) शृणु। श्रु श्रवणे (९४२) भौवादिकः परस्मैपदी, लोटि मध्यमपुरुषैकवचने 'श्रुशृणुपॄकृवृभ्यश्छन्दसि' (पा. ६, ४, १०२) इति हेर्धिरादेशः, 'अन्येषामपि दृश्यते' (पा. ६, ३, १३७) इति संहितायां दीर्घः। (नः) अस्मान् (समस्मात्) सर्वस्मात् । सर्वपर्यायः

समशब्दः,'त्वत्व समसिमेत्यनुच्चानि' (फिट्सूत्र४,१०)इति फिट्सूत्रात् सर्वानुदात्तत्वम् । (अघायतः) अस्माकं पापमिच्छतः शत्रोः । 'अघं' परस्येच्छति' इति विग्रहे 'छन्दसि परेच्छायामपि वक्तव्यम्' (पा. वा. ३, १, ८) इत्यनेन क्यच्प्रत्ययः । 'आचार्यप्रवृत्तिर्ज्ञापयति भवत्यघशब्दाच्छन्दसि परेच्छायां क्यजिति, यदयम् 'अश्वाघस्यात्' (पा. ७, ४, ३७) इति क्यचि प्रकृते ईत्वबाधनार्थं आकारं शास्ति '(महाभाष्यम् ३, १, ८) । क्यजन्तस्य 'सनाद्यन्ता धातवः' (पा. ३, १, ३२)इति धातुसंज्ञायां वर्तमाने लटः शत्रादेशे 'तास्यनुदात्तेत्०' (पा. ६, १, १८६) इत्यनेन लसार्वधातुकस्य 'अत्' इत्यस्याऽनुदात्तत्वे 'धातोः' (पा. ६, १, १६२) इत्यनेन 'अघाय' इत्यस्यान्तोदात्तत्वे पररूपैकादेशे 'एकादेश उदात्तेनोदात्तः' (पा. ८, २, ५) इत्यनेनैकादेशस्योदात्तत्वे सिद्धे अन्तोदात्तः अध्यायत् शब्दः । पञ्चम्या विभक्तेर् एकवचने ङसेः 'शतुरनुमो नद्यजादी' (पा. ६, १, १७३) इत्यनेनोदात्तत्वात् अन्तोदात्तः अघायतः इति पञ्चम्यन्तः शब्दः । (उरुष्य) रक्ष, उरुष्यती रक्षकर्मा (निरु. ५।२३) कण्ड्वादेर् आकृतिगणत्वाद् उरुष् शब्दादपि यकि प्रत्यये प्राग्वद् यगन्तस्य धातुत्वे उरुष्य धातोर् लोटि मध्यमपुरुषैकवचने प्राग्वत् सिपो 'हि' इत्यादेशे तस्य च 'अतो हेः' (पाः ६, ४, १०५) इति लोपे 'ऋचि तुनुघम०' (पा. ६, ३, १३३ इत्यनेन संहितायां दीर्घे उरुष्या इति देवयाजिनः ।

आत्मयाजिनस्तु—(शोचिष्ठ) हे ज्योतिःस्वरूप! (दीदिवः) ब्रह्माण्डे प्रकाशमान परमेश्वर! (तं) अविनाशिनममृतस्वरूपं (त्वा) त्वां (सखिभ्यः) समानख्यानेभ्यः आत्मप्रतिबिम्बरूपेभ्यो जीवेभ्यः अर्थात् तेषां कल्याणाय (सुम्नाय) मुक्तिसुखाय (नूनम्) निश्चयेन (ईमहे) याचामहे । (सः) विष्णुस्वरूपस्त्वं (नः) अस्मान् (बोधि) जानीहि । (इ) हे रुद्ररूप ! (हवम्) अस्मदीयम् आह्वानम् (श्रुधि) शृणु । (समस्मात्) सर्वस्मात् (अघायतः) पापमाचरतः कामादेः (नः) अस्मान् (उरुष्य) रक्षेति ।

सात्वतास्तु—प्रचण्डदावानले गाः गोपालबालांश्च दग्धुमुपक्रान्ते सति कश्चित् अन्तरङ्गः भगवत्सखा संरक्षणाय व्याहरति 'तं त्वेति'—

(शोचिष्ठ) स्वतो दीप्तिमन् । स्वप्रकाशतेजोमूर्ते (दीदिवः) अन्येषां दीपयितः । (तं) विपन्निवारकत्वेन प्रसिद्धम् । (त्वा) त्वां सखिभ्यः षष्ठ्यर्थे चतुर्थी सखीनां दावदहनदन्दह्यमानानां भवन्मित्राणां गोभिः सहितानाम् (सुम्नाय) कल्याणाय अग्निदाहतो रक्षणाय (त्वा) त्वाम् (ईमहे) याचामहे । त्वत्तः गवां गोपालबालानाञ्च त्राणं याचास इत्यर्थः । त्वरितं सर्वान् अग्नितो रक्षेति तात्पर्यम् । (सः) त्वं नः अस्मान् स्वानुचरान् (बोधि) बुध्यस्व (हवम्) आह्वानं श्रोतव्यम् अस्मदीयप्रार्थनम् (श्रुधी) शृणु । तदेवाह सर्वस्मात् (अघायतः) अघम् कामयमानात् अस्मदपकारकात् शत्रोः (समस्मात्) सर्वस्मात् नः अस्मान् (उरुष्य)

रक्ष पालय दैवोत्पातात् अतिवृष्ट्यग्निदाहादिरूपात्, चेतनात् बकराक्षसादिप्राणिवर्गाद्वा, एतस्मात् सर्वस्मात् अस्मान् पाहि इति भावः ।

"इड एह्यदित एहि काम्या एत ।
मयि वः कामधरणं भूयात् ॥३।२७॥"

१—गवोपसर्पणम् २—गवोपस्पर्शनम्

सप्तविंश्यां कण्डिकायां द्वौ मन्त्रौ 'इड एहि' इति प्रथमो गवोपसर्पणः । 'काम्याः' इत्यादि द्वितीयो गवोपस्पर्शनः । द्वयोः श्रुतबन्धुर्ऋषिः, विराड्गायत्रीछन्दः, गौर्देवता (शत. २, ३, ४, ३४; का. श्रौ. ४, १२, ८, ९) ।

(इडे) इडेति गोनाम (निघ. १, १, १५) मन्त्रादित्वाद् आमन्त्रितम् 'इडे' इत्याद्युदात्तम् । हे धेनो! (एहि) दोहनार्थम् अग्निहोत्रस्थानमागच्छ । (अदिते) अदितिरिति गोनाम (निघ. १, १, १४) दो अवखण्डने (१४४८) दैवादिकः परस्मैपदी । दितिरवखण्डनीया हन्तव्या, कर्मणि क्तिनि, 'द्यतिस्यतिमास्थामित्ति किति' (पा. ७, ४, ४०) इतीकारादेशः । देवराजयज्वा दीङ् क्षये इत्यतो निष्पत्तिमाह । न दितिरदितिर् अध्न्येति । ऐतिहासिकपक्षे इडा मनोर्दुहिता, अदितिर्देवमाता 'अदितिरदीना देवमाता' (निरु. ४, २२) इति यास्कोक्तेः । अतस्मिंस्तच्छन्दस् तद्वदतिदेशार्थं इति न्यायेनाऽत्रोपमार्थः संगच्छते । इडा मनोर्दुहिता मनुमिव अस्मान्प्रति आगच्छ । अदितिरादित्यानिव अस्मान् प्रत्यागच्छेति । वाक्यादित्वाद् 'अदिते' इत्यामन्त्रितमाद्युदात्तमिति ।

द्वितीयेन मन्त्रेण गां स्पृशति–(काम्याः) 'मनुष्याणां ह्येतासु कामाः प्रविष्टा.' (शत. २, ३, ४, ३४) इति श्रुतेः । हे कमनीयाः गावः! अत्रापि वाक्यादित्वादाद्युदात्तत्वम् । (एत) अस्मत्समीप आगच्छेति । (वः) युष्मत्सम्बन्धि (कामधरणम्) कामानां काम्यानां पदार्थानां धरणं फलधारकत्वं, युष्मदधिकरणकमिष्टसिद्धिरूपफलधारकत्वं युष्मत्प्रसादात् (मयि) यष्टर्यपि (भूयात्) भवतात् इष्टफलोपभोगशक्तिराविर्भूयादिति । 'अहं वः प्रियो भूयासम्' (शत. २, ३, ४, ३४) इति श्रुतेः—इति देवयाजिनः ।

आत्मयाजिनस्तु—आत्मा वदति–(इडे) हे महावाक् ! (एहि) आयाहि । (अदिते) हे जीवरूपे परशक्ते! (एहि) । (काम्याः) हे सर्वैः कामयितव्यानि इन्द्रियाणि ! (एत) ज्ञानयज्ञस्थले हार्दान्तरिक्षे आगच्छत । (वः) युष्मत्सम्बन्धि (कामधरणं) इष्टफलधारणं (मयि) आत्मनि (भूयात्) भवेत् न सांसारिकपदार्थेष्विति । भगवतः स्नेहातिरेकात् तद्रक्षितविशेषनामधेयाः काश्चिद् गाः दूरगमनभयेन नामग्राहं समाह्वयति श्रीकृष्णः-इडे इतिः—

(इडे) इडानामिके (अदिते) तदभिधाने (एहि) आगच्छ (काम्याः) काम्यमाना-

स्तन्नामधेया गावः (एत आ इत) मत्समीपमागच्छत । दूरं गतासु भवतीषु भवदनिष्टशङ्कया मम मन उद्विजेत । (मयि) युष्मासु स्निह्यति (वः) कृष्णो युष्माकं (कामधरणं) मदभीष्टफलधारकत्वम्, मदिच्छानुसारेण गमनमवस्थानं वा (भूयात्) भवतु, यथाऽहमिच्छेयं गच्छन्तु अवतिष्ठन्तां वा भवत्य इति तथैव युष्माभिश्चरणीयमिति भावः ।

"सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ।
कक्षीवन्तं य औशिजः ॥ य. ३।२८ ॥"

आहवनीयाग्न्युपस्थानम्

अष्टाविंश्यां कण्डिकायां 'सोमानम्' इत्यृगात्मक एक एव मन्त्रः । अस्य मेधातिथिऋंषिः, ब्रह्मणस्पतिरेवर्षिरिति महीधरः । गायत्री छन्दः, ब्रह्मणस्पतिर्देवता (शत. २, ३, ४, ३५; का. श्रौ. ४, १२, १०) ।

'सोमानं स्वरणं' इत्यारभ्य 'परिते दूडभः' इत्यन्तं नवर्चम् आहवनीयाग्न्युपस्थानम् ।

अन्तरेणाहवनीयं च गार्हपत्यं च प्राच्यां स्थितोऽग्निमीक्षमाणः पठति—(ब्रह्मणस्पते) बृहस्पतिरेव ब्रह्मणस्पतिः स हि ब्रह्मणो वेदवाचः पतिः पालकः । बृहि वृद्धौ (७३६) भौवादिकः परस्मैपदी । बृंहेर्नोऽच्च' (उ. ५८५) इत्यनेनौणादिको मनिन् प्रत्ययः । 'बृ' इत्युत्तरवर्तिना 'न्' इत्यस्याऽकारादेशे यणि ब्रह्मन् इति । माम् (सोमानम्) अभिषोतारम् षुञ् अभिषवे (१२४८) सौवादिकः उभयपदी । छान्दसो मनिः प्रत्यय औणादिकः । प्रत्ययस्वरेण सोमन् शब्दोऽन्तोदात्तः । कर्तरि मनिन्प्रत्ययं व्याचक्षाणौ उव्वटमहीधरौ स्वरदोषान्न रमणीयौ । (स्वरणम्) शब्दयितारं देवस्तुतीनाम् । स्वृ शब्दोपतापयोः (९३२) भौवादिकः परस्मैपदी । 'नन्द्यादित्वात्' (पा. ३, १, १३४) कर्तरि ल्युः प्रत्ययः । 'लिति' (पा. ६, १, १९३) इत्यनेन प्रत्ययात् पूर्वस्य 'स्वर्' इति धात्वकारस्योदात्तत्वात् आद्युदात्तः स्वरण शब्दः । (कृणुहि) कुरु । (कक्षीवन्तम्) तदाख्यं दीर्घतमस ऋषेरपत्यम् । कक्षीवन्तमित्यौपमिकम् । यथा कक्षीवन्तं सम्पन्नसोमाभिषवं विहितदेवस्तोत्रं च त्वं चकर्थ, मामपि तथा कुरु । कक्ष्या अस्ति यस्येत्यर्थे 'कक्ष्यायाः संज्ञायां मतौ संप्रसारणं कर्तव्यम्' (पा. वा. ६ १, ३७) इति वार्तिकेन सम्प्रसारणे 'आसन्दीवदष्ठीवत्०' (पा. ८, २, १२) इत्यादिना मतोर्मस्य वकारादेशः । (यः) दैर्घतमसः कक्षीवान् ऋषिर् (औशिजः) उशिजः मातुरौरसः पुत्रः, अत्र यास्कः —कक्षीवान् कक्ष्यावान् औशिजः, उशिजः पुत्रः, उशिग् वष्टेः कान्तिकर्मणः । अपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात् । तं सोमानं सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते (निरु. ६, १०) इति देवयाजिनः ।

१—ऋग्वेद १, १८, १ । साम. १३९, १४६३ । तै. सं. १, ५, ६, ४ । तै. आ. १०, १, ११ ।

आत्मयाजिनस्तु—(वन्) हे त्रिदेवरूप (ब्रह्मणस्पते) वेदस्य गोप्तः ईश्वर ! त्वं (तं) यष्टारं (सोमानम्) सोमम् आत्मप्रतिबिम्बं ब्रह्मण्यानयतीति सोमानस्तं (स्वरणम्) अहं ब्रह्माऽस्मीतिशब्दवन्तं (कृणुहि) कुरु। (यः) (कक्षी) पापयुक्तः सन् (औशिजः) योगेच्छया सम्पन्न इति।

सात्वतास्तु—स्वसमीपमागतं भगवन्तं युधिष्ठिरः प्रार्थयते -सोमानमिति। 'सोमान' राजसूयाश्वमेघादिबृहत्तमयागकारिणं 'स्वरणं' शब्दायमानं समागतेभ्योऽतिथिभ्यः यथोक्त-स्वागतवचनादेर्वक्तारम्। 'कृणुहि' कुरु 'ब्रह्मणस्पते'! हयग्रीवादिभिरवतारैर्वेदरक्षक किञ्च 'कक्षीवन्तं' कक्षा हिंसादुराचारादेः परित्यागः यज्ञविघातकवधो वा। कष् हिंसायाम् ततः (वृतृ.) (उ. ३४२) इत्युणादिसूत्रेण 'स' प्रत्ययः। तद्वन्तं कामादिषड्रिपुविजयिनम्। यज्ञ-विघातकदुर्जनादिवधसमर्थं वा। उशिजो मेधावी (निरु. ३।१५।१९) वश कान्तौ (आदा-दिकः परस्मैपदी) वशेः कित् (उ. २२९) इति इजिप्रत्ययः। ग्रहिज्या (पा. ६।१।१६) इत्यादिना सम्प्रसारणम्। कामयते शास्त्राण्यभ्यसितुं व्याख्यातुं वा, इति देवराजः। तेषां मेधाविनाम् अयम् औशिजः मेधाविसम्बन्धी, मेधाविषु मुख्यः यः तं तादृशं च मां कृणु इति सम्बन्धः। निष्प्रत्यूहं यष्टा, अतिथीनां यथायथं स्तावकः, पराजितकामादिशत्रुषट्कः, यज्ञविरोधिसपत्नविध्वंसकः, सभायां मेधाविनामग्र्यश्च स्यां त्वत्प्रसादादितिभावः।

"यो रेवान्यो अमोवहा वसुवित्पुष्टिवर्धनः।
स नः सिषक्तु यस्तुरः॥ शु. ३।२९॥

आहवनीयाग्न्युपस्थानम्

एकोनत्रिंश्यां कण्डिकायां 'यो रेवान्' इत्यृगात्मक एव मन्त्रः। अस्य मेधातिथिः ऋषिः, गायत्री छन्दः, ब्रह्मणस्पतिः देवता (शत. २, ३, ४, ३५; का. श्रौ. ४, १२, १०)।

(यः) ब्रह्मणस्पतिः (रेवान्) धनाढ्यः। एकविंश्यां कण्डिकायामस्य व्युत्पत्तिरुक्ता। (यः) यश्च (अमोवहा) रोगाणामपहन्ता। अम रोगे (१७२१) चौरादिकः उभयपदी। अस्माद् औणादिकः ईवन्प्रत्ययः। अमीवान् रोगान् हन्ति अमीवहा, 'बहुलं छन्दसि' (पा. ३, २, ८८) इत्यनेन क्विपि रूपम्। (वसुवित्) वसुनो धनस्योपयोगितां वेत्ति—इति वसुवित्। यद्वा वसु धनं भक्तेभ्यो वेदयति लम्भयतीति वसुवित्। उत्तरपदे विद ज्ञाने इत्यतो वा विद्लृ लाभे इत्यतो वा 'सत्सूद्विष॰' इत्यादिना क्विप् प्रत्ययः। (पुष्टिवर्धनः) पोषणं पुष्टिः। पुष् पुष्टौ (७००) भौवादिकः परस्मैपदी। भावे क्तिन्प्रत्ययः। पुष्टिं वर्धयते 'नन्दिग्रहिपचा-

---

१—ऋग्वेद १, १८, २।

दिभ्यो ल्युणिन्यचः' (पा. ३, १, १३४) इत्यनेन नन्द्यादित्वमाश्रित्य ल्युः प्रत्ययः। उत्तरपदप्रकृतिस्वरेण लित्स्वरे स्थिते मध्योदात्तः शब्दः। (यः) यो ब्रह्मणस्पतिः (तुरः) भक्तानामभीष्टपूरणे त्वराशीलः। तुर त्वरणे (११०२) जौहोत्यादिकः परस्मैपदी। 'इगुपधज्ञाप्रीकिरः कः (पा. ३, १, १५३) इत्यनेन कर्तरि कः प्रत्यय। प्रत्ययस्वरेणान्तोदात्तश्च शब्दः। (सः) एवंगुणविशिष्टः (नः) अस्मान् (सिषक्तु) 'सिषक्तु सचत इति सेवमानस्य' (निरु. ३, २१) इति यास्कोक्तेः सेवताम् पालयतामित्यर्थः। षच सेवने (१६३) भौवादिकः आत्मनेपदी। 'बहुलं छन्दसि' (पा. २, ४, ७६) इति शपः श्लुः द्विर्भावः अभ्यासस्येत्वं च।

अथवा अग्निप्रसादाद् अस्मिन् मन्त्रे पुत्रः प्रार्थ्यते—एवंगुणविशिष्टो मम पुत्रो जायताम् यो धनवान् यः पित्रोर्व्याधिग्रस्तयोर् औषधाद्युपचारैर्यथार्हपरिचरणैश्च रोगाणामपहन्ता यश्च सात्विकैरुपायैर् धनं लब्धा, यः स्वशरीरपुष्टिपूर्वकं सुमधुरसरसभोजनादिभिः पित्रोः पुष्टिं वर्धयिता, यश्च कर्तव्यकर्मसम्पादने क्षिप्रकारी, सोऽस्मान् सेवतामिति देवयाजिनः।

आत्मयाजिनस्तु— (यः) महाविष्णुः (रेवान्) रः ब्रह्मानलः एः पराशक्तिस्तयोरधिष्ठानं (यः) (अमीवहा) अमीवानां जन्ममृत्युरोगादीनां हन्ता (वसुवित्) वसन्ति भगवद्भक्ता यत्र तद् वसु वैकुण्ठं तस्य दाता लम्भयिता अथवा स्वस्य वैकुण्ठरूपस्य प्रापकः (पुष्टिवर्धनः) पुष्टेर्विष्णुभक्तिभावनाया वर्धयिता (यः) (तुरः) त्रिदेवरूपस्य धारकः (सः) (नः) अस्मान् (सिषक्तु) सचतां सेवतामिति।

सात्वतास्तु— धर्मराजः स्नेहातिरेकात् पौनःपुन्येन श्रीकृष्णं स्तौति 'यो रेवान्' इति। रेवान् प्रशस्तधनयुक्तः लक्ष्मीपतिर्वा। यः अमोवहा प्रपन्नार्तिव्याधिहन्ता अविद्यारोगनिवर्तको वा। वसुवित् वसुना मम मातुलेन वसुदेवेन तपश्चर्याप्राप्तवरबलात् विद्यते लभ्यते। वसुवित् वसुपूर्वाद् विदेः बाहुलकात् कर्माणि क्विप्। यद्वा वसुना द्रोणवसोरवतारेण व्रजाधीशनन्देन विद् लब्धा तत्पतत्नी यशोदा च धरावतारः, ताभ्यां द्वाभ्यां पूर्वजन्मनि तपस्यद्भ्यां समासादितस्वगृहभगवदाविर्भाववराभ्यां पुत्रात्मना भगवान् लब्ध इति भावः। (पुष्टिवर्धनः) यदूनाम् अतिशयेत समर्धयिता (तुरः) भक्तपरित्राणार्थं त्वरमाणः, अविलम्बेन गरुडमारुह्य समागत्य भक्तपरित्राता (यः) एवंविधः (सः) भवान् (नः) अस्मान् (सिषक्तु) सचतां सेवतामनुगृह्णातु शिष्यपुत्रभक्तादेः गुरुपितृप्रभ्वादिभिः सस्नेहमनुग्रहणमेव तत्सेवनम्। तुर इति तरतेर्वा त्वरतेर्वा त्वरया तूर्णगतिः इतियास्कः (निरु. १२।१४) षच् सेचने सेवने च (भ्वा. आ १६३) यद्वा (सिषक्तु) समवैतु नित्यं संयुनक्तु स्वेन समं अस्मान् नित्यं संबध्नातु। कदापि वयं त्वद्वियुक्ता न भवेमेति भावः (सिषक्तु) अवबुद्ध्यतां वा स्वस्मिन् अस्मदनुरागम्। षच् समवाये (भ्वा. उ. ८८७) समवायः नित्यसम्बन्धः सम्यक् अवबोधो वा।

[1]"मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य ।
रक्षा णो ब्रह्मणस्पते ॥ य. ३।३० ॥"

आहवनीयाग्न्युपस्थानम्

त्रिंशयां कण्डिकायां 'मा नः शंसः 'इत्यृगात्मक एको मन्त्रः । अस्य सत्यधृतिर्वारुणिः ऋषिः, निचृद्गायत्री छन्दः, ब्रह्मणस्पतिर्देवता (शत. २,३,४,३५; का. श्रौ. ४, १२,१०)।

(अररुषः) अप्रदातुः कृपणस्य । रा दाने (१०५७) आदादिकः परस्मैपदी । अस्मात् लिटि क्वसुप्रत्ययः । ररौ इति ररिवान् । तस्य प्रतिषेधः । नञा सह तत्पुरुषसमासे न ररिवान्, अररिवान् । षष्ठ्येकवचने 'वसोः सम्प्रसारणम् (पा. ६, ४, १३१) इति सम्प्रसारणे पूर्वरूपे च अररुषः इति । (मर्त्यस्य) मनुष्यस्य । मर्त्य इति मनुष्यनाम (निघ. २, ३, १२) म्रियत इति मर्त्यः । मृङ् प्राणत्यागे(१४०४) तौदादिकः आत्मनेपदी । अस्मात् 'हसिमृङ्०' (पा. ३, ८३) इत्यादिना सूत्रेण तन्प्रत्ययः । ततो मर्त-शब्दात् 'नवसूरमर्तयविष्ठेभ्यो यत्' (पा वा. ५, ४, २५) इत्यनेन स्वार्थे यति 'यतोऽनावः' (पा. ६, १, २१२) इत्यनेनाद्युदात्तो मर्त्यशब्दः । (शंसः) अभिशापः अनिष्टचिन्ता वा । शंसु स्तुतौ (७२८) भौवादिकः परस्मैपदी । भावे घञ् । शंसनं शंसः (धूर्तिः) हिंसा 'धूर्वति, इति वधकर्मसु पठितम्(निघ. २, १९, ४) धुर्वी हिंसार्थः (५७३) भौवादिकः परस्मैपदी, भावे क्तिनि 'राल्लोपः' (पा. ६, ४, २१) इति वलोपः । छान्दसमन्तोदात्तत्वम् (नः) अस्मान् (मा) न (प्रणक्) व्याप्नोतु प्रपूर्वकाद् नशेर्व्याप्त्यर्थकाद् लुङि प्रथमपुरुषैकवचने 'मन्त्रे घसह्वर०' (पा. २, ४, ८०) इत्यादिना च्लेर्लुकि 'हल्ङ्याब्भ्य०' (पा. ६, १, ६८) इत्यादिना विभक्तिलोपे 'नशेर्वा' (पा. ८, २, ६३) इति कुत्वे 'उपसर्गादसमासेऽपि णोपदेशस्य' (पा. ८, ४, १४) इति णत्वे रूपम् । अथवा णश अदर्शने (११९४) दैवादिकः परस्मैपदी एव प्रकृते ग्राह्यः । अस्मान् न विनाशयत्वित्यर्थः । (ब्रह्मणस्पते) हे वेदरक्षक ! 'षष्ठ्याः पतिपुत्र०' (पा. ८, ३, ५३) इत्यादिना विसर्गस्य सादेशः । (नः)अस्मान् त्वच्छरणं प्रपन्नान् (रक्ष) गोपाय । 'द्व्यचोऽतस्तिङः' (पा. ६, ३, १३५) इति संहितायां दीर्घे रक्षा इति देवयाजिनः ।

आत्मयाजिनस्तु— (ब्रह्मणस्पते) हे वेदरक्षक महाविष्णो ! (अररुषः) आत्माग्नावाहुतिमदत्तवतः (मर्त्यस्य) विषयासक्तेर्मरणधर्मणो मनसः (शंसः) अनिष्टचिन्ता (धूर्तिः) हिंसा च (नः) अस्मान् योगिनः (मा प्रणक्) न नाशयतु । (नः) अस्मान् योगारूढपुरुषान् (रक्ष) इति ।

१—ऋग्वेद १, १८, ३ ।

सात्वतास्तु— युधिष्ठिर एवं व्याहरति (अररुषः) रातिः दानकर्मा क्वसौ द्विर्वचने ररिवान्, छन्दसि कालानियमात् दाता धार्मिकः। तद्विरुद्धो अरविवान् अधार्मिको दुर्जनः तस्य, यः स्वयं न ददाति कृपणत्वात् दातॄंश्च विरुणद्धि तस्य (मर्त्यस्य) मनुष्यस्य (शंसः) अनिष्टचिन्ता मानसी हिंसा। (धूर्तिः) बहिर्हिंसा वाचिकी शारीरिकी च। धुर्वी हिंसायाम् क्तिनि रूपम्। (नः) अस्मान् (मा प्रणक्) न प्रकर्षेण व्याप्नोतु 'नशिर्' व्याप्तिकर्मा (नि. २।१८) 'णश्' अदर्शने अन्तर्भावितण्यर्थः, मा पृथक् करोतु न विनाशयतु। मनसा वाचा कर्मणा वा ये हिंसकाः दुर्जनाः ते पराजिता भवन्तु। अस्मान् दुःखीकर्तुं न प्रभवेयुरिति भावः।

[1]"महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः।
दुराधर्षं वरुणस्य ॥ य. ३।३१ ॥"

आहवनीयाग्न्युपस्थानम्

अस्यां एकत्रिंश्यां कण्डिकायां 'महि त्रीणाम् इत्यृगात्मक एक एव मन्त्रः। अस्य सत्यधृतिर्वारुणिः ऋषिः, विराड् गायत्री छन्दः, ब्रह्मणस्पतिर्देवता (शत. २, ३, ४, ३७; का. श्रौ. ४, १२, १०)।

(मित्रस्य) तदाख्यस्य देवस्य (अर्यम्णः) तदाख्यस्य देवस्य (वरुणस्य) तदाख्यस्य देवस्य (त्रीणाम्) एतेषां त्रयाणाम् आदित्यस्वरूपाणाम्। त्रेरामि छन्दसि त्रयादेशो वेति वाच्यम् इति त्रयादेशविकल्पः (पा. वा. ७, १, ५३)। (महि) महत् (द्युक्षं) द्युतिमन्तः पदार्थाः क्षियन्ति निवसन्ति यत्र, छान्दसः औणादिकः डः प्रत्ययः (दुराधर्षम्) दुःखेनाधर्षयितुमर्हम्। दुर् आङ् इति-पूर्वकाद् धृषेः कर्मणि खल् प्रत्ययः, 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा ३, ३, १२६) इति खल्प्रत्यये लित्स्वरेणोत्तरपदप्रकृतिस्वरः। (अवः) रक्षणम् (अस्तु) भवतु इति देवयाजिनः।

आत्मयाजिनस्तु– (मित्रस्य) प्राणस्य 'प्राणो वै मित्रः' (शत. १२, ९, २, १२)। (अर्यम्णः) मनसः 'मनः पितरः' (शत. १४, ४, ३, १३)। 'पितॄणामर्यमा चास्मि' (गीता १०।२९) इति भगवदुक्तेः। (वरुणस्य) अपानस्य, 'अपानो वरुणः' (शत. १२, ९, २, १२)। (त्रीणाम्) त्रयाणाम् (महि) महत् (द्युक्षं) ब्रह्मवर्चसतेजोयुक्तम् (दुराधर्षम्) कामादिशत्रुभिराधर्षयितुमशक्यम् (अवः) रक्षणम् (अस्तु) भवत्विति।

सात्वतास्तु–मथुरायां कंसे निहिते स्नेहातिरेकात् सहलधरं कृष्णं वक्षसा समालिङ्गन् वसुदेव

१—ऋग्वेद १०, १८५, १। साम. १९२।

आचष्टे,—'महि' इति । 'मित्रस्य' मम मित्रस्य नन्दस्य तदुपलक्षितव्रजवासिवृन्दस्य (अर्यम्णः) अरीन् पूतनादीन् कंसान्त न् नियच्छतो भवतः, भवदुपलक्षितस्य यदुकुलस्य 'अर्यमा' आदित्यः अरीन्नियच्छति, इति यास्कः (निरु. ११।२३) अर्यं स्वामिनं राजानं मिमीते निर्मिमीते कंसस्य स्थाने तत्पितुः उग्रसेनस्य राज्ञो निर्माता अर्यमा अर्योपपदात् माङः (कनिनि) साधुः । तस्य उग्रसेनं राजानं विदधतस्तव त्वदुपलक्षितस्य यदुवृन्दस्य इति वा । (वरुणस्य) वरणीयस्य सम्भजनीयस्य भगिनीपुत्रत्वात् स्नेहास्पदस्य पाण्डवगणस्य च । (त्रीणाम्) त्रयाणाम् (अवः) रक्षणम् (अस्तु) स्यात् । रक्षणं विशनष्टि— (महि) महत् (द्युक्षं) द्योतमानसुवर्णादिनिवासभूतं तद्बहुलं (दुराधर्षं) केनाऽपि अतिरस्करणीयम् । तात! त्वत्तेजसा रक्षितं व्रजराजकुलं, पाण्डव-वृन्दञ्च सुवर्णरजतादिसमृद्धं निहतसपत्नञ्च स्यादिति भावः ।

अपि वा (मित्रस्य) सर्वेषां सुहृदः अजातशत्रोर्युधिष्ठिरस्य (अर्यम्णः) शौर्यातिरेकेण वकनिवातकवचादिशत्रुघातकस्य भीमार्जुनयुगलस्य, स्वबाहुबलात् शत्रून् व्यापाद्य स्वस्यार्यं ज्येष्ठं भ्रातरं अर्यं स्वामिनं राजानं निर्मिमाणस्य इति वा (वरुणस्य) सम्भजनीयस्य लावण्यातिशयेन लोकस्पृहणीयस्य निःसीमस्नेहभाजो नकुलसहदेवद्विकस्य, एवं पञ्चत्वेऽपि पाण्डवानां चतुर्णां युगलद्वयेन क्रोड़ीकरणात् (त्रीणाम्) त्रयाणाम् युधिष्ठिरस्य भीमार्जुनयुग्मस्य नकुलसहदेवयुगलस्य च । (अवः) अवनम् रक्षणं भवतु । यदवो गोपालाश्च सनाथाः, मम भगिनी कुन्ती विगतभर्तृका स्वज्येष्ठात् तत्सुतशताच्च पीडयमाना नितान्तमार्ता, प्रतिपदं विपदमाशङ्कमाना अत्यातुरा दुस्तरदुःखसागरनिमग्नेति महता कृच्छ्रेण तया अनाथाः स्वसुताः परिपाल्यन्ते तस्मात् तातो वसुदेवः विशेषतः स्वभागिनेयानां रक्षणं प्रार्थयत इति भावः ।

[1]"नहि तेषाममा चन नाध्वसु वारणेषु ।
ईशे रिपुरघशंसः ॥ य. ३।३२ ॥"

आहवनीयाग्न्युपस्थानम्

द्वात्रिंशयां कण्डिकायां 'नहि तेषाम्' इत्यृगात्मक एक एव मन्त्रः । अस्य सत्यधृतिर्वारुणिः ऋषिः, निचृद्गायत्री छन्दः, आदित्यो देवता (शत. २, ३, ४, ३७; का. श्रौ. ४,१२,१०) ।

(तेषाम्) आदित्यादिभिः रक्षितानां यष्टॄणां (नहि) निषेधार्थको निपातः नैव (अमा) गृहे, अमशब्दो गृहनामसु पठितः (निघ. ३, ४, ११) । अम गत्यादिषु (४६५) भौवादिकः परस्मैपदी । अमन्ति गच्छन्ति यत्रेत्यर्थः, 'पुंसि संज्ञायां घः प्रायेण' (पा. ३, ३, ११८) इत्यनेनाधिकरणे घः प्रत्ययः । प्रत्ययस्वरेणान्तोदात्तश्च । अमे इत्येवं सतः 'सुपां सुलुक्' (पा. ७, १३९) इत्यादिनाऽऽकारः । अथवा अमाशब्दो गृहवचन इत्युव्वटोक्तेर्गृहार्थे

१—ऋग्वेद १०, १८५, २ ।

निपातोऽयम् । (चन) अपि, गृहेऽपि, (न)नापि (वारणेषु) वारयन्ति चौरादयो यत्र स्थिताः पथिकान् इति, वृञ् आवरणे (१८१४) चौरादिकः उभयपदी । अधिकरणे युच्प्रत्ययः, 'सुयुरुवृञो युच्' (उ. २।७६) इत्युणादिसूत्रम् । चित्त्वादन्तोदात्तः । तथाविधेष्वरण्येष्वपि । कश्चिदपि (अघशंसः) पापचिन्तकः, शंसनं शंसः, भावे घञ् । चिन्तनं वा कथनम् वा । अघस्य पापस्यैव शंसश्चिन्तनं कथनं वा यस्येति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः । उव्वट-महीधरादयः कृद्वृत्या व्युत्पादयन्तः स्वरदोषतश्चिन्त्याः । 'आहन्ता वधस्वभावः आशंसमान-श्चेति देवराजयज्वापि (निघ. ३, २४, १३) क्लिष्टकल्पनया न रमणीयः । (रिपुः) अरिरपि (ईशे) ईष्टे समर्थो भवति । ईश ऐश्वर्ये (१०२०) आदादिक आत्मनेपदी । लटि प्रथम-पुरुषैकवचने ईष्टे इत्येवं सतः 'लोपस्त आत्मनेपदेषु' (पा. ७, १, ४१)इत्यनेन 'ते' इत्यात्मने-पदप्रत्ययावयवस्य 'त्' इत्यस्य लोपे रूपम् । युष्मत्कृपाभिरक्षितानां नापि गृहे नापि बहिः कश्चिदप्यनिष्टचिन्तकः शत्रुरपकर्तुं समर्थो भवतीत्याशय इति देवयाजिनः ।

आत्मयाजिनस्तु— (अमा) इन्द्रियाणां गृहेषु (तेषां) प्राणापानमनसाम् (अघशंसः) पापचिन्तकः (रिपुः) शत्रुः अज्ञानं (नहि ईशे) न पारयते, समर्थो न भवतीत्यर्थः । (रणेषु) कामादीनां शत्रूणां संग्रामेषु (वा) अथवा (अध्वसु) योगवर्त्मसु (चन) अपि (न) इति ।

सात्वतास्तु– भगवद्बाहुबलसमुत्पन्नप्रत्ययेन तातेन वसुदेवेन सम्प्रति वयं सर्वे विगत-त्रासाः गृहे, वने,युधि वा कुत्रापि किन्न वर्तेमहि इति व्याह्रियते इति वर्ण्यते—'न हि' इति । तेषां पूर्वोक्तानां यदुगोपपाण्डुनतयानां वा 'अमा' गृहं, अम इति गृहनाम (निघ. ३ ४।११) 'अमा' अम गतिभक्षशब्देषु (भ्वा. प. ४६५) पुंसि संज्ञायां घः प्रायेण (३।३।११८) इति घः । गमयन्तेऽस्मिन् भक्षयन्ते शब्दायन्ते वा । अमशब्दः सप्तम्येकवचने,विभक्तेराकारः । अपि वा अमाशब्दो गृहवचनः सहवचनश्च निपातः (ऋ.सं. ५, २, २०१) इत्युव्वटः । 'चन' अपि नहि नैव 'अध्वसु' मार्गेषु पथिषु 'वारणेषु' संग्रामेषु वा 'अघशंसः' अनिष्टोत्प्रेक्षकः 'रिपुः'सपत्नः 'ईशे' इष्टे नेति सम्बन्धः । भगवद्भुजपालितानां जनानां सर्वत्राभयमिति भावः ।

[1]"ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय ।
ज्योतिर्यच्छन्त्यजस्रम् ।। य. ३।३३ ।।

आहवनीयाग्न्युपस्थानम्

अथस्त्रिंश्यां कण्डिकायां 'ते हि पुत्रासः' इत्यृगात्मक एक एव मन्त्रः । अस्य सत्यधृति-र्वारुणिः ऋषिः, विराड्गायत्री छन्दः, आदित्यो देवता (शत. २, ३, ४, ३७; का. श्रौ. ४, १२, १०) ।

१—ऋग्वेद ८, १८, ५ ।

आदित्यैस्त्रिभिरभिपालितं नाघशंसो रिपुरीष्टे, सर्वथा सुरक्षितजीवनो यजमानो भवति, (हि) यत यस्मात् कारणात् (ते) उक्तास्त्रयः (अदितेः) अक्षीणाया देवमातुः (पुत्राः) तनूजाः (मर्त्याय) तस्मै कृपापात्राय मानवश्रेष्ठाय (जीवसे) जीवितुम् 'तुमर्थे सेसेनसे०' इत्यादिना तुमर्थे असेप्रत्ययः। प्रत्ययस्वरेण मध्योदात्तश्च शब्दः। (अजस्रम्) अक्षीणम् जसिर् नञ्-पूर्वः क्रियासातत्ये वर्तते। तस्माद् 'नमिकम्पि०' (पा. ३, २, १६७) इति रप्रत्ययः निरन्तर-मित्यर्थः। (ज्योतिः) चिरायुष्यप्रदं प्रकाशं (प्रयच्छन्ति) ददति। व्यवहितस्यापि 'प्र' इत्युपसर्गस्य क्रियया सम्बन्धः। मन्त्रे 'हि' पदं श्रूयते तद्योगात् 'हि च' (पा. ८, १, ३४) इति सूत्रसामर्थ्यात् 'यच्छन्ति' इति तिङन्ते 'तिङ्ङतिङः' (पा. ८, १, २८) इति प्राप्तमनु-दात्तत्वं न प्रसजति, इति देवयाजिनः।

आत्मयाजिनस्तु—(हि) यस्मात् (ते) (अदितेः) जीवस्वरूपायाः परशक्तेः (पुत्रासः) मनःप्राणापानाः (मर्त्याय) साधकाय (अजस्रम्) अक्षीणं सन्ततं परिपूर्णं (ज्योतिः) ब्रह्म-ज्योतिः (प्रजीवसे) कैवल्यमोक्षाय (यच्छन्ति) प्रददतीति।

सात्वतास्तु– तदेवाविष्करोति 'तेहि'–इति। ते यदवः ब्रह्मणानुज्ञाता (भाग०१०।१।२२) भगवत्सेवार्थं धरायामवतीर्णाः,गोपा अपि गोगोवर्धनगोपीगणोपेतगोलोकेन सह भगवत्क्रीडार्थं धरायामायाताः। पाण्डवा अपि कुन्त्याः मन्त्रशक्तिप्रभावात् समाहूतानां देवानां प्रसादात् लब्धजन्मानः क्रमेण धर्मवातेन्द्राश्वियुगलांशा एव। तस्मात् (ते) यदुगोपपाण्डुतनयाः, (अदितेः पुत्रासः) अदितिपुत्रा देवा एव। तान् विशिनष्टि ये (प्रजीवसे) जीवनाय, सुख-पुरस्सरं जीवितुम्, (मर्त्याय) मनुष्याय एकत्वमविवक्षितम्। सर्वेभ्यः मनुष्येभ्यः अजस्रं सततं (ज्योतिः) प्रकाशं ज्ञानं प्रयच्छन्ति प्रददति उपदिशन्ति येन तैः दर्शितभगवद्भक्ति-मार्गाः तान् अनुकुर्वाणाः प्रभुमाराधयन्तो मानवाः ससुखं जीवन्ति।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥ इतिवचनात्।

[1]"कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥ य. ३।३४॥

आहवनीयाग्न्युपस्थानम्

चतुस्त्रिंश्यां कण्डिकायां 'कदाचन स्तरीरसि' इत्यृगात्मक एक एव मन्त्रः। अस्य वैश्वा-मित्रो मधुच्छन्दाः ऋषिः, पथ्याबृहती छन्दः, यस्यास्तृतीयः पादो द्वादशाक्षरोऽन्ये, त्रयोष्टाऽ-

---

१—ऋ. ८, ५१, ७। साम. ३००। तै. सं. १, ४, २२, १; ५, ६, ४।

क्षराः सा पथ्याबृहती इन्द्रो देवता (शत. २, ३, ४, ३८; का. श्रौ. ४, १२, १०)।

(इन्द्र) हे परमैश्वर्यान्वित देव ! (कदा) कस्मिन् काले (चन) अपि कदापीत्यर्थः। (स्तरीः) हिंसकः क्रुद्ध इति यावत्। स्तॄ ञ्‌ आच्छादने (१४८५) क्रैयादिक उभयपदी। वेदेऽयं हिंसायां दृष्टः 'वधकर्मसु स्तृणाति' (निघ. २, १९, १२) इति पठितत्वात्। ततः अवितॄस्तॄतन्त्रिभ्य ईः' (उ. ३, १५८) इत्यौणादिकः ई प्रत्ययः। (न) नैव (असि) भवसि। अनेकधा याच्यमानोऽपि यजमानं नाभिक्रुध्यसि प्रत्युत (दाशुषे) हविर्दत्तवते यजमानाय दाशृ दाने (८८८) भौवादिकः उभयदी, इत्यस्मात् लिटि 'दाश्वान्साह्वान्मीढ्वांश्च' (पा. ६, १, १२) इत्यनेन क्वसुप्रत्ययान्तो दाश्वान्शब्दः। चतुर्थ्यामेकवचने रूपम्। 'सश्चसि' धनपुत्रपौत्रादिसमृद्धिं प्रापयसि ददासीत्यर्थः। 'गतिकर्मसु' सश्चति इति पाठात्' (निघ. २, १४, ४१)। अथवा 'दाशुषे' इति द्वितीयार्थे चतुर्थी। दाश्वांसं दानशीलं यजमानं सश्चसि सेवसे। सश्चतिः सेवार्थः। (मघवन्)। अभीष्टफलादिसमृद्धिसम्पन्न देव (देवस्य) द्योतमानस्वरूपस्य (ते) तव (दानं) स्वभूतं दातव्यं (भूयः) बहुलम् (इत्) एव (नु) क्षिप्रवचनो निपातः (निघ. २, १५, १), क्षिप्रम् अतिशीघ्रम्। इन्नु इति निपातयोरभ्यासो दाढ्यार्थः। (उपोप पृच्यते) उपेत्यस्य द्विर्भावः पादपूरणार्थः 'प्रसमुपोदः पादपूरणे' (पा. ८, १, ६) इति पाणीनीयाऽनुशासनात्। उपपृच्यते उपगच्छति। पृची सम्पर्के (१४६३) रौधादिकः परस्मैपदी। कर्मकर्तरि रूपम्। पुनः पुनः प्रार्थ्यमानोऽपि त्वं न क्रुध्यसि अपितु तत्काल एव भूयिष्ठं दातव्यं दानशीलाय प्रत्यर्पयसीति भाव इति देवयाजिनः।

आत्मयाजिनस्तु— ईशोपासना— (इन्द्र) हे परमेश्वर महानारायण! 'इन्द्रो वै सर्वे देवाः' (शत. १३. १, ७, ४) त्वं (कदाचन) कदापि (स्तरीः) हिंसकः (न असि) न भवसि। शुद्धसत्त्वस्वरूपत्वात्त्वयि तमःकार्याभावः (दाशुषे) मनःप्राणबुद्ध्यादिकं सर्वस्वं दत्तवते तुभ्यं समर्पितवते भक्तप्रवराय (उप) उः शिव. प् पितामहः अः विष्णुः तत्सम्बुद्धौ त्रिदेवस्वरूप (इन्नु) सर्वदैव (सश्चसि) सेवसे। त्रिदेवरूपेण वरदानाय तस्मै सर्वस्वं हुतवते प्रादुर्भवसीत्यर्थः। सश्चतिः सेवनकर्मा। (मघवन्) म् ब्रह्मा अः विष्णुः घः शिवः तद्युक्त हे त्रिदेवमय (ते) तव (देवस्य) ज्योतिःस्वरूपस्य (भूयः) बहुतरम् (इत्) एव (दानम्) धर्मकामार्थमोक्षाणां पुरुषार्थचतुष्टयानां साधनं (नु इत्) क्षिप्रमेव (उप पृच्यते) यजमानेन सह सम्बध्यत इति।

सात्वतास्तु—गोवर्धनधारणेन व्रजे रक्षिते विगतमदाय क्षमाप्रार्थनार्थं भगवत्समीपमुपगताय इन्द्राय भगवान् उपदिशति— 'कदाचन' इति। (इन्द्र) (दाशुषे) मह्यमात्मानं निवेदयते परं मद्भक्ताय तम् अपकर्तुं अधुना व्रजजनमिव भविष्यति समये कदाचित् कदापि (स्तरीः) घातकः (असि न) मा भूत्, न भव, मद्भक्तस्य अवज्ञां विस्मृत्यापि न

कुरुष्वेति भावः। क्षमे कृतमपराधं व्रजोपप्लावनलक्षणम् (सश्चसि) यथासुखम् अमरावतीं स्वराजधानीं गच्छ। छन्दसि कालानियमात् द्वयोः'उप' शब्दयोः एकः पादपूरणः, अपरस्य च 'पृच्यत' इति क्रियान्वयः, 'इन्नु' इत् नु इति निपातद्वयं एवार्थकम्। द्वितीयं 'इन्नु' निपातद्वयम् अत्र नु' क्षिप्तं 'इत्' एव इत्यर्थकम्। तथा सति मघवन्! धनवन् बहुधनेन्द्र! देवस्य देवेन मया दानं दीयमानं भूयः यद् बहुलमेव वैभवं तत् क्षिप्रमेव(ते)तव (उपपृच्यते) सम्पृक्तं भवति। मद्दत्तवैभवस्यैव त्वं स्वामी उपभोक्ता च। मनागपि ते स्वकीयं न वर्तते। धिक् त्वां न त्रपसे,मदाश्रितोऽपि मद्भक्तान् दुःखीकर्तुं समीहसे। अतः ऊर्ध्वं न त्वया प्रमदितव्यम्। मत्प्रिया मदुपासकाः सदा सर्वथा सर्वत्र त्वया सम्मान्याः इति निष्कर्षः।

[1]"तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥ य. ३।३५॥"

आहवनीयाग्न्युपस्थानम्

अस्यां पञ्चत्रिंश्यां कण्डिकायां 'तत्सवितुः' इत्यृगात्मक एक एव मन्त्रः। अस्य विश्वामित्र ऋषिः, निचृद्गायत्री छन्दः, सविता देवता (शत. २, ३, ४, ३९; का. श्रौ. ४, १२, १०)।

'सविता वै देवानां प्रसविता तथो हास्मा एते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते' (शत. २, ३, ४, ३९) इति श्रुतेः। (तत्) षष्ठ्यर्थे प्रथमा। (सवितुः) सर्वप्रेरकस्य, 'योऽसावादित्ये पुरुषः सोऽसावहम्' (यजु. ४०।१७) इति श्रुतेः सूर्यमण्डलान्तःस्थितपुरुषस्य सर्वान्तर्यामिणो हिरण्यगर्भोपाध्यवच्छिन्नस्य विज्ञानानन्दमयस्य ब्रह्मणः (देवस्य) प्रकाशस्वरूपस्य (वरेण्यम्) वरणीयं सर्वैः संभजनीयम्। वृङ् संभक्तौ (१५१०) क्र्यादिकः आत्मनेपदी ततः औणादिकः एण्यन् प्रत्ययः। नित्त्वादाद्युदात्तत्वं च। (भर्गः) सर्वकिल्विषाणां भर्जने समर्थं तेजः। अत्र सूर्यमण्डलं, मण्डलान्तर्गतो हिरण्यगर्भोपाध्यवच्छिन्नः पुरुष, सूर्यरश्मयो वा त्रयो भर्गशब्दवाच्याः। वीर्यं वा भर्गः। 'वरुणाद्ध वाऽभिषिषिचानाद् भर्गोऽपचक्राम वीर्यं वै भर्गः' (शत. ५, ४, ५, १) इति श्रुतेः। भृज्जत्यनेन सर्वं किल्विषमिति भर्गः। भ्रस्ज पाके (१२८५) तौदादिकः उभयपदी। तस्मात् 'अञ्च्यञ्जियुजिभृजिभ्यः कुश्च' (उः ४, २१५) इत्यनेन असुन्प्रत्यये कुत्वे च नित्स्वरेणाद्युदात्तो भर्गशब्दः। (धीमहि) ध्यायामः विचिन्तयामः। छान्दसं सम्प्रसारणम्। डुधाञ् धारणपोषणयोः,इत्यतः प्रार्थनायां लिङि रूपमित्यर्वाचीनाः। अथवा 'तत्' इति पदं भर्गविशेषणम्।

१—ऋ. ३।६२।१०। साम. १४६२। तै. ब्रा. १, ५, ६, ४; ४, २, ११, १। तै. आ. १, ११, २।

सवितुर्देवस्य तद् वरेण्यं भर्गो धीमहीति योजना। (यः) सविता (नः) अस्माकं (धियः) धीरिति प्रजानमसु पठितम्'(निघ. ३,९.७)बुद्धीः, कर्मवचनो वाग्वचनो वा धीशब्दः, कर्माणि वाचो वा (प्रचोदयात्) प्रकर्षेण सत्कर्मसु प्रवर्तयेत्। चुद संचोदने (१५९३) चौरादिकः उभयपदी, लेटि रूपम्। तत्पदं भर्गविशेषणमिति पक्षे 'धियो यः' इत्यत्र 'यः' शब्दो लिङ्ग-व्यत्ययेन 'यत्' इत्यवगन्तव्यः। गायत्रीमन्त्रनिर्वचने याज्ञवल्क्यः—

तच्छब्देन तु यच्छब्दो बोद्धव्यः सततं बुधैः।
उदाहृते तु यच्छब्दे तच्छब्दः स्यादुदाहृतः ॥१॥
सविता सर्वभूतानां सर्वभावान् प्रसूयते।
सवनात्पावनाच्चैव सविता तेन चोच्यते ॥२॥
दीव्यते क्रीडते यस्माद् द्योतते रोचते दिवि।
तस्माद् देव इति प्रोक्तः स्तूयते सर्वदैवतैः ॥३॥
चिन्तयामो वयं भर्गं धियो यो नः प्रचोदयात्।
धर्मार्थकाममोक्षेषु बुद्धिवृत्तीः पुनः पुनः ॥४॥
भ्रस्ज पाके भवेद् धातुर्यस्मात् पाजयते ह्यसौ।
भ्राजते दीप्यते यस्माज्जगच्चान्ते हरत्यपि ॥५॥
कालाग्निरूपमास्थाय सप्तार्चिः सप्तरश्मिभिः।
भ्राजते यत्स्वरूपेण तस्माद् भर्गः स उच्यते ॥६॥
भेति भीषयते लोकान् रेति रञ्जयते प्रजाः।
गेत्यागच्छत्यजस्रं यो भगवान् भर्ग उच्यते ॥७॥
वरेण्यं वरणीयं च संसारभयभीरुभिः।
आदित्यान्तर्गतं यच्च भर्गाख्यं वा मुमुक्षुभिः ॥८॥
जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च।
ध्यानेन पुरुषो यस्तु द्रष्टव्यः स सूर्यमण्डले ॥९॥

इति देवयाजिनः।

आत्मयाजिनस्तु—यत् ब्रह्म (सवितुः) विराट्स्वरूपस्य सूर्यस्य (वरेण्यम्) अभ्यर्थनीयं (देवस्य) दिवु क्रीडायां जिगीषायाम् अर्दे च। रामकृष्णाद्यवतारैः क्रीडति देवशत्रून् असुरान् जिगीषति अर्दयति वा तस्य साकारब्रह्मणः (भर्गः) आविर्भावः भः व्याप्तिः र् रमणम् गः प्राप्तिः। रामकृष्णादेः प्रादुर्भावस्य प्राप्तिर्यस्मात् स भर्गः। अथवा भर्गस्तेजः। यथा

भवगद्वाक्यम्– न तद् भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ (गी. १५।६)। (यः) (नः) अस्माकं (धियः) ध्-धीः प्रजाशक्तिः, इः मनः, यः प्राणः स् मानसः सूर्यः तेषां समूहः। धियः नपुंसके, द्वितीयाविभक्तेरेकवचनान्तम् (तत्) (प्रचोदयात्) प्रकर्षेण प्रेरयेत् प्रेरयति वा। (तत्) सत्यज्ञानान्दस्वरूपं वेदान्तप्रतिपाद्यं ब्रह्म (धीमहि स्वात्मनि ध्यायाम इति ॥

सात्वतास्तु– वेदमाता गायत्री मुक्तकण्ठं भगवन्तं स्तौति-तत्सवितुरिति– (यः) कृष्णः (नः) अस्माकं (धियः) बुद्धीः कुमार्गान्निवर्त्य गीतोपदेशेन सन्मार्गे (प्रचोदयात्) प्रेरयति प्रवर्तयति। तं (धीमहि) ध्यायेम इतिसम्बन्धः। लिङ्गव्यत्ययश्छान्दसः। कीदृशं (सवितुः) सूर्यस्य (वरेण्यं) कन्यावरत्वेन अङ्गीकरणीयम्। तपनतनया कालिन्दी कृष्णेन परिणीता इति हि पौराणिकी कथा। (भर्गः) भ्राष्ट्रे निक्षिप्तचणकादिवत् 'नरकमुरादिरक्षोवृन्दभर्जकम्'।

रामपक्षे आदर्शचरितेन सन्मार्गप्रवर्तकं (सवितुः) सूर्यस्य (वरेण्यं) स्ववंशकीर्तिवर्धकत्वात् स्पृहणीयं निःसीमस्नेहास्पदं (भर्गः) रावणादिदुर्दान्तदैत्यभर्जकम् इत्यवसेयम्।

तथा च भगवतस्तत्प्रतिपाद्यत्वे समास्थिते अन्येषां समेषां वेदमन्त्राणां भगवत्परत्वमवश्यमास्थेयं 'पुत्राः मातुरनुहरन्ति' इति न्यायात्। अतएव 'यस्मिन्' विश्वानि काव्या (ऋ.सं. ८।४१।६) 'सर्वे वेदाः यत्पदमामनन्ति' (कठोप० २।१५) 'वेदैश्च सर्वैरहमेव वेद्यः' (गीता (१५।१५) इति च वर्णितं सर्ववेदवेद्यत्वं निष्प्रत्यूहं सिद्ध्यति इति भावः।

[1]"परि ते दूडभो रथोऽस्माँ अश्नोतु विश्वतः।
येन रक्षसि दाशुषः॥ य. ३।३६॥"

आहवनीयोपस्थानम्

षट्त्रिंशयां कण्डिकायां 'परि ते' इति मन्त्रो ऋगात्मकः। अस्य वामदेव ऋषिः, निचृद्गायत्री छन्दः, अग्निर्देवता (शत. २, ३, ४, ४०; का. श्रौ. ४, १२, १०-११)।

हे अग्ने (ते) तव स्वभूतः (दूडभः) दुरपक्षय्यः। दभ्नोति इति वधकर्मसु पठितम् '(निघ. २, १९, १) दम्भु दम्भने, (१२७१) सौवादिकः परस्मैपदी। दुःखेन दम्भितुं हिंसितुं शक्यो दूडभः। 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा. ३, ३, १२६) इति 'खल्' प्रत्ययः। 'दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च" (पा. वा. ६, ३, १०९) इति भाष्यवार्तिकेन पूर्वपदस्य दुरो रेफस्य 'ऊत्वे' नकारलोपे ष्टुत्वे च रूपम् (रथः) रथो

१—ऋग्वेद ४, ९, ८।

रंहतेर्गतिकर्मणः, स्थिरतेर्वा स्याद् विपरीतस्य, रममाणोऽस्मिंस्तिष्ठतीति वा, रपतेर्वा, रसतेर्वा (निरु. ९, ११)। (अस्मान्) त्वां प्रपन्नान् यजमानान् (विश्वतः) सर्वदिक्षु (परि अश्नोतु) सर्वतो व्याप्नोतु। नः सर्वान् सर्वतोभावेन रक्षत्विति भावः। अशू व्याप्तौ (१२६५) सौवादिकः आत्मनेपदी। परस्मैपदत्वं छान्दसम्। (येन) स्वीयेन रथेन (दाशुषः) दानशीलान् हविर्दत्तवतो यजमानान् 'यजमानो वै दाश्वान्" (शत. २, ३, ४, ३८) इति श्रुतेः (रक्षसि) गोपायसीति देवयाजिनः।

अस्मिंश्चतुर्थे महोपस्थानानुवाके एकादशीं कण्डिकामारभ्य षट्त्रिंशीं यावत् षट्विंशत्यां कण्डिकासु मन्त्राणामष्टाविंशतिः। (११ तारभ्य१६ पर्यन्तम् ऋचः षट्, द्वाविंश्याम् ऋग् एका, त्रयोविंशीमारभ्य षड्विंशीं यावत् ऋचः चतस्रः, अष्टाविंशीम् आरभ्य षड्त्रिंशीं यावत् ऋचो नव, सर्वयोगे विंशतिः ऋचः। शेषाः१७,१८,१९,२०,२१,२२ कण्डिकासु(एकैको मन्त्रः), २७कण्डिकायां द्वौ मन्त्रौ, सर्वयोगे ८ मन्त्राः (ऋङ्मन्त्रयोः समुदिता संख्या २८)। तेषां आद्या नव मन्त्राः (एकादशीमारभ्य एकोनविंशीं यावत्)आहवनीयाग्न्युपस्थानाः। विंशी एकाविंशी च द्वे गवोपसर्पणे। द्वाविंश्याः प्रथमो मन्त्रो गवोपस्पर्शनः, अपरा ऋग् गार्हपत्याग्न्युपस्थाना, २३-२६ चतस्रः गार्हपत्याग्न्युपस्थानाः। सप्तविंश्यां द्वौ मन्त्रौ, प्रथमो गवोपसर्पणः,अपरो गवोपस्पर्शनः। २८-३६ कण्डिकासु आहवनीयग्न्युपस्थानम् इति क्रिया व्याख्याताः। संक्षेपतो महोपस्थाने कण्डिकाः २६, मन्त्राः २८ (तासु २० ऋचः,८ मन्त्राः) ५ मन्त्रा गवोपसर्पणा वा गवोपस्पर्शना वा, ५ ऋचः गार्हपत्याग्न्युस्थानाः, शेषाः १८ मन्त्रा आहवनीयाग्न्युपस्थानाः।

चतुर्षु अनुवाकेषु कण्डिकाः ३६, मन्त्राः ४६ (ऋचः २६)।

आत्मयाजिनस्तु— हे ब्रह्माग्ने ! (ते) तव (दूडभः) मन्त्रशास्त्रप्रक्रियया द ब्रह्मा ऊः विष्णुः डः शिवः भः भगवती तेषां समूहो दूडभो देवरूपोऽतएवानाधृष्यः (रथः) (अस्मान्) यजमानान् (विश्वतः) सर्वासु दिक्षु (पर्यश्नोतु) सर्वतो व्याप्नोतु। (येन) देवात्मना रथेन (दाशुषः) स्वात्माहुतिं दत्तवतः (रक्षसि) पासीति।

सात्वतास्तु—नरकापहृत-षोडशसस्रसङ्ख्याकाः राजन्यकुमार्यः श्रीकृष्णे युधिष्ठिरसाहाय्यार्थं द्वारिकातः इन्द्रप्रस्थं प्रस्थिते समाक्रान्तुः शाल्वात् त्रस्ता यदुनार्यश्च सविनयमाचक्षते स्वपरित्राणार्थं भगवदागमनं प्रतीक्षमाणाः-परि त इति।

(येन) रथेन (दाशुषः) आत्मनिवेदकान् त्वदर्पितसर्वस्वान् त्वां प्रपन्नान् प्राणिनः त्वं (रक्षसि) सः त्वदीयः (दूडभः) दुर्दम्भनीयः कुतश्चित् कदाचित् कथञ्चित् अनभिवनीयः। (अस्मान्) (विश्वतः) सर्वतः (पर्यश्नोतु) परिव्याप्नोतु, अस्मद् - दृष्टिपथमवतरतु, शीघ्र-

गामिना शत्रुभिरतिरस्करणीयेन रथेन समागत्य प्रपन्नपरित्राणैकजीवनव्रतेन रक्षणीयाः इति भावः।

(क्षुल्लकोपस्थानाऽनुवाकः)

अत्र १ सामान्येन गार्हपत्याहवनीययोरुपस्थानम्।
२ प्रवत्स्यतो गार्हपत्याग्न्युपस्थानम्।
३ प्रवत्स्यत आहवनीयाग्न्युपस्थानम्।
४ प्रवत्स्यतो दक्षिणाग्न्युपस्थानम्।

"भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः।
नर्य प्रजां मे पाहि शंस्य पशून्मे पाह्यथर्य पितुं मे पाहि ॥ य. ३।३७॥

सप्तत्रिंश्यां कण्डिकायां चत्वारो मन्त्राः। 'भूर्भुवः' इत्येकः क्षुल्लकोपस्थाने सामान्येन गार्हपत्याहवनीयोपस्थानः। अस्य ब्राह्मी उष्णिक् छन्दः। 'नर्य प्रजाम्' इति द्वितीयः प्रवासकाले गार्हपत्याग्न्युपस्थानः। 'शंस्य पशून्' इति तृतीयः प्रवासकाले आहवनीयाग्न्युपस्थानः। अथार्य इति चतुर्थो मन्त्रो दक्षिणाग्न्युपस्थानः परेषां त्रयाणांयजुश्छन्दः। चतुर्णामपि मन्त्राणां वामदेव ऋषिः, अग्नि- देवता (शत. २, ४, १, १–७; का. श्रौ. ३, १२, १२–१३)।

महोपस्थानेनाग्न्युपस्थानं सम्पन्नं, कृतमधुना क्षुल्लकोपस्थानविधयाऽग्न्युपस्थानेनेत्याशङ्कायाम् श्रुतिर् आह-'यद्वा अदो दीर्घमग्न्युपस्थानम् आशीरेव सा, आशीरियं, तदेतावत्यैवैतत् सर्वमाप्नोति तस्मादेतेनैवोपतिष्ठेत, एतेनैव न्वेव वयमुपचराम इति हि स्माहासुरिः' (शत. २, ४, १, २)। उक्तं महोपास्थनमप्याशीःप्रार्थनम्। इदं क्षुल्लकोपस्थानमप्याशीः-प्रार्थनम्। उभयोरुपस्थानयोः समानकार्यकारित्वे सर्वं प्राप्तव्यं फलमनेन लघुनोपस्थानेनैव यदि प्राप्यते कृतं बहुकर्तव्यतासाध्येन महोपस्थानेन। तस्मादेतेन लघुनोपस्थानेनैवाग्निरुपचरितव्यः। वयमपि लघुनैतेनैवोपस्थानेनोपचराम इत्यासुरिराचार्य आहेति श्रुत्यर्थः।

तस्मादनेन क्षुल्लकोपस्थानेन द्वावप्यग्नी गार्हपत्याहवनीयौ युगपद् उपतिष्ठते—हे अग्ने! त्वं (भूः) भूर्-व्याहृतिस्वरूपः, (भुवः) भुवर् व्याहृतिरूपः (स्वः) स्वर्-व्याहृत्यात्मकश्च। एवं व्याहृतित्रयात्मकत्वेन त्वं त्रिषु पृथिव्यन्तरिक्षद्युलोकेषु प्रतिष्ठित इति, 'भूरित्यृग्वेदात्, भुव इति यजुर्वेदात्, स्वरिति सामवेदात्' (ऐ. ब्रा. ५, ५, ७) इति श्रुतेस्तिसृणां व्याहृतीनां त्रयीसारत्वात् सत्यरूपत्वम्। व्याहृत्यात्मकाश्चाग्नयः सत्याः सत्यफलप्रसवा इति। (प्रजाभिः) पुत्रपौत्रबान्धवादिभिः (सुप्रजाः) स्वानुकूलशोभनप्रजोपेतः। शोभनाः

प्रजा यस्येति बहुव्रीहिसमासे 'नित्यमसिच्प्रजामेधयोः' (पा. ५, ४, १२२) इत्यनेनासिच्-प्रत्ययः। 'नञ्सुभ्याम्'(पा. ६, २, १७-१) इत्यन्तोदात्तश्च।(स्याम्) भवेयम्। प्रार्थनायां लिङ्। (वीरैः) पुत्रैः भ्रातृभिर्वा। (सुवीरः) शोभनवीरोपेतः, 'वीरवीर्यौ च' (पा ६, २, १२०)इत्यनेनोत्तरपदाद्युदात्तत्वम्। (स्याम्)। (पोषैः) पुष्टिसाधनैः, पुष्टिस्वरूपैर्वा गोहिरण्यधान्यादिभिः (सुपोषः) शोभनपुष्टिपदार्थान्वितः। बहुव्रीहिसमासे क्रत्वादित्वमाश्रित्य वा द्व्यच्कमाद्युदात्तमुत्तरपदं मत्वा वोत्तरपदाद्युदात्तत्वम्' (पा. ६. २, ११८, ११९) (स्याम्)।

यदि कदाचित् यजमानः प्रवसति ग्रामान्तरे नगरान्तरे वा सीमामतीत्य रात्रौ वसति अग्नीन् उपतिष्ठते। तत्र प्राग् गार्हपत्याग्निमुपतिष्ठते–(नर्य) नरेभ्यो हित नर्य, आमन्त्रितं पादादावाद्युदात्तम्। हे गृहस्थजनोपकारक ! (मे) मदीयां (प्रजां) सन्ततिं (पाहि) पालय। तत आहवनीयम् उपतिष्ठते-(शंस्य) हे प्रशंसनीयदीप्ते! आहवनीयाग्ने! 'शंसिदुहिगुहिभ्यो वा' (काशिका ३, १, १०९) इति विभाषया क्यपोऽभावपक्षे ण्यति रूपम्। 'तित्स्वरितम्' (पा. ६, १, १८५) इति प्राप्ते, 'ईडवन्दवृशंसदुहां ण्यतः (पा. ६, १, २१४) इत्याद्युदात्तत्वम्, (मे) मम (पशून्) गवादीन् (पाहि) गोपाय। अन्ते दक्षिणाग्निमुपतिष्ठते- (अथर्य) हे अतनवन् गतिशील दक्षिणाग्ने ! गार्हपत्यात् स्वस्थानं सदा दक्षिणाग्निर्गच्छतीत्यभिप्रायेणोक्तम्। अत सातत्यगमने (३८) भौवादिकः परस्मैपदी। अतनमथर् अतने अथरि साधुरथर्यः यत्प्रत्ययान्तः। अत्रामन्त्रितत्वात् पादादावाद्युदात्तत्वम्। (मे) मम (पितुम्) अन्नम् अन्ननामसु पाठात् (निघ. २, ७, ६)। (पाहि) रक्षेति देवयाजिनः।

आत्मयाजिनस्तु– भूतात्मोवाच– हे ब्रह्माग्ने ! त्वं (भूः भुव. स्वः) त्रिलोकीरूपो विराट्-स्वरूपश्चासि। (प्रजाभिः) प्राणैः 'प्राणः प्रजाः' (शत. १४, ४, ३, १४)। (सुप्रजाः) योगानुष्ठानयोग्यप्राणोपेतः (वीरैः) मन्त्रशास्त्ररूढ्या–व् प्राणस्तेन ईरैर् ईरितैरिन्द्रियैः (सुवीरः) जितैरिन्द्रियैः समन्वितः (पोषैः) योगैश्वर्यपुष्टिभिः (सुपोषः) सुपुष्टियुक्तो योगोपेतः (स्याम्) भवेयम्। (नर्य) हे नररूपजीवहितकारिन् परमात्मन् ! (मे) मम (प्रजां) प्राणं (पाहि) रक्ष। (शंस्य) हे स्तुत्य नारायण! (मे) मम (पशून्) इन्द्रियग्रामान् (पाहि) संसाराद् रक्ष। (अथर्य) जीवभावेन नरभावं प्रेप्सो परमात्मन्! (मे) मम (पितुम्) अन्नस्वरूपं देहं (पाहि) योगचर्यायां विघ्नकारकाद् अशनात् पाहीति।

सात्वतास्तु– चिरं प्रतीक्षमाणौ श्रुतदेवबहुलाश्वौ विप्रराजानौ वपुर्द्वयं गृहीत्वा युगपद् अकस्मात् स्वगृहमुपयातं यदुनाथमुपतिष्ठेते-भूर्भुवरिति :—

त्रीणि भूरादीनि सम्बोधनानि। (भूः) स्वयं भवनशीलः अन्येनानुत्पाद्यः, (भुवः)

भावयितः जगदुत्पादनार्थं परमाणुपुञ्जं संग्रहीतः, सर्वव्यापक वा 'भू' प्राप्तौ आत्मनेपदी। सर्वं जगद् आप्नोति व्याप्नोति इति निरुक्तेः। (स्वः) असुरोपतापक! 'स्वृ' शब्दोपतापयोः। यद्वा भूरादीनां त्रयाणां सम्भूयार्थः-सच्चिदानन्द-विग्रह परमात्मन्! (प्रजाभिः) स्वशासितजनैः विप्रपक्षे प्रजाभिः स्वसन्ततिपुत्रपौत्रादिभिः (सुप्रजाः स्यां) शोभनप्रजो भवेयम्। किञ्च (वीरैः) स्वानुचरैः सैनिकैः (सुवीरः) शोभनैर्योद्धृभिरुपेतः। विप्रपक्षे (वीरैः) इन्द्रियविजेतृभिः स्वशिष्यैः (सुवीरः) शोभनसंयतेन्द्रियच्छात्रः। (पोषैः) पुष्टिसाधनैः धनादिभिः (सुपोषः) शोभनपोषकधनादिभिर्युक्तः। (नर्य) नर्यः नरेभ्यो हितः नरहितकरः तत्सम्बोधने नरहितकारिन्! (मे) मम (प्रजां) जनताम्, विप्रपक्षे शिष्यपुत्रादिसन्ततिं (पाहि) रक्ष। (शंस्य) स्तुत्य (पशून्) गवादीन्, (अथर्य) 'अत सातत्यगमने' अतनम् सातत्येन गमनम्, तदर्हतीति अतन्यः तकारनकारयोः थरेफौ पृषोदरादित्वात्, तत्सम्बोधने अथर्य सदागामिन् भक्तत्राणार्थम्, (मे) मम (पितुं) शरीरादिरक्षाप्यायनादिसाधनान्नादिकलापम्। पितुरित्यन्ननाम (निरु. २।७।६) पा रक्षणे (अ. प. ११३२) तुप्रत्ययो बाहुलकादिकारः। प्यायतेः 'ओप्यायी वृद्धौ' (भ्वा. आ. ५२२) तुप्रत्ययो धातोः पिभावश्च इति देवराजः।

"आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम्।
अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्व॥" य. ३।३८॥

प्रत्यागतस्याहवनीयोपस्थानम्

अष्टत्रिंश्यां कण्डिकायां 'आगन्म विश्ववेदसम्' इत्येक एव मन्त्र आहवनीयाग्न्युपस्थानः। अस्यासुरिः ऋषिः, अनुष्टुप् छन्दः, आहवनीयाग्निर्देवता (शत. २, ४, १, ७-८; का० श्रौ० ४, १२, १७)।

प्रवासादेत्य समित्पाणिर्बान्धवान्तरमभाषमाणः प्रागाहवनीयाग्निमुपतिष्ठते। 'स आहवनीयमेवाग्र उपतिष्ठतेऽथ गार्हपत्यम्' (शत २, ४, १, ७) इति श्रुतेः। (अग्ने) हे आहवनीयाग्ने! पादादित्वात् आद्युदात्तत्वम्। (सम्राट्) सम्यग् राजते भ्राजते इति सम्राट्। राजृ दीप्तौ (८२२) भौवादिकः उभयपदी। 'सत्सूद्विष०' (पा. ३, २, ६१) इति कर्तरि क्विप् प्रत्ययः, 'मो राजि समः क्वौ' (पा. ८, ३, २५) इति मकारभावे रूपम्। हे भ्राजमानदीप्ते! त्वां वयम् (आ गन्म) प्रपन्नाः स्मः। 'आगमाम' इत्यस्य स्थाने छान्दसं रूपम्। कथंभूतं त्वाम् (विश्ववेदसम्) सर्वविदं सर्वधनं वा। विश्वं वेत्ति वेदयति वा विश्ववेदास्तम्। 'विदिभुजिभ्यां विश्वे' (उ. ४, २३७) इत्यनेन असिः प्रत्ययः पूर्वपदप्रकृतिस्वरत्वं च। यद्यपि विश्वशब्द आद्युदात्तः परन्तु 'बहुव्रीहौ विश्वं संज्ञायाम्' (पा. ६, २, १०६) इत्यनेन समासे पूर्वपदान्तोदात्तत्वमनुमोयते। अथवा विश्वं वेदो धनं यस्येति बहुव्रीहि-

समासे पूर्ववद् पूर्वपदस्यान्तोदात्तत्वम्, पुनः कीदृशम् (अस्मभ्यम्) यजमानानामस्माकं कृते (वसुवित्तमम्) वसूनि विन्दतीति वसुवित् पूर्ववद् कर्तरि क्विप्प्रत्ययः । अतिशयितः वसुवित् वसुवित्तमः । अनेकविधद्रव्यस्य लम्भयितारम्, एवंभूतस्त्वं (द्युम्नम्) अन्नं वा यशो वा । द्युत दीप्तौ (७४१) भौवादिक आत्मनेपदी । द्योतते प्रकाशते इति । 'द्युम्नं द्योततेयंशो वाऽन्नं वा' (निरु. ५,५) धनं वा, 'द्युम्नम्' इति धननामसु पाठात् निघ. २. १०, १३) द्यु अभिगमने (१०४०) आदादिकः परस्मैपदी इत्यतो निष्पत्तिं क्षीरस्वामी प्राहेति देवराजयज्वा । दिवं मनतीति द्युपूर्वकाद् 'म्ना' अभ्यासे इत्यतो निष्पत्तिमाह भानुजिदीक्षितः । (अभि) अभिलक्ष्य (आ यच्छस्व) उद्युङ्क्ष्व । यम उपरमे (९८४) भौवादिकः परस्मैपदी । 'आङो यमहनः' (पा. १, ३, २८) इत्यनेनाङ्पूर्वकाद् यच्छतेर् आत्मनेपदत्वं भवति । (सहः) बलम् । 'सहः इति बलनाम (निघ. २, ९, १७) । षह मर्षणे (८५२) भौवादिकः आत्मनेपदी । सहते अभिभवति शत्रूननेनेति करणे औणादिकोऽसुन्प्रत्ययः । नित्स्वरेणाद्युदात्तत्वं च । (अभि) अभिलक्ष्य (आयच्छस्व) उद्घुङ्क्ष्व । अस्माकमन्नलाभाय यशोलाभाय शक्तिलाभाय च सतत प्रयतस्वेति । अथवा आयच्छतिः स्थापनार्थः । 'अभि' इत्यस्य च 'आयच्छस्व' इति क्रियया सम्बन्धः । अस्मभ्यं धनं यशोऽन्नं वा अभ्यायच्छस्व स्थापय समर्पयेत्यर्थः, बलं वाभ्यायच्छस्व स्थापय समर्पयेत्यर्थः इति देवयाजिन :।

आत्मयाजिनस्तु—जीवात्मा ब्रवीति— (सम्राट्) हे त्रैलोक्याधिप ! (अग्ने) नारायण (विश्ववेदसम्) सर्वविदितारम् (वसुवित्तमम्) लक्ष्मीपतिं त्वाम् (अभि आगन्म) भक्तिभावनयाऽऽभिमुख्यं प्राप्ताः स्म (द्युम्नं) यशः (सहः) योगशक्तिम् (अस्मभ्यम्) (अभि) सर्वतः (आयच्छस्व) प्रदेहि इति ।

सात्वतास्तु—तौ तत्परिकरौ च सम्भूय उपतिष्ठन्ते-आगन्म इति । आगन्म आगच्छामः त्वां शरणं प्रपद्यामहे । विशिनष्टि- (विश्ववेदसम्) सर्वज्ञम् (अस्मभ्यम्) भवदुपासकेभ्यः (वसुवित्तमम्) अतिशयेन धनादिवसुनो लम्भकम् प्रापकम् 'विद्लृ लाभे' इत्यतो निष्पन्नम् । (अग्ने) तेजस्विन् ! (सम्राट्) निरंकुश-शासक भगवन् अन्ये राजानो माण्डलिकाः एव । भवानेव सर्वोपरि विश्वशासकत्वात् चक्रवर्ती भूपतिरिति भावः । (द्युम्नन्) अन्नं यशो वा (अभि) आभिमुख्येन (सहः) बलञ्च (अभि) आभिमुख्येन आयच्छस्व, आगमय, स्थापय वा । आयच्छतिरत्र स्थापनार्थः । अस्मभ्यं यशोऽन्नं वा प्रदेहि इति तात्पर्यम् ।

"अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ।
अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व ॥" य. ३।३९ ॥

गार्हपत्याग्न्युपस्थानम्

एकोनचत्वारिंश्यां कण्डिकायां 'अयमग्निः' इत्येक एव मन्त्रो गार्हपत्याग्न्युपस्थानः ।

अस्य आसुरिर्ऋषिः, न्यङ्कुसारिणी बृहती छन्दः, गार्हपत्याग्निर्देवता (शत. १, ४, १, ९; का. श्रौ. ४, १२, १७)।

आहवनीयमुपस्थाय प्रवासादागतो यजमानो गार्हपत्यमग्निमुपतिष्ठते— (अयम्) प्रार्थ्यमानः (गार्हपत्यः) गार्हपत्याख्यः (अग्निः) (गृहपतिः) गृहस्य आयतनस्य पतिः पालकः। षष्ठीसमासे 'पत्यावैश्वर्ये (पा ६, २, १८) इत्यनेन पूर्वपदस्य प्रकृतेर् गृहशब्दस्यान्तोदात्तः स्वरः प्रतिष्ठते। गृहपतित्वादेव गृहे वर्तमानायाः प्रजायाः पुत्रपौत्रादिसंततेः (वसुवित्तमः) अतिशयेस वित्तस्य लम्भयिता। यतस्त्वमुक्तगुणोऽसि तस्माद् (गृहपते) (अग्ने) अस्माकं (द्युम्नम्) अन्नं यशो धनं वा (अभि) अभिलक्ष्य (आयच्छस्व) प्रयतस्व। (सहः) बलम् (अभि) अभिलक्ष्य (आयच्छस्व)। यद्वा 'अभि' इत्युपसर्गस्य 'आयच्छस्व' इति क्रियया सम्बन्धः पूर्वमन्त्रे उक्तः इति देवयाजिनः।

आत्मयाजिनस्तु— भूतात्मा जीवात्मानमभ्यर्थयते (अयं गार्हपत्यः) क्षेत्रज्ञरूपः (अग्निः) जीवः (गृहपतिः) क्षेत्रपतिः (प्रजायाः) प्राणभूतायाः सन्ततेर् अनुग्राहकः तथा (वसुवित्तमः) इन्द्रियरूपवित्तस्यातिशयेन लम्भकः। (गृहपते अग्ने) (द्युम्नं) शमादिरूपं धनम् (अभि) सर्वतः (आयच्छस्व) देहि (सहः) बलम् (अभि आयच्छस्व) इति।

सात्वतास्तु—पुनराह 'अयम्' इति। पुरस्ताद् वर्तमानः (गृहपतिः) गृहस्य सर्वनिवासस्य ब्रह्माण्डस्य पतिः पालकः। अग्निः वैश्वानरोऽग्निः- अतिथिरिति यावत्। वैश्वानरः प्रविशति अतिथिर्ब्राह्मणो गृहान् (कठोप० १।६) इतिश्रुतेः। जलमाहरन्त्वनुचराः, पादप्रक्षालनादिभिरेव श्रीकृष्णः सत्करणीय इतिभावः। कीदृशः (गार्हपत्यः) गृहपतीनामस्माकं गृहस्थानां अनुकम्पकः निजागमनेन इत्यर्थः। प्रजायाः जनतायाः (वसुवित्तमः) अतिशयेन धनादिप्रापकः। उत्तरार्धं व्याख्यातपूर्वम्।

"अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः।
अग्ने पुरीष्याभि द्युम्नमभि सह आ याच्छस्व॥" य. ३ ॥४०॥

दक्षिणाग्न्युपस्थानम्

अस्यां चत्वारिंश्यां कण्डिकायाम् 'अयमग्निः पुरीष्य' इति मन्त्र एक एव। अस्य आसुरिर्ऋषिः, निचृदनुष्टुप् छन्दः, दक्षिणाग्निर्देवता। (का. श्रौ. ४, १२, १७)।

आहवनीयं गार्हपत्यं चोपस्थाय दक्षिणाग्निमुपतिष्ठते–(अयम्) उपस्थीयमानः (अग्निः) दक्षिणाग्निः (पुरीष्यः) पशव्यः 'पशवो वै पुरीषम्' (शत. ७, ५, १९) इति श्रुतेः। पुरीषेभ्यः पशुभ्यो हित इति तस्मै हितमित्यर्थे यत्प्रत्ययः। 'तित् स्वरितम्' (६, १, १८५)

इत्यनेन स्वरितत्वम् । पुनः कीदृशः (रयिमान्) रयिः इति धननाम (निघ. २, १०, ८) धनवान् । (पुष्टिवर्धनः) पुष्टेः धनधान्यादिसमृद्धेः शरीरस्वास्थ्यस्य च वर्धयिता । (पुरीष्य अग्ने) हे पशव्य दक्षिणाग्ने (अभिद्युम्नम् अभि सह आयच्छस्व) इति व्याख्यातम् इति देवयाजिनः ।

पञ्चमे क्षुल्लकोपस्थानानुवाके सप्तत्रिंशीमारभ्य चत्वरिंशीं कण्डिकां यावत् सप्त मन्त्रा (सप्तविंश्यां ४ अन्यत्र एकः एकः) तेषु प्रथमे गार्हपत्याहवनीययोः सामान्येनोपस्थानम्, द्वितीये प्रवत्स्यतो गार्हपत्याग्न्युपस्थानम्, तृतीये प्रवत्स्यत आहवनीयाग्न्युपस्थानम्, चतुर्थे प्रवत्स्यतो दक्षिणाग्न्युपस्थानम्, पञ्चमे प्रवासादागतस्याहवनीयोपस्थानम्, षष्ठे प्रवासादागतस्य गार्हपत्याग्न्युपस्थानम्, सप्तमे प्रवासादेत्य दक्षिणाग्न्युपस्थानम् इति क्रिया व्याख्याताः । पञ्चस्वनुवाकेषु चत्वारिंशतः कण्डिकानां समुदिता मन्त्रसंख्या ५३ (येषां २६ ऋचः) ।

आत्मयाजिनस्तु—भूतात्मा नरं प्रार्थयते—(अयम् अग्निः) नराणामुत्तमो नरः (पुरीष्यः) जीवानां हितः (रयिमान्) योगसंपत्तिशाली (पुष्टिवर्धनः) तं याचे । (पुरीष्य) हे पुरीषाणां जीवानां हितचिन्तक ! (अग्ने) नर ! (द्युम्नं) योगसम्पदम् (अभि) सर्वतः (आयच्छस्व) देहि (सहः) योगक्रियासामर्थ्यम् (अभि) सर्वतः (आयच्छस्व) देहीति ॥

सात्वतास्तु— पुनः प्रार्थयते—अयमग्निरिति । (अयं) पुरस्ताद् वर्तमानः (अग्निः) अस्माकमतिथिः तद्वत् पाद्यार्घ्यादिजलेन शमनीयत्वात् । (पुरीष्यः) पिपर्ति जगद् इति पुरीषः 'पॄ' 'पालनपूरणयोः' ततः शॄपॄभ्यां किच्च (उ० ४।२७) इत्यौणादिक ईषन् प्रत्ययः । पुरीष एव पुरीष्यः छान्दसत्वात् स्वार्थिको यत् । (रयिमान्) रयिर्धनादिः स दातव्यत्वेन विद्यते यस्य सः (रयिमान्) बहुधनादिप्रदाता । भूम्नि मतुप् । (पुष्टिवर्धनः) पुष्टिः मानसी सद्विचारसम्पत्तिः तस्या वर्धकः । सद्विचारादिपोषकः । उत्तरार्धं व्याख्यातपूर्वम् ।

जगत्पालको ब्रह्माण्ड-स्वामी, बहुवैभवप्रदाता, सद्विचारततिपोषकः, निरङ्कुशशासकः, स्वभक्तवत्सलः, श्रीकृष्णः परमात्मा अस्मान् अनुग्रहीतुम् अतिथिः सन् अस्मद्-गृहं निजागमनेन समलङ्कुरुते । किमतोऽधिकं सौभाग्यमकारणकरुणावरुणालयः कल-कलाप-सनाथः त्रिलोकीनाथः परःसहस्रजन्मानुष्ठितसाधनैर्योगिभिरपि दुरापः शं नः, सप्रणयं सादरमालपन्नयनसदनातिथ्यं भजते । दीनदयालुत्वमेवात्र हेतुरिति भावः ।

गृहोपस्थानाऽनुवाकः

"गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि ।
ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ॥ य० ३।४१

गृहोपस्थानम्

एकचत्वारिंश्यां कण्डिकायां 'गृहा मा बिभीत' इत्येक एव मन्त्रः। अस्य आसुरिर्ऋषिः, आर्षी पङ्क्तिश्छन्दः,वास्तुपतिरग्निर्देवता(उव्वटमहीधरौ तु एकचत्वारिंशीम् आरभ्य तिसृणां कण्डिकानां शंयुर्ऋषिः, विराट्त्रिष्टुप्छन्दः, वास्तुपतिर्देवता इत्याहतुः)। (शत० २, ४, १, १४; का० श्रौ० ४, १२, २१)।

'अथातो गृहाणामेवोपचारः एतद्ध वै गृहपतेः प्रोषुषः किंवा करिष्यतीति, स यो ह तत्र किंचिद् वदति वा करोति वा तस्माद् गृहाः प्रत्रसन्ति, तस्येश्वरः कुलं विक्षोब्धोः। अथ यो ह तत्र न वदति न किंचन करोति तं गृहा उपसंश्रयन्ते (शत० २, ४, १, १४) इति श्रुतेः। प्रवासादेत्य यजमानो गृहान् उपतिष्ठते—(गृहा) मन्त्रादावामन्त्रितमाद्युदात्तं भवति। हे गृहाः! (मा) नैव (बिभीत) भीतिं कुरुध्वम्। गृहपतिर्यजमानः क्व गतोऽयं च योऽपरिचितः कुत आगत इत्याशङ्कां मा कार्ष्ट। ञिभी भये (१०८४) जौहोत्यादिकः परस्मैपदी। (मा) नैव (वेपध्वम्) कम्पध्वम्। टुवेपृ कम्पने (३६७) भौवादिकः आत्मनेपदी। (ऊर्जम्) अन्नादिसमृद्धिं (बिभ्रतः) धारयमाणान् युष्मान् प्रति। डुभृञ् धारणपोषणयोः (१०८७) जौहोत्यादिकः उभयपदी। अस्माल्लटः शत्रादेशे 'अभ्यस्तानामादिः' (पा. ६, १, १८९) इत्याद्युदात्तत्वम्। (एमसि) आ इमः. प्रवासाद् आगच्छामः। 'इदन्तो मसि' (पा. ७, १, ४६) इतीदन्तादेशः 'अस्मदो द्वयोश्च' (पा. १, २, ५९) इति विभाषया बहुत्वम्। ऊर्जमन्नादि बिभ्रतो (वः) युष्मान् (गृहान्) प्रति अहं गृहपतिरपि (ऊर्जम्)। अन्नादिसमृद्धिं (बिभ्रत्) धारयन् (सुमनाः) प्रसन्नचेतस्कः (सुमेधाः) सद्बुद्धियुक्तः। शोभना मेधा बुद्धिर्यस्येति बहुव्रीहिसमासे 'नित्यमसिच्प्रजामेधयोः' (पा. ५, ४, १२२) इत्यसिच् प्रत्ययः। (मनसा) चेतसा (मोदमानः) प्रसीदन् हृदयाह्लादान्वितः (ऐमि) आगच्छामीति देवयाजिनः।

आत्मयाजिनस्तु— भृकुटिप्रदेशं सुषुम्णामार्गेण गच्छन् आह– (गृहाः) हे इन्द्रियमनोबुद्धिस्वरूपा गृहाः। यूयं (मा बिभीत) जीवात्मा युष्मांस्त्यक्ष्यतीति भियं मा श्रयत (मा वेपध्वम्)। (एमसि) मन्त्रशास्त्ररूढ्या एः प्राणवायुः, म् ब्रह्मा, अः विष्णुः सः शिवः इति त्रिदेवरूप आत्मा तयोर्मध्ये (ऊर्जम्) इन्द्रियसामर्थ्यस्वरूपम् अन्नं (बिभ्रतः) धारयन्तः। (सुमनाः सुमेधाः) (मनसा) 'मनो वै ब्रह्म' (शत. १४, ६, १०) तेन मनसा (मोदमानः) ब्रह्मानन्दसम्पन्नः (ऊर्जम्) आनन्दरसं (बिभ्रत्) धारयन्नहमपि (वः) गृहान् (ऐमि) आगच्छामीति।

सात्वतास्तु— युधिष्ठिरसमाहूतो भगवान् राजसूययागे तत्साहाय्यार्थम् इन्द्रप्रस्थं जगाम। तदा लब्धावसरः प्रतिपक्षाग्रणीः शाल्वः भगवत्पुरमाचक्राम। राजसूये निर्वृत्ते

शिशुपाले च निहते अतिघोरनिमित्तदर्शनेन सञ्जातद्वारिकावास्तव्यविपदाशङ्काः कुरुवृद्धेभ्यो मुनिभ्यः ससुतायाः कुन्त्याश्च लब्धानुमतिः प्रत्यावर्त्य स्वपुरीं तत्रत्यान्नरान्नायंश्च शाल्वाक्रमणत्रस्तमनसः सान्त्वयन् आह—गृहा मेति । गृहशब्दो नगरगृहवासिनो लक्षणया आचष्टे । गृहशब्दो बहुवचनान्तः दारवाचको वा । पुरुषानपेक्ष्य नारीगणस्य हृदयं अतितरां बिभेतीत्यभिप्रायेण ता एव वा सम्बोध्यन्ते । (गृहाः) अस्या नगर्याः नागरिकाः नरनारीगणाः, अपि वा गृहदारा नार्यो वा बहुवचनान्तगृहशब्दः पुंसि दारवचनः इति कोशसमयः । (मा बिभीत) न त्रस्यत (मा वेपध्वम्) त्रासेन न कम्पध्वम् । किं तर्हि (ऊर्जम्) बलम् (बिभ्रतः) धारयन्तः तिष्ठतेति शेषः, सबलहृदया भवतेति यावत् । यद्वा (बिभ्रत) धारयत बिभर्तेः छान्दसम् (एमसि) एम आगच्छामः युष्मद्रक्षणार्थं वयं सर्वे समायाताः । मा कुरुत प्रतिपक्षिणः शाल्वस्य शौर्याशङ्काम्, ततोऽप्यधिकम् ऊर्जं बलं पराक्रमं बिभ्रत् धारयन् अहं साग्रजः अतिशूरैः अन्यैश्च यदुभिरुपेतः (वः) युष्मान् गृहान् गृहवासिनो जनान् दारानिति वा ।(ऐमि) रक्षितुमागच्छामि उपजातोऽहं रक्षणायालं त्रासेनेति भावः । (सुमेधाः) शोभना मेधा अविस्मृतिहेतुः सततं भवत्स्मरणक्षमा मनोवृत्तिर्यस्य तादृशः प्रतिक्षणं युष्मान् चिन्तयन् निरन्तरं ध्यायन् स्नेहातिरेकात् । यद्वा मेधा इति धननाम (निघण्टु २।१०।३२) अत्र देवराजः 'मेधा' मिधृ मेधृ सङ्गमे च(८६८,८७७भ्वा० उ०)चकारात् हिंसामेधयोश्च । मिधिः सङ्गत्यर्थः इति माधवः । ततो घञ् । सङ्गच्छतेऽनेन सर्वं तद्वता, हिंस्यते वा तद्वान् चौरादिभिः, 'घ्नन्ति चैवार्थकरणात्' इति महाभारतम् । यद्वा मतौ धीयते अर्जियतव्यं रक्षियतव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते । तत्र मतिशब्द उपपदे धाधातोः घञर्थे कविधनम् (३।३।५८ वा) इति कः । पृषोदरादित्वात् (६, ३, १०९) मतिशब्दस्य मेभावः इति । तथा च सुष्ठु शत्रुपराजयकृत् मेधा लोकोत्तरयुद्धसामग्रीरूपशस्त्रादिलक्षणं धनं यस्य तादृशः । शस्त्रमेव शस्त्रभृतां धनमिति भावः (सुमनाः) शोभनमनाः युष्मासु स्निग्धहृदयः । मदनुपस्थितावपि प्रद्युम्नादिभिः शाल्वस्य सेनापतिर्द्युमान् सकला च सेना विनाशितेति वृत्तान्तश्रवणेन मनसा मोदमानः हृष्टचेताः शौर्यातिरेकेण यदूनामिति भावः । वृत्तान्तश्चायं (भाग० १०।७७) अध्याये सविस्तृतं निरूपितं तत एवावसेयम् ।

"येषामध्येति प्रवसन्येषु सौमनसो बहुः ।
गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥" य. ३।४२ ॥

गृहोपस्थानम्

द्विचत्वारिंश्यां कण्डिकायां 'येषामध्येति' इति मन्त्रो गृहोपस्थानः । अस्य शंयुर्ऋषिः, अनुष्टुप् छन्दः, वास्तुपतिरग्निर्देवता । (का. श्रौ ४, १२, २१) ।

(प्रवसन्) प्रवासं कुर्वाणः, देशान्तरे वसन् गृहपतिः (येषाम्) गृहाणाम् (अध्येति) स्मरति। इक् स्मरणे (१०४७) आदादिकः परस्मैपदी। अयं नित्यमधिपूर्वः। 'अधीगर्थ-दयेशां कर्मणि' (पा. २, ३, ५२) इत्यनेन येषामिति षष्ठी। (येषु) गृहेषु प्रवासी जनः (बहुः) अत्यधिकः (सौमनसः) सौमनस्ययुक्तः। सुष्ठु मनो यस्य सुमनाः, सुमनसो भावः सौमनस्यं, भावेष्यञ्प्रत्ययः। सौमनस्यम् अस्त्यस्येति मत्वर्थे 'अर्श आदिभ्योऽच्' (पा, ५, २, १२७) इत्यनेनाचि प्रत्यये छान्दसो यलोपः। चित्वादन्तोदात्तत्वम्। यद्वा सुष्ठु मनः सुमनः, तस्येदमित्यर्थेऽण्प्रत्ययः। (गृहान्) तान् गृहपतिस्मर्तव्यान् गृहान् (उपह्वयामहे) सादरं आह्वयामः। (ते) गृहाः (जानतः) इमे नो गृहा न परकीया इति प्रत्यभिज्ञावतः (नः) अस्मान् (जानन्तु) परिचिन्वन्तु इति देवयाजिनः।

आत्मयाजिनस्तु— प्राणजीवेशा वदन्ति- (प्रवसन्) समाधिं कुर्वाणः (येषाम्) मनोबुद्धीन्द्रियालयानाम् (अध्येति) व्युत्थानावस्थायां स्मरति। (येषु) इन्द्रियालयेषु (बहुः सौमनसः) ऋत्विग्रूपत्वेन तेषां प्रीत्यतिशयः, यथा श्रुतिः- 'आत्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजः' (शत. ९, ४, २, १६) तान् (गृहान्) इन्द्रियालयान् (उपह्वयामहे)। (ते) (जानतः) सर्वज्ञान् (नः) अस्मान् (जानन्तु) इति।

सात्वतास्तु— स्नेहातिरेकं प्रकटयति—येषामिति —

(प्रवसन्) देशान्तरं गतो दूरेऽवस्थितोऽपि (येषां) यान् भवतः कर्मणि षष्ठी अध्येति स्मरति 'इक्' स्मरणे अधिपूर्वः। (अदादि.१०४७) अयं सुहृज्जनः श्रीकृष्णाख्यः। विनयातिरेकप्रदर्शनार्थं प्रथमपुरुषैकवचनम्। अपिवा तृतीयचरणे उपह्वयामहे इति उत्तमपुरुष-बहुवचनदर्शनात् तदनुरोधेन अध्येति इत्यस्य अधीमः सततं स्मरामः इत्यर्थः। पुरुषवचन-व्यत्ययः छान्दसः। मया यूयं विस्मृता इति स्वप्नेऽपि न भ्रमितव्यमिति भावः। अस्मिन् प्रवसन्निति एकवचनान्तं पदं प्रवसन्तः इति बहुवचनेन परिवर्तनीयं (येषु) भवत्सु (सौमनस) सुमनसो भावः प्रीत्यतिरेकः, (बहुः) महान्। अतः (गृहान्)युष्मान् गृहशब्दार्थो व्याख्यातः। (उह्वयामहे) आह्वयामः आहूय सादरं सप्रणयमालपामः। (ते) गृहाः भवन्तः (जानतः) स्वेषु स्नेहातिरेकात् सततं स्मरतो ध्यायतश्चिन्तयमानान् (नः) अस्मान् (जानन्तु) अनुभवन्तु। क्षणमेकमपि अस्माभिर्यूयं न विस्मृताः किमुत बहुकालमिति भावः।

"उपहूता इह गाव उपहूता अजावयः।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।
क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः॥" य: ३।४३॥

१—गृहोपस्थानम् २—गृहप्रवेशः

त्रिचत्वारिंश्यां कण्डिकायां द्वौ मन्त्रौ। 'उपहूता इह गावः' इत्येको मन्त्रः। 'क्षेमाय वः' इत्यपरः। अनयोः शंयुर्ऋषिः। प्रथमस्य भुरिग्जगती छन्दः, अपरस्य यजुश्छन्दः, वास्तुपतिरग्निर्देवता (का. श्रौ. ४, १२, २१-२२)।

(इह) अत्र (नः) अस्माकं (गृहेषु) भवनेषु (गावः) सवत्साः धेनवः (उपहूताः) आमन्त्रिताः। दोग्ध्र्यो धेनवः सवत्सा मम सद्मनि वर्धन्तामित्येवमभ्यनुज्ञाताः। (अजावयः) अजाश्च अवयश्च तेषां द्वन्द्वे 'समासस्य' (पा. ६, १, २२३) इत्यन्तोदात्तत्वम्। (उपहूताः) (अथो) अपि च अथ-उ इत्यनयोर्निपातयोः समुच्चयः (अन्नस्य कीलालः) कीलालम् इत्यन्ननामसु पाठात् (निघ. २, ७, २७) पुनरुक्तिर्न प्रतीयेतेति प्रकृते कीलालशब्दोऽन्नरसवाची। अन्नसम्बन्धी षड्विधो रसः (उपहूतः) आमन्त्रितः। अहं मम गृहे अनेकान् गवाजाविप्रभृतीन् पशून् आह्वयामि षड्रसमन्नं च सर्वदा समृध्यमानं गृहे मदीये आमन्त्रयामीति भावः।

एवं गृहान उपस्थाय सहर्षं गेहं प्रविशति (वः) युष्मान् गृहान् (क्षेमाय) प्राप्तस्य पदार्थस्य रक्षा क्षेमः तस्मै गृहवस्तुरक्षणाय (शान्त्यै) सर्वविधानिष्टपरिहाराय च (प्रपद्ये) प्राप्नोमि, युष्मासु प्रविशामीत्यर्थः। (शंयोः) शं कल्याणमिच्छतः कल्याणयुक्तस्य वा 'इदंयुरिदं कामयमानः'। अथापि तद्वदर्थे भाष्यते वसूयुरिन्द्रो वसुमानित्यर्थः (निघ. ४, ३, ३१) इति यास्कवचनात्। शमिति सुखनामसु पठितम् (निघ. ३, ६, १९)। 'कंशंभ्यां बभयुस्तितुतयसः' (पा. ५, २, १३८) इत्यनेन शंशब्दात् मत्वर्थे युस्प्रत्ययः। पुनरुक्तिरादरार्था। (शिवं शग्मम्) द्वे अपि सुखनामनी (निघ. ३, ६, १२, १८) सुखमपि द्विविधम्। ऐहिकम् आमुष्मिकं च। तद् द्वाभ्यां सहाम्नाताभ्याम् सुखनामभ्यां युगपद् ऐहिकं पुत्रदारादिसुखम् आमुष्मिकं स्वर्गसुखं च कामयत इति देवयाजिनः।

अस्मिन् षष्ठे गृहोपस्थानेऽनुवाके तिसृषु कण्डिकासु चत्वारो मन्त्राः। तत्राद्यैस्त्रिभिर्मन्त्रैर्गृहोपस्थानम्। त्रिचत्वारिंश्याः कण्डिकाया द्वितीयेन मन्त्रेण च गृहप्रवेशः। षट्सु अनुवाकेषु त्रिचत्वारिंशति कण्डिकासु समुदिता मन्त्रसंख्या ५७।

आत्मयाजिनस्तु—(इह) उत्थानदशायां (नः) अस्माकं (गृहेषु) शरीरावयवेषु (गावः) कर्मभक्तिज्ञानप्रकाशिकाः बुद्धिवृत्तयः (उपहूताः) सांनिध्यं गमिताः। (अजावयः) अज आत्मा तस्यावयः अवानि रक्षकाणि ज्ञानेन्द्रियाणि (उपहूताः) सांनिध्यं प्रापिताः। (अथ) तथा (अन्नस्य कीलालः) अन्नसम्बन्धी रसविशेषः सकर्मेन्द्रियो भूतात्मा (उपहूतः) चिद्वशं गमितः। हे देहाङ्गानि! (क्षेमाय) तपसो रक्षणाय (शान्त्यै) शमार्थं च (वः) युष्मान् (प्रपद्ये) प्राप्तोऽस्मि। (उ) हे विष्णो अथवा हे योगेश्वर शम्भो! (शंयोः) शं योगैश्वर्यसुखं

कामयत इति शंयुरारुरुक्षुः तस्य (शिवं) कल्याणम् (शंयोः) शं कैवल्यमोक्षं कामयत इति शंयुः योगारूढस्तस्य (शग्मम्) मोक्षसुखं भूयादिति शेषः इति ।

सात्वतास्तु—मनसा मोदमानः(य.३०।४१) इत्युक्तं तदेव विवृणोति उपहूता इति ।(इह) अस्मिन् नगरे (नः) अस्माकं (गृहेषु) निवासिषु भवनेषु (गावः अजावयश्च उपहूताः) आनीताः, इतस्ततः समानीय संगृहीताः । (अथो) अपि (अन्नस्य) भक्षणीयस्य वस्तुजालस्य विविधभोज्यसमूहस्य (कीलालः) दर्शनमात्रेण लालायितान्नपयोदधिनवनीतघृतादि-लक्षणसारभूतो रसः । (उपहूतः)आनीय संगृहीतः । पशुधनं कृत्स्नं भोग्य - सामग्री च यथा-पूर्वमेव अवस्थिते । अस्मन्नगरं शत्रवो न लुण्ठितुम् अशक्नुवन्, यदुवीरैः अभिद्राविताः । अस्माकं किमपि शत्रुभिर्नापहृतं, यदुवीरैः शौर्यातिरेकेण रक्षितं यथापूर्वमेवालोक्यते । तदेव मे मनसः अतीव मोदकारणमिति भावः । गतः भीतिसमयः, पराजितप्रायाः शत्रवः, निहतो द्युमान् सेनापतिः प्रद्युम्नेन, सेना प्रायः पलायिता विनष्टा च, शिष्यते नराधमः शाल्व एव एकः, अधुनैव गत्वा सौभविमानसहितं तं सपदि विनाशयिष्यामि । यमः प्रतीक्षते तदा-तिथ्यायेति बहुधा सान्त्वयन् आचष्टे-क्षेमाय इति । (क्षेमाय) अवस्थितपूर्वसमस्तवस्तु-संरक्षणाय, लब्धस्य संरक्षणं क्षेमः, (शान्त्यै) शत्रूणाम् उपद्रवनिवारणाय च (वः) युष्मान् (प्रपद्ये) साग्रजः प्राप्नोमि एकवचनं पूर्ववत् विनयातिरेकसूचनाय । अहं ममाग्रजो बलरामः अन्ये च मया सार्धं इन्द्रप्रस्थे गता यदुप्रवीराः वयं सर्वे पुरो रक्षणाय शत्रुनिहननाय च भवत्समीपमागताः । अतो न भेतव्यं सम्प्रति । (शंयोः) एकत्वमतन्त्रम् । सुखं कामयमा-नानाम् अस्माकमतिशीघ्रं शिवं कल्याणं मनस्त्रासविध्वंसनम् तथा (शग्मम्) शत्रुविजय-जनितं सुखमानन्दः हर्षातिरेकश्च सद्यो बोभवीतु, शंयोरिति प्रमोदातिरेकसूचनाय। शर्ममिति सुखनाम (निघ० ३।६।१२) शग्मम् शं शब्दे उपपदे गमेः 'गेहे कः' (३।१।१४४) इति कः। गमहनेत्युपधालोपः (६४६८) । पृषोदरादित्वात् शमो मलोपः । सुखं गम्यतेऽनेन दुष्कृतादि-शमनेन वा । यद्वा शकेः 'युजितिजिरुजां कुश्च (उ० १।१४३) इति बाहुलकात् मक्प्रत्ययः ककारस्य गकारश्च । शक्नोति तृप्तिं जनयितुमिति देवराजः ।

केचिदास्तिकधौरेयाः (गावः) वेदवाचः वेदा इति यावत् । (अजावयः) अजन्ति गच्छन्ति जनानुपदेश्यान् इत्यजा विद्वांसः अवेर्बहुवचने अवयः रक्षकाश्च ज्ञानप्रदानसदाचारादि शिक्षणाभ्याम् । (अन्नस्य) जीवनहेतोः सामर्थ्यस्य, आनयति प्राणयति जीवयति इत्यन्नमिति अन्नशब्दव्युत्पत्तेः । (कीलालः) कीलः बाधकः 'कील बन्धने' तस्यालः बाधकः 'अलं भूषण-पर्याप्तिवारणेषु' जीवनशक्तिविनाशकविनाशकः । (समाहूताः) आनीताः, ते समेऽपि तिष्ठन्तु इति शेषः (क्षेमाय) लब्धसंरक्षणाय (शान्त्यै) अनिष्टनिवारणाय च (वः) युष्मान् प्रपद्ये प्राप्नोमि । भद्रदत्तज्ञानेन (शिवं) शान्तं सर्वविकाररहितं निर्विकारं ब्रह्मतत्त्वं प्राप्तं

भवतु। किञ्च (शम्मम्) तत् सुखं निरतिशयानन्दलक्षणं भूयात् (शंयो) सुखकामानाम-स्माकं समेषाम्। पदाभ्यासः समादरसूचक इति।

वरुणप्रघासाऽनुवाकः

"प्रघासिनो हवामहे मरुतश्च रिशादसः।
करम्भेण सजोषसः॥" य. ३।४४॥

पत्नीवाचनम्

चतुश्चत्वारिंश्यां कण्डिकायां 'प्रघासिनो हवामहे 'इत्येको मन्त्रः। अस्य प्रजापतिर्ऋषिः, गायत्री छन्दः, मरुतो देवताः, (शत. २, ५, २, १-२१; का. श्रौ. ५, ५, ९)।

चतुर्षु चतुर्षु मासेषु क्रियमाणानि चत्वारि पर्वाणि चातुर्मास्यप्रयोगाख्यानि वैश्वदेव-वरुणप्रघाससाकमेध-शुनासीरीयसंज्ञकानि। 'चातुर्मास्यप्रयोगः फाल्गुन्याम्' (का. श्रौ ५, १, १) इति कात्यायनोक्तेः फाल्गुन्यां पौर्णमास्यामस्य प्रारम्भः। अत्र तावत् द्वितीयं पर्व वरुणप्रघासाख्यमुपक्रमते। आषाढपूर्णिमायां वरुणप्रघासाख्यं कर्म प्रयुज्यते। वरुणप्रघासयाग-महिम्ना पुरा प्रजापतिः प्रजाः ससर्ज। ताः क्षुधार्त्ता वरुण्यान् यवान् भक्षितवत्यः। वरुण्यानां यवानां प्रघासेन भक्षणेन प्रजा वरुणप्रघासाः सम्पन्नाः। वरुणस्ता निजग्राह। वरुणगृही-तास्ताः प्राणत्योऽपि व्यापारान्तरं कर्तुमसमर्था निष्क्रियाः शिश्यिरे। प्रजापतिरनेन वरुणप्रघासाख्यप्रयोगेण ता अभिषज्यत्। वरुणप्रघासाख्ययाऽनया भिषज्यया उपचरिताः प्रजा अनमीवा अजायन्त (शत. २, ५, २, १-४)। अस्मिन् वरुणप्रघासाख्ये द्वितीये पर्वणि दक्षिणोत्तरयोर्द्वयोर्वेद्योर् हवींषि आसादितानि भवन्ति। अतः प्रतिप्रस्थाता यजमानपत्नीं तदीयं पातिव्रत्यं पृच्छति। पत्न्या प्रश्ने समाहिते प्रतिप्रस्थाता तामेतं मन्त्रं वाचयति— (प्रघासिनः) प्रकर्षेण घस्यते भक्ष्यते इति प्रघासो हविः। घस्लृ अदने (७६१) भौवादिकः परस्मैपदी। कर्मणि घञ् प्रत्ययः। स प्रघासोऽस्त्येषां ते प्रघासिनः (हवामहे) स्तोतुमाह्वयामः। ह्वेञ् शब्दे (१०७०) भौवादिकः उभयपदी। 'बहुलं छन्दसि' (पा. ६, १, ३४) इति सम्प्रसारणम्। प्रघासिनः के (मरुतः) 'शुक्रज्योतिश्च' इत्यारभ्य 'विक्षिपः' इत्यन्तं (वाज. सं. १७,८०-८६) मरुतां सप्त सप्तका निर्दिष्ठाः। तेषां 'स्वतवांश्च प्रघासी च' इति मरुतां गणसप्तके आम्नाताः। ते प्रघासिनो मरुतः (च) अन्ये च तेषां गणाः (रिशादसः) अत्र पदपाठोऽनवग्रहः। तस्माद् विविधा व्युत्पत्तयः प्रकल्प्याः। रिश हिंसायाम् (१५१४) तौदादिकः परस्मैपदी। दमु उपक्षये (१२९०) दैवादिकः परस्मैपदी। रिशतो हिंसकान् दस्यन्तीति क्षिण्वन्तीति विग्रहे दस्यतेः क्विपि रिशद्दसः पृषोदरादित्वाद् रिशादसः

इत्युव्वटः । यद्वा रिशतो हिंसकान् अस्यन्ति क्षिपन्तीति अस्यतेर्विच् प्रत्ययः इति देवराजयज्वा (निघ. ४, ३, ५३) महीधरश्च । रिशां वैरिकृतां हिंसां दस्यन्ति इति च, 'रिशन्ति हिंसन्तीति रिशाः हिंसकाः तान् दस्यन्ति इति च महीधरः । रिशान् दोषान् अदन्ति हिंसन्ति इत्येवम् उत्तरपदम् अत्तेरित्यर्वाचीनाः । तत्र रिशानां हिंसकानां दसः क्षयो येभ्य इति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरोऽस्मान् भाति । (करम्भेण) यवमयो हविर्विशेषः करम्भस्तेन । यद्वा तात्स्थ्यात् ताच्छब्द्यम, इति नयेन करम्भः करम्भपात्रं तेन (सजोषसः) समानो जोषः जोषणं प्रीतिर्येषां ते सजोषसः समानप्रीतयः । एवंभूतान् मरुतो हवामहे इति देवयाज्ञिनः ।

आत्मयाजिनस्तु—(रिशादसः) कामजन्यहिंसाया निवर्तकाः यद्वा कामादीनां नाशकाः (करम्भेण) मन्त्रशास्त्रदृशा क् विष्णुः अः ब्रह्मा रः ब्रह्मागिनः म् शिवः भः पराशक्तिः तेषां समूहः करम्भः तेन (सजोषसः) समानप्रीतयस्तान् (च) तथा (प्रघासिनः) अन्नादान् यथा श्रुतिः 'यदिदं किं चाश्वभ्य आकृमिभ्यः आ कीटपतङ्गेभ्यः तत्प्राणस्यान्नम् आपो वास इति' (शत. १४, ९, २, १४) । (मरुतः) प्राणान् (हवामहे) आह्वयामः इति ।

सात्वतास्तु– एकचक्राभिधानायां नगर्यां धृतराष्ट्रभूपतिभयात् निवसन्ती सपुत्रा कुन्ती प्रतिवेशिविप्रपरिवारार्तवादश्रवणदयार्द्रहृदया तदुपकण्ठं गत्वा तं परिवारम् आश्वासयन्ती व्याहरति प्रघासिन इति ।

नेदं द्वितोयाबहुवचनान्तं किं तर्हि कर्मणि षष्ठ्या एकवचनम्, (प्रघासिनः) प्रघासिनं भूरिभोजिनमेतेन बलातिरेकः सूच्यते । बलवान् हि भूयो भुङ्क्ते पुष्टगात्रश्च दृश्यते । (रिशादसः) रिशादसं रिशां शत्रूणां दसमुपक्षयितारम्, दसु उपक्षये (दिवादि १२९०) शत्रुनाशनक्षमम्, रिशेति छान्दसो दीर्घः । (मरुतः) मरुतं वायुं तत्पुत्रत्वात् वायोरवतारं वा । मम पुत्रं भीमं (करम्भेण) कं सुखं रम्भयति उत्पादयति इति करम्भः सुखोत्पादकः हर्षकारकः । अपि वा दधिसक्तुवचनेन करम्भशब्दे नात्र रक्षः सन्तोषणाय निर्मितो भोज्यविशेषो लक्ष्यते । तेन करम्भेण बकनामधेयस्य रक्षसः कृते निर्मितेन विविधभोज्यसमूहेन सह तदुपकण्ठं गन्तुं हवामहे आह्वयामहे । 'अस्मदो द्वयोश्च' इति बहुवचनं, सम्बोध्य प्रेषयामि इत्यर्थः । अत्र यास्कः-मरुतो मितराविणो वा मितरोचिनो वा । महद्द्रवन्तीति वा (निरुक्त ११।१३) तदनुसारेण शत्रुं विनाशयितुमतिशयेन धावन्तं मरुतं भीमम् । म्रियन्ते शत्रवोऽनेनेति अमरकोशे सुधाव्याख्यायां भानुजिदीक्षितः, तन्मतेन 'मृग्रोरुतिः' (उ० १।९४) इति उतिप्रत्यये गुणे मरुत् तं शत्रुव्यापादकमिति वा । (सजोषसः) सजोषसं जोषः सेवनं तत्समानं यस्य सः सजोषास्तं भ्रातृनिर्विशेषं जनसेवने निरतम्, एतेन न प्रसह्य भीमः प्रेष्यते अपि तु सहर्षमार्तरक्षणाय स्वयमेव तथाचरितुमुत्सुक इति सूचितम् । एकचक्रान्तिके नरभक्षको बका-

भिधानः एको राक्षसः आसीत् । तत्रत्याः समे तस्य जनपदस्य अध्यक्षं मेनिरे । प्रतिवासरं विविधभोज्योपेतं महिषद्वयं नरञ्चैकं त्रासात् कृतप्रतिज्ञाः प्रेषयामासुः । अयं वासरः तस्य ब्राह्मणपरिवारस्य क्रमेण आयातः, तस्मात् रोदितुम् आरेभे असौ परिवारः । सञ्जात निजपुत्रपराक्रमप्रत्यया पृथा तत्परिवारं निवार्य तत्स्थाने रक्षोभक्ष्यविविधभोजनं दत्त्वा भीमं प्रहिणोति स्म । रक्षोऽन्तिकम् उपगतो भीमः क्रोधातिरेकेण प्रारब्धसंग्रामं तं नराधमं क्षणादेव मृत्युसदनातिथिञ्चकार । सेयं कथा महाभारतस्यादिपर्वणि निबद्धा । सविस्तरं ततः एवावसेया । तामिमां प्रधासिन इति मन्त्रो वदतीति हृदयम् ।

दक्षिणाग्नौ करम्भहोमः

"यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा" ॥ य० ३।४५ ॥

पञ्चचत्वारिंश्यां कण्डिकायां 'यद् ग्रामे०' इत्येक एव मन्त्रो दक्षिणाग्निहोमार्थः । अस्य प्रजापतिर्ऋषिः, स्वराडनुष्टुप्छन्दः, मरुतो देवता (शत० २, ५, २, २५; का० श्रौ० ५, ५, १०) ।

जुहूस्थानीयेन शूर्पेण यजमानपत्नी यवपिष्टनिर्मितानि करम्भपात्राणि दक्षिणाग्नौ जुहुयात् । अथवा जायापती वेदेः पूर्वतः पश्चिमतो वा स्थित्वा दक्षिणेनाहृतानि करम्भपात्राणि जुहुयाताम् । जुह्वती पत्नी मन्त्रं पठसि—(यत्) यादृशम् (एनः) पापं (ग्रामे) जनसमुदाये ग्रामाशान्तिकरं (वयं चकृम) वयम् अकार्ष्म । डुकृञ् करणे (१५६६) तानादिकः उभयपदी । लिटि मध्यमपुरुषबहुवचने रूपम् 'अन्येषामपि दृश्यते' (पा० ६, ३, १३७) इति संहितादीर्घे चकृमा इति । मन्त्रे 'यत्' इति यद्वृत्तं रूपं श्रूयते, तत्सामर्थ्यात्, 'यद्वृत्तान्नित्यम्' (पा० ८, १, ६६) इति सूत्रेण 'तिङ्ङतिङः' (पा० ८, १, २८)' इत्यनेन प्राप्तस्याऽनुदात्तत्वस्य निषेधे प्रत्ययस्वरेणाऽन्तोदात्तत्वम् । (यत्) यादृश च पापम् (अरण्ये) आखेटकविधयाऽरण्ये पशुवधरूपं वयं चकृम । (यत्) यादृशं च (सभायाम्) सभ्यजनापमानस्वरूपं नगरेषु वयं चकृम । (यत्) यादृशं च (इन्द्रिये) देवनिमित्तम् 'यदिन्द्रिये' इति यद् देवत्रेति' (शत० २, ५, २, २५) इति श्रुतेः । इन्द्रेण जुष्टं सेवितमित्यर्थे 'इन्द्रियमिन्द्रलिङ्गम्०' (पा० ५, २, ९३) इत्यादिना घच् - प्रत्ययः । चित्स्वरेणान्तोदात्तत्वं च । प्रजननार्थं इन्द्रियमित्युव्वटमहीधरौ । जिह्वास्वाद इति महीधरश्च । (इदं तत्) तत् सर्वमिदं एनः (अवयजामहे) अनया करम्भपात्राहुत्योपशमयामः । अवपूर्वकयज्धातुर्विनाशे वोपशमने वा द्रष्टव्यः (स्वाहा) इदं मम समर्पितं हविः सुहुतमस्त्विति देवयाजिनः ।

आत्मयाजिनस्तु— वयं (ग्रामे) ब्रह्मचर्यावस्थायां गुरुकुले गृहस्थे च पितृभ्रातृबान्धवेषु

(यद् एनः) यमपराधं (अरण्ये) वानप्रस्थाश्रमे (यत्) यत् पापं, (सभायाम्) साधुजनेषु (यत्) यत् पापं शास्त्रविरुद्धाचरणादिकं (यत्) यत्पापम् (इन्द्रिये) चतुर्दशभेदसंयुक्ते (चकृम) कृतवन्तः (तत् इदं) पापम् (अवयजामहे) नाशयामः (स्वाहा) अहं ब्रह्मास्मीति महावाक्येनेति।

सात्वतास्तु – विश्वरूपावलोकनावगतभगवन्महिमा वेपमानोऽर्जुनः क्षमां याचते– 'यद्ग्राम' इति।

(ग्रामे) जनसमक्षमितिभावः। (अरण्ये) विजने रहसि (सभायां) गोष्ठ्यां नरपुङ्गव-भूषितायाम्, इन्द्रिय-व्यापारे भोजनादौ (एनः) अपराधं (यत्) (चकृम) वयं कृतवन्तः भवत्प्रभावापरिज्ञानात्। इदं तत् सर्वमपराधजातम् अवयाजामहे दयालोस्त्वत्तः विनाशयामहे अवपूर्वो यजिर्वियोजनकर्मा। (स्वाहा) सु-सम्यक् आ-समन्तात् मनसा कर्मणा वाचा च। 'हा' जिहीते प्राप्नोति इति हा। ओहाङ्गतौ कर्तरि विच्। त्वां प्राप्तोऽस्मि इत्यर्थः। तदिदं (गीता अ. ११।४१) सखेत्यादिश्लोकेषु विस्पष्टम्।

यजमानजपः

[1]"मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः।
महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः॥" य. ३।४६॥

षट्चत्वारिंश्यां कण्डिकायां 'मो षूण इन्द्र' इत्यृमात्मक एक एव मन्त्रः। अस्यागस्त्य ऋषिः, भुरिक्पङ्क्तिश्छन्दः, (विराट् छन्द इत्युव्वटमहोधरौ) इन्द्रामरुतौ देवते (शत. २, ५, २, २६-२८; का. श्रौ. ५, ५, ११)।

"यत्र वै प्रजापतेः प्रजानां मरुतः पाप्मानं विमेथिरे तद्धेक्षांचक्रऽइमे ह मे प्रआ न विमथ्नीरन्निति। स एतामैन्द्रीं मरुत्वतीमजपत्।" (शत. २, ५, २, २६-२७)। वरुण-पाशबद्धानां प्रजापतेः प्रजानां बन्धनरूपंपापं मरुतो विनाशितवन्तः। प्रजापतिरचिन्तयत्-मरुतो मम प्रजा न पीडयेयुरितीमाम् इन्द्रामरुद्देवत्यामृचमपठत्। यजमानोऽप्यत एव इमामृचं पठति– (इन्द्र) हे ऐश्वर्यसम्पन्न देव! (अत्र) एषु (पृत्सु) युद्धेषु। पृत्सु इति संग्रामनामसु पठितम् (निघ. २, १७,२१) पृतनासु इत्येवं सतः "मांसपृतनासानूनां मांसपृत्स्नवो वाच्याः' (पा० वा० ६, १, ६३) इत्यनेन पृतनायाः पृत् इत्यादेशे रूपम्। (देवैः,) दीप्यमानैः स्वसखिभिर्मरुद्भिर्युवतरत्वं (मो) नैव, मा उ इत्यनयोर्निपातयोः समुच्चयः (नः)

---

१ ऋग्वेद १, १७३, १२।

अस्मान् (सु) अतिशयेन विनाशयेति शेषः । मो षू णः इत्यत्र 'सुञः' (पा० ८, ३, १०७) इत्यनेन 'सु' इत्यस्य षत्वम्, 'निपातस्य च' (पा. ६, ३, १३६) इत्यनेन 'षु' इत्यस्य संहितायां दीर्घः । 'नश्च धातुस्थोरुषुभ्यः' (पा. ८, ४, २७) इत्यनेन 'न' इत्यस्य णत्वे 'ण.' इति । सु शब्दः क्रियादार्ढ्यं दर्शयति । सर्वथा नास्मान् विनाशयेति भावः । किं कारणम् ? (हि) यस्मात् कारणात् । 'स्म' इत्यनर्थकः (शुष्मिन्) बलवन्. शुष्मम् इति बलनामसु पठितम् (निघ. २, ६, ११) शोषयतीति सतः (निरु. २, ७. २) इति यास्कोक्तिः, शुष शोषणे (११८३) दैवादिकः परस्मैपदी । अस्माद् धातोः 'अविसिविसिशुषिभ्यः कित्' (उ. १, १४१) इति मक् प्रत्ययः । शुष्मोऽस्त्यस्येति । (अवयाः) प्रथमाविभक्त्यन्तं रूपम् । अवयजनरूपः करम्भपात्रहोमः । अवपूर्वकाद् यज देवपूजादिषु (१००२) भौवादिक उभयपदी इत्यतः 'अवे यजः' (पा. ३, २, ७२) इत्यनेन पदत्वसम्भावनायां ङस् प्रत्ययः । अवयुतो यागः पृथग् भागः इत्युव्वटमहीधरौ । 'अवयाः श्वेतवाः पुरोडाश्च' (पा० ८, २, ६७) इति विजन्तो निपात इति वदन् सायणः (शत० २, ५, २, २८) महीधरश्च चिन्त्यौ । उक्तसूत्रेण सम्बुद्धावेव तन्निपातनात् । (अस्ति) विद्यते । अस्माभिः त्वत्सेवायामुपहूतः करम्भपात्रहोमः वर्ततेऽतो मरुद्भिः सहितस्त्वम् मैवास्मान् विमन्थीरिति भावः । (यस्य) इन्द्रस्य (महः) महतो महामहिम्नः, महः पूजा, अकारान्तः शब्द इति महीधरः । (चित्) खलु (मीढुषः) फलसेक्तुः । मिह सेचने (९९२) भौवादिकः परस्मैपदी, 'दाश्वान्साह्वान्मीढ्वांश्च' (पा० ६, १, १२) इत्यनेन क्वसुप्रत्ययान्तो निपातः । (यव्या) 'सुपां सुलुक्' (पा० ७, १, ३९) इत्यनेन भिसो विभक्तेर् याङ् आदेशः । यवमयैः करम्भपात्रैः । (हविष्मतः) हविर्युक्तस्य ते (मरुतः) सखिभूतान् (गोः) अस्माक स्तुतिः । गीरिति वाङ्नामसु पठितम् (निघ० १. ११. ३६) । गृणातिरर्चतिकर्मा (निघ० ३, १४) गॄ शब्दे (१४९९) क्रैयादिकः परस्मैपदी । क्विप् प्रत्ययः (वन्दते) स्तौति । वदि अभिवादनस्तुत्योः (११) भौवादिकः आत्मनेपदी । (यस्य) इति यद्वृत्तयोगान्न 'वन्दते' इति तिङोऽनुदात्तत्वम् । अतः 'तास्यनुदात्तेत्' (पा० ६, १, १८६) इत्यनेन 'ते' इत्यस्य लसार्वधातुकस्यानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे पारिशेष्यात् धातुस्वरेणानुदात्तत्वम् इति देवयाजिनः ।

आत्मयाजिनस्तु– आत्मरूपो यजमानः पठति–(शुष्मिन्) योगबलान्वित (इन्द्र) मनः । 'मन एवेन्द्रः' (शत० १२, ९, १, १३) । त्वं (पृत्सु) कामादीनां संग्रामेषु (णः) नः अस्मान् योगिजनान् । (मा ऊ षू) न प्रेरय । स संग्रामः (देवैः) इन्द्रियैः (अस्ति) । (अत्र) अस्मिन् युद्धे (याः) गच्छ (अव) अस्मान् रक्ष (हि) यस्मात् वयं (ते) त्वदीयाः (स्मः) (यस्य मीढुषः) अमृतवर्षणेन सेक्तुः (हविष्मतः) इन्द्रियस्वरूपहविरर्हस्य तव (महः) पूजा (चित्) खलु (यव्या) यः प्राणवायुः वः वन्दना, प्राणवन्दनानिष्पन्ना, तस्मात् (गोः) वेदवाणी (मरुतः)

प्राणान् (वन्दते) नमस्करोति । यथा श्रुति।—तस्य वा एतस्य पुरुषस्य प्राची दिक् प्राञ्चः प्राणाः, दक्षिणा दिक् दक्षिणाः प्राणाः, प्रतीची दिक् प्रत्यञ्चः प्राणाः, उदीची दिक् उदञ्चः प्राणाः, ऊर्ध्वा दिग् ऊर्ध्वाः प्राणाः, अवाची दिग् अवाञ्चः प्राणाः, सर्वा दिशः सर्वे प्राणाः' (शत० १४, ६, ११, ५) । 'प्राणो हीदं सर्वमुत्थापयति, प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि' (शत० १४, ८, १४, १-३) ।' सा वा एषा देवता, एतासां देवतानां पाप्मानं मृत्युमपहृत्य यत्रासां दिशामन्तस्तद् गमयांचकार, तदासां पाप्मनो विन्यदधात् तस्मान्न जवमियात्, नान्तमियात्, नेत् पाप्मानं मृत्युमन्ववायानीति । सा वा एषा देवता । एतासां देवतानां पाप्मानं मृत्युमपहृत्याथैना मृत्युमत्यवहृदिति ।।

सात्वतास्तु— महाप्रतिपक्षं शाल्वं निहत्य द्वारिकामायातः कृष्णः आकर्णितसमस्तपाण्डवः वृत्तान्तः तद्वनमाजगाम । यत्र कपटद्यूतेन हारितराज्याः पाण्डुतनयाः निवसन्ति स्म । स्वसुहृदं समीपमुपयातमालोक्य सञ्जातहर्षेण अर्जुनेन सत्कृतः स्तुतः द्रौपद्या भृशमुपालब्धश्च भगवान् वासुदेव उवाच- 'मो षूणं' ति ।

(इन्द्र) अर्जुन! इन्द्रांशत्वात्, (शुष्मिन्) महापराक्रम अतुलबलधाम (नः) अस्माकं (सु) सुहृद, उ इति निपातः पादपूरणः एवार्थो वा । मैव ग्लासीरिति शेषः । अस्माकं राज्यं कपटद्यूतेन अपहृतः धार्तराष्ट्रैः दुर्योधनादिभिः । न केवलम् एतावदेव किं तर्हि इन्द्रप्रस्थात् निष्कासिताः वनं प्रेषिताश्च, वयंद्वादशवर्षाणि यावत् भवद्भिः वस्तव्यमरण्ये, त्रयोदशे वर्षे अज्ञातवासैः स्थातव्यम् ज्ञाते पुनर्दण्डावृत्तिः इत्येवमादिष्टाः । कीदृशोऽस्माकमनागतसमयो बोभविता । दुस्तरे दुःखसागरे निमग्नान् न कश्चिदुद्धर्तुं करं गृह्णाति । वामो विधाता, नियतिरपि अतितरां दुस्सहदुःखदानदक्षा, न जाने कदा को विपत्पर्वतपातो नः शिरसि भवेत् इति अनुतापं मा कार्षीरिति भावः । (हि) यस्मात् (अत्र पृत्सु) एषु प्रवर्तिष्यमाणेषु संग्रामेषु, भाविनोऽपि संग्रामस्य बुद्धिस्थत्वात् इदमा निर्देशः । (देवैः) इन्द्राग्न्यादिभिरनुगृह्यमाणस्य, कारकेण योगात् क्रियाऽध्याहारः । (ते) तव (अवयाः) अवयजति पृथक् करोति, इतरेभ्यो भिनत्ति इति अवयाः कोऽपि विशेषः अस्ति विद्यते खलु । अग्निना देवेन युद्धसाधनाक्षय्यमहेषुधिदिव्यरथगाण्डीवधनूंषि प्रदत्तानि । वनवासव्याजेन इन्द्रकीलके तपस्यन् युधि प्रसादितात् त्रिशूल-पाणेः पाशुपतास्त्रम्, तपसैव परितुष्टात् तातात् सस्नेहं स्वर्गे समाहूतो भवान् पञ्चवर्षाणि यावत्, तत्पादमूलमुपासीनः प्रहारप्रतिसंहारादिकृत्स्नविधिसंयुक्तं दिव्यास्त्रपञ्चदशकम्, अन्येभ्यः वरुणयमकुबेरेभ्यः क्रमशः दण्डपाशसान्तर्धानप्रक्षेपणास्त्रञ्च लप्स्यते । इन्द्रेण गुरुदक्षिणां याचितोऽधिसमुद्रतटं युधि व्यापादितनिवातकवचाद्यसुरगणः स्वर्गं प्रत्यावर्त्य हिरण्मयीं मालां देवदत्तशंखं दुर्भेद्यकवचञ्च हृष्टात् शक्रात् अवाप्स्यति । ततः लब्धविविधास्त्रं भवन्तं कोऽपि जेतुं न शक्ष्यते, का कथा

कौरवाणां वराकाणां, तस्मात् वनवासोऽयं न अभिशापः अपितु वर एव । निखिलसपत्न-विजयक्षमदिव्यशक्तिसम्पादनहेतुरिति दुर्दैवोपनतदुर्बुद्धिना दुर्योधनेन भवद्भ्यो वनवासं प्रयच्छता नूनं विहितःस्वपादे कुठाराघातः ।

उषित्वा वने न चेत् दिव्यानि देवानुग्रहसमासादित्तानि विविधानि अस्त्राणि लभेथास्त्वम्, तदा कथं कथापथातीतपराक्रमान् भीष्मद्रोणकर्णप्रमुखान् त्रिभुवनलब्धसपर्यान् योधवर्यान् जेतुं क्षमेथाः । अतः देवानुग्रहलक्षणो विशेषस्त्वयि वर्तते । अतः अनागतकालः अतीव शोभनः सुखावहः । शत्रुभिरपहृतं राज्यमनायासेन प्रत्यायास्यति । अचिरादेव स्वभर्तृ निहननात् शोकाश्रुनयना विलपिष्यन्ति शत्रुवरारोहाः । अतोऽनिष्टशंकया न भेतव्यमिति भावः । किञ्च (मीढुषः) अभीष्टवर्षकस्य (यस्य) देवगणस्य (यव्या) यौति कुटुम्बिभ्यो वियुनक्ति पृथक्करोति इति यवस्तपश्चर्या 'यु मिश्रणामिश्रणयोः' ततः कर्तरि पचाद्यच् तत्रभवा तत्साध्या महादेवेन्द्रादिसाक्षात्कृतिः (महश्चित्) महती प्रसक्ता एव । महती वा (यव्या) संसर्ग इति कश्चित् । यस्य इत्युक्त्या यत्तदोर्नित्यसम्बन्धात् तस्येति अध्याह्रियते । तस्य देववर्गस्य इन्द्रादेः(हविष्मतः) प्रशस्तहविर्लक्षणान्नधनादिदानवतः । हविर्हूयते दीयते हि अन्नधनादिकम्, प्रशसायां मतुप् सर्वोत्कृष्टदातुरित्यर्थः मरुतः कर्मणि षष्ठी मरुतां रूपं, रूपं रोचतेः (निघ० ३ । १५) । महैश्वर्यलक्षणं (गीः) वेदवाक् इन्द्रस्य नु कं वीर्याणि प्रवोचम् (ऋ. १ । १५४ । १) 'इदं पित्रे मरुतामुच्यते' (ऋ. १ । ११४ । १) कद्रुद्राय प्रचेतसे' (ऋ. १ । ४३ । १) इत्यादिका । वन्दते स्तौति 'पृत्' इति पृतनायाः स्थानेऽयमादेशः । पृतना 'पृङ् व्यायामे' (तु० आ०) औणादिकस्ततन्प्रत्ययः । पृत् इति संग्रामनाम (निघ० २।१७।२१) व्यापियन्तेऽत्र योधाः । मरुत् इति रूपनाम केषाञ्चिन्मतेन (निघ० ३, ७, १२) हिरण्यनामस्वपि पठितम् (निघ. १।२। १३) तत्रैव व्याख्यातं देवराजेन मितममितं वा रोचते, मितममितं वा रोचयति । मातेः पूर्वार्द्धं रोचतेर्वोत्तारार्द्धम्, पृषोदरादित्वात् (पा. ६, ३, १०९) साधुः । हिरण्यं हि अग्न्यादि- तेजस्वि-पदार्थेभ्यो मितं भोगादिभ्योऽमितं रोचते अर्थिभ्यो दीयमानं लोकद्वयेऽपि कीर्ति कारयति । यद्वा 'मृग्रोरुतिः' (उ. १, ९४) इति सूत्रेण म्रियतेर्धातोः (तु. आ.) उतिप्रत्यये रूपम् । म्रियन्तेऽनेन पुरुषा इति मरुत्, एतदर्थं हि चौरादिभिः पुरुषा हन्यन्ते इति एतत्सर्वं रूपेऽतिसंजाघटीति इति । रूपेण सौन्दर्यातिरेकेणाकृष्टैः कामुकैः रूपवत्या युवत्या रक्षकाः पितृपतिभ्रात्रादयो व्यापाद्यन्ते । (शुष्मिन्) बलवन् शुष्म इति बलनाम (निघ. २, ९, ११) शुष् शोषणे (दि. प.) अविसिविशुषिभ्यः कित् (उ. १, १४१) मन् - प्रत्ययः । शुष्यत्यनेनारिः । शुषिः प्रीणनार्थं इति माधवः । प्रियं हि बलम्, शुष्ममिति बलनाम शोषयतीति सतः (निरुक्त २.२४) इति भाष्यम् । अपि वा अवया इति द्रौपद्याः सम्बोधनम्, अवयजति कोपातिरेकेण भविष्यन्तं भारताभिधानं सङ्ग्रामं प्रवर्त्य भूभार-दुर्योधनादि

राजन्यगणस्य तद्देहेभ्यः प्राणान् वियोजयति। दुराचारनिरतराजन्यगणप्राणवियोजिके! द्रौपदीवपुषा चण्डिका एवात्याचारिणो राजन्यान् निहन्तुं यज्ञकुण्डात् समुद्भूतेति पौराणिकसमयः। अथवा अवयजति अधर्माद्धर्मं विविनक्ति पृथक्करोति इति, अवयाः तत्सम्बोधने धर्माधर्मसारज्ञ युधिष्ठिर! शुष्मिन् बलशालिन् भीम इति वा। इत्थम् अर्जुनभीमद्रौपद्यो युधिष्ठिर-भीमार्जुनाः वा अस्मिन् मन्त्रे सम्बोध्यन्ते। 'अव' पूर्वात् यजेर्विचि सौ रुत्वम् दीर्घश्च 'अवयाः श्वेतवाः पुराडाश्च' (पा. ८, २, ६७) इति सूत्रेण रुत्वं दीर्घश्च निपात्यते। ननु 'मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्' (पा. ३।२।६१) 'अवेर्यजः' (पा. ३, २, ७२) इति च सूत्रेण ण्विनि प्रत्यये उपधावृद्धौ श्वेतवाहौ श्वेतवाहः, अवयाजौ अवयाजः इत्यादीनि रूपाणि त्रयोदशस्वजादिषु विभक्तिषु सिद्ध्यन्ति। भादौ षट्के सौ सुपि च अष्टसु हलादिविभक्तिषु 'श्वेतवहादीनां डस् पदस्येति वक्तव्यमिति वार्तिकेन यत्र पदत्वं भावि तत्र ण्विनोऽपवादस्य डसो विधानत्। श्वेतवाः अवयाः पुरोडा इत्यादिरूपाणां निष्पत्तिर्निष्प्रत्यूहैव, तत्कृतमनेन 'अवयाः श्वेतवाः पुरोडाश्च' (पा. ८, २, ६७) इति सूत्रेण इतिचेत्; सत्यम्, असम्बुद्धौ सौ डसि प्रत्यये 'अत्वसन्तस्य चाधातोः' इति दीर्घे तद्रूपसिद्धावपि सम्बुद्धौ दीर्घो न स्यात्। सर्वनामस्थाने चासम्बुद्धाविति सूत्रात् 'अत्वसन्तस्य चाधातोः' इति सूत्रे असम्बुद्धाविति पदानुवृत्तेः। अन्यथा हे, धीमन् हे पयः इत्यादिकं न निष्पद्येत। तदेतत्सर्वं काशिकायां न्यासे च तस्मिन्नेव सूत्रे स्पष्टम्।

पत्नीवाचनम्

"अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा।
देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सचाभुवः" ॥ य० ३।४७ ॥

अस्यां सप्तचत्वारिंश्यां कण्डिकायां 'अक्रन् कर्म' इत्येक एव मन्त्रः। अस्यागस्त्यः ऋषिः, विराडनुष्टुप् छन्दः, अग्निर्देवता (शत० २, ५, २, २६; का० श्रौ० ५, ५, १२)।

प्रतिप्रस्थाता पत्नीं वाचयति—(कर्मकृतः) वरुणप्रघासप्रयोगानुष्ठातारः ऋत्विजः (मयोभुवा) मयः इति सुखनाम (निघ० ३, ६. ७) मयः सुखं कल्याणं वा भावयति सम्पादयति मयोभूस्तया कल्याणकारिण्या अथवा मयः सुखं भवतीति तया स्वयं सुखस्वरूपया (वाचा) स्तुत्या (सह) सार्धं (कर्म) वरुणप्रघासाख्यं पर्व (अक्रन्) अकार्षुः। 'मन्त्रे घस०' (पा० २, ४, ८०) इत्यादिना च्लेर्लुकि रूपम्। मन्त्रादित्वात् अतिङ्परत्वं नास्ति। अतः 'तिङ्ङतिङः' (पा० ८, १, २८) इत्यनुदात्तत्वं न। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (पा० ८, ४, ७१) इत्यनेनाडागम उदात्तः। (सचाभुवः) समाने वरुणप्रघासकर्मणि कार्यार्थं सह युञ्जाना हे ऋत्विजः। सचा सहार्थेऽव्ययम्। (देवेभ्यः) देवानां

प्रसादार्थं (कर्म) आरब्धं कार्यं (कृत्वा) विधाय (अस्तम्) गृहम् अस्तमिति गृहनामसु पठितम् (निघ० ३, ४, ५) (प्रेत) प्रकर्षेण निश्चिन्ततया इत गच्छतेति देवयाजिनः।

आत्मयाजिनस्तु—(कर्मकृतः) वागादयः (मयोभुवा) ब्रह्मानन्दस्वरूपया (वाचा) वेदर्चा (सह) (कर्म) मनःसंस्कारकं निष्कामकर्म (अक्रन्) कृतवन्तः। (सचाभुवः) हे शरीरे सहभवनशीला वागादयो यूयं (देवेभ्यः) ब्रह्मपरानारायणेभ्यः (कर्म) मनःसंस्काररूपं निष्कामकर्म (कृत्वा) (अस्तम्) आत्मस्वरूपं गेहं (प्रेत) गच्छतेति ॥

सात्वतास्तु–एकदा ब्रह्मरुद्रप्रमुखाः सर्वे देवाः द्वारिकामायाताः अभ्यर्थयाञ्चक्रिरे च पुरुषोत्तम ! यदर्थम् अस्मत्प्रार्थितो भवान् भुवमवतीर्णः सिद्धं नस्तत् समीहितं, सम्प्रति साम्प्रतं स्वधामप्रस्थानं, कृतं भवता स्वकार्यं स्वानुचराणामस्माकमनुग्रहाय 'यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम। शरच्छतं व्यतीयाय पञ्चविंशत्यधिकं प्रभो।' (भाग० ११, २५) इत्यादि तदेव विवृणोति-अक्रन् कर्म कर्मकृत इति। (कर्मकृतः) साधुपरित्राणधर्मरक्षणादिकार्यकारिणो भवन्तः, आदरार्थंबहुवचनम् सहचराभिप्रायं वा। (अक्रन्)-कृतवन्तः,कर्म जगदुद्धारलक्षणम्, (मयोभुवा) सुखोत्पादिकया अविद्यानिरासेन निरतिशयानन्ददायिन्या वाचा गीतोपदेशलक्षणया (सह) (देवेभ्यः) देवहितार्थं तद्द्रोहि - शत्रुगणनिहननलक्षणं (कर्म) कार्यं (कृत्वा) निष्पाद्य, (अस्तं) गृहं स्वधाम, (प्रेत) प्रगच्छत प्रतिष्ठध्वम्, प्रस्थातुं निर्धारयत। अस्तम् इति गृहनाम (निघ० ३।४।५) अस् भुवि (अदा० ७०) अस् गतिदीप्त्यादानेषु (८८ भ्वादि. भू. उ.) असु क्षेपणे (१२०९ दि. प.) 'हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् (उ. ३।८६) इति बाहुलकात् तन, द्वितीयैकवचनं, भवत्यस्मिन् सुखं, दीप्यते हि तत्। आदीयते स्वीक्रियते वा तदर्थिभिः, क्षिप्यन्तेऽस्मिन् पदार्थाः इति वा, इति देवराजः। न केवलं भवानेव, किं तर्हि (सचाभुवः) सचेति निपातो सहवचनः सहवासिनः भवत्सेवार्थं साकं भूमौ आविर्भूताः। सानुचरो भवान् स्वलोकं व्रजतु इति भावः। राजसूये युधिष्ठिरकृतेषु त्रिषु अश्वमेधेषु अधिकुरुक्षेत्रं वसुदेवकृते यागे वा निर्वृते ऋत्विजां प्रस्थापनेऽयं मन्त्रो योज्यः। (कर्म) यागलक्षणम्, (कर्मकृतः) ऋत्विजः (वाचा) स्तोत्रशस्त्रादिरूपया वेदवाचा यथासवनमुच्चार्यमाणया लब्धदक्षिणा यूयं (सचाभुवः) यागे साकं वर्तमानाः अस्तं-स्वस्वगृहं गच्छत इति।

जायापती-स्नानम्

"अवभृथ निचम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि" ॥

(य० ३।४८)

अस्याम् अष्टाचत्वारिंश्यां कण्डिकायां, 'अवभृथ' इत्येक एव मन्त्रो जायापत्योः स्नाने विनियुक्तः। अस्य और्णवाभ ऋषिः, ब्राह्मीअनुष्टुप् छन्दः, यज्ञो देवता (शत० २, ५, २, ४७) (का० श्रौ० ५, ५, २९)।

वरुणप्रघासाख्यस्य कर्मणोऽन्ते यजमानो यजमानपत्नी च जलेऽनिमज्जन्तौ तदङ्गभूतमवभृथाख्यं स्नानमाचरतः (निचुम्पुण) हे नीचैः क्वणनयुक्त ! अवभृथस्नानं मन्दस्वरेण कर्तव्यमतो नीचैः क्वणनं युक्तम् 'उपांश्ववभृथेष्ट्या चरन्ति' इति श्रुतेः। हे अतिशयपुण्यप्रद ! 'अवभृथोऽपि निचुम्पुण उच्यते, नीचैरस्मिन् क्वणन्ति नीचैर्दधतीति वा' (निरु. ५, १८) इति यास्कवचनात् नैरुक्तप्रक्रियया नीचैः क्वणनशब्दान्निष्पन्नो निचुम्पणशब्दः। अथवा चुप मन्दायां गतौ (४३१) भौवादिकः परस्मैपदी धातुरिह नि-पूर्वो द्रष्टव्य इति महीधरः। अथवा पुण कर्मणि शुभे (१४२०) तौदादिकः परस्मैपदी धातुर्वा नि पूर्वः। पुनः पुनः निपुणति यष्टारं शुभे कर्मणि प्रवर्तयतीति विग्रहे 'धातोरेकाचः' (पा. ३, १, २२) इत्यनेन यङ् प्रत्ययः। द्वित्वेऽभ्यासस्य चुत्वं छान्दसम्। ततः कर्तरि अच्। (अवभृथ) हे अवभृथाख्यस्नानरूप यज्ञ! अवभ्रियन्ते अवाचीनानि पात्राणि धार्यन्ते यस्मिन् इत्यधिकरणे 'अवे भृञः' (उ. २, ३) इत्यनेन क्थन् प्रत्ययः। 'थाथघञ्' (पा. ६, २, १४४) इत्यनेनान्तोदात्तत्वं च। अत्र मन्त्रारम्भे आमन्त्रितत्वाद् आद्युदात्तत्वम्। त्वम् (निचेरुः) नीचैश्चरणशीलः। अवभृथाख्ये कर्मणि सर्वस्य कर्मणो नीचैर्भावात् (असि)। (निचुम्पुणः) नीचैःक्वणनो निरतिशयपुण्यप्रदश्च असीति शेषः। (देव) हे द्योतमान ! स्नानाद्धि व्यपगतमलानां द्युतिरेधते। अनेनाऽवभृथस्नानेनाऽहं सपत्नीको यजमानः (देवैः) सख्यं नीताभिर्देवशक्तिभिः देवानां साहाय्येनेत्यर्थः (देवकृतम्) देवनिमित्तं कृतम्। निमित्ते तृतीया। देवेष्वाचरितमित्यर्थः। तृतीया कर्मणि' (पा. ६, २, ४८) इति पूर्वपदप्रकृतिस्वरः। (एनः) अपराधम्। 'इण आगसि' (उ. ४, १९७) इत्यनेन गत्यर्थकाद् एतेर् असुन् प्रत्ययः। नित्वाद् आद्युदात्तत्वम्। (अव अयासिषम्) अपनीतवानस्मि। या प्रापणे (१०४९) आदादिकः परस्मैपदी धातुर् अवपूर्वः 'व्यवहिताश्च' (पा. १, ४, ८२) इत्यनेन वेदे उपसर्गक्रिययोर्व्यवधानेनापि दर्शनेन व्यवहितस्याप्युपसर्गस्य क्रियया सम्बन्धात्। लुङि उत्तमपुरुषैकवचने रूपम्। मर्त्यैः) सहायैर्ऋत्विग्भिश्च (मर्त्यकृतम्) मर्त्यनिमित्तं कृतम् मर्त्येष्वाचरितमित्यर्थः (अव) अयासिषमिति अनुवर्तते। पापं अपनीतवानस्मि। (पुरुराव्णः) अनेकसंज्ञाया नानाविधाया इत्यर्थः। पुरु बहु विविधं वा रौति शब्दं करोतीति 'अन्येभ्योऽपि दृश्यन्ते' (पा. ३, २, ७५) इति कर्तरि वनिप् प्रत्ययः। छान्दसम् आत्वम्। अथवा विविधदुःखदानशीलायाः, पुरूणि विविधानि दुःखानि राति ददातीति रा दाने (१०५७) आदादिकः परस्मैपदी द्रष्टव्यः। (रिषः) हिंसायाः, रिष हिंसायाम्, भौवादिकः परस्मैपदी। (पाहि) गोपाय, पा रक्षणे (१०५६) आदादिकः परस्मैदीति देवयाजिनः।

आत्मयाजिनस्तु—(अवभृथ) ज्ञानयज्ञसमाप्तौ क्रियमाणस्नानविधे ! (निचुम्पुण) हे आत्मसमुद्र ! त्वं (निचेरुः) अचलोऽपि जीवरूपांशुभिर्नितरां गमनशीलः (निचुम्पुणः) समुद्रः (असि) । (देवैः) ज्ञानेन्द्रियैः सह (देवकृतम्) देवेन जीवात्मना कृतम् (एनः) पापम् (अवायासिषम्) दूरे त्यक्तवानस्मि, तथा (मर्त्यैः) कर्मेन्द्रियैः सह (मर्त्यकृतम्) भूतात्मना कृतं पापम् (अव) अवायासिषम् त्यक्तवास्मि । (देव) हे ज्योतिःस्वरूपात्मसमुद्र ! (पुरुराव्णः) बहु विरुद्धफलं ददातीति पुरुरावा तस्याः (रिषः) हिंसायाः (पाहि) रक्ष । हिंसाशून्ये ब्रह्मयज्ञे निष्ठां देहि । यथा मनुः 'जप्येनैव तु संसिध्येद् ब्राह्मणो नाऽत्र संशयः । कुर्यादन्यन्न वा कुर्याद् मैत्रो ब्राह्मण उच्यते (मनु. २, ८७) । महाभारते च 'आत्मा नदी संयमतोयतीर्था सत्यावहा शीलतटा दयोर्मिः । तत्राभिषेकं कुरु पाण्डुपुत्र ! न वारिणा शुध्यति चान्तरात्मा' इति ।

अस्मिन् वरुणप्रघासाख्ये सप्तमेऽनुवाके पञ्चसु कण्डिकासु पञ्च एव मन्त्राः । तत्र प्रतिमन्त्रं १. पत्नीवाचनं, २. दक्षिणाग्नौ करम्भहोमः ३. यजमानजपः ४. पत्नीवाचनं ५. जायापत्योःस्नानं कर्माणीमानि वर्णितानि (चतुश्चत्वारिंशीमारभ्याऽष्टाचत्वारिंशीं यावत्) ।

सप्तस्वनुवाकेषु अष्टाचत्वारिंशति कण्डिकासु समुदिता मन्त्रसंख्या ६२ (तासां कण्डिकानां षट्चत्वारिंशी कण्डिका ऋग् वर्तते) ।

सात्वतास्तु— व्रजे वयोवृद्धाभीष्टकुप्रथां दूरीकर्तुं नग्नस्नातानां व्रजौकसां व्रजाङ्गनानां कात्यायनीव्रतवैगुण्यञ्च परिहर्तुमकृतपादध्वनिः शनैरागत्य, इत ऊर्ध्वम् एता नैवमाचरेयुः इति गूढाभिसन्धिः व्रजकुमारिकाणां वस्त्राण्यपजहार तूर्णमारुरोह च कदम्बशाखिशाखाग्रम् । तदा जलात् निर्गन्तुकामाः अदृष्टस्ववस्त्राः कुमारिकाः वियति विक्षिप्तनयना अपरमेव नवबटुं पञ्चवर्षदेशीयं नन्दनन्दनं विश्वनन्दनमानन्दसदनं नयनसदनातिथिं प्राप्य सव्यञ्जनं बभाषिरे-अवभृथेति ।

अवं बभर्ति अवाचीनानधःस्थितान् धारयति पोषयति वा इति अवभृथः तत्सम्बोधने (अवभृथ) दीनबन्धो ! 'अवे भृञः' इति (उ. २, ३) सूत्रेण क्थनि साधु. । अधःस्थितपालकस्त्वं तथाभूतान् अस्मान् क्लिश्नासि इति विस्मयातिरेको व्यज्यते । (निचुम्पुण) अतिशयेन मन्दगामिन् 'चुप मन्दायां गतौ' उणप्रत्ययो मुमागमश्च,चौरः, चौरो हि गृहाध्यक्ष-जागरणभयात् अतितरां शनैः प्रचरति त्वमपि तथैव आचरसि, तस्मात् चौरनिर्विशेषं कशाघातैस्ताडनीयो भवान् इति भावः । कटुवाक्येन क्रुद्धो माभूद् इत्याशङ्कमानाः प्रशंसन्ति– (निचेरुः) नितरां चरिष्णुः सततं गतिमान् । अथ पि निचुम्पुणः अतिमन्दगमनः इति विरोधः । निचेरुः सर्वव्यापकः, इति तत्परिहारः, सर्वव्यापकस्य सर्वदा सर्वत्र सर्वं पश्यतस्तव पुरस्तात् नग्नोभवनं

न दोषाय । तस्माद् शनैरागत्य वस्त्रापहृतिर्न युज्यते इति भावः । नाहमत्र एक एव, नेदं पिहितद्वारं स्नानागारम्, देशान्तरीयः कलुषितमानसो वा यदि आगच्छेत् तदा कुप्रथाम् इमां पश्यन् अस्माकं व्रजजनपदमुपहसेत्, भृशं निन्देत् च । कामोपहतचेताश्च कश्चित् कुमारीणां भवतीनां किंचिदत्याहितं कुर्याद् अतः भविष्यति काले भवतीभिः तथा नाचरणीयमिति शिक्षणाय वस्त्रापहृतिर्युक्तेति वक्तुकाममिव कृष्णमालक्ष्य आहुः—(देवैः) देवेषु जलाधिप-वरुणसूर्यादिषु सप्तम्यर्थे तृतीया (एनः) पापं देवावहेलनं नग्नस्नानादिलक्षणम् (अवायासिषम्) विनाशयामि स्म । (मर्त्यैः) मर्त्येषु कृतञ्च स्वजनहासादिलक्षणं सूर्यनमस्कारादिना प्रायश्चित्तेन । आह च महाभागो मतिमान् व्यासो भागवते—

यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् ।
बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधोवसनं प्रगृह्यताम् ॥

(भाग० १०, २२, १९)

(मर्त्यैः) मर्त्येषु देशान्तरीयकामुकादिमनुष्यनिमित्त-स्वजनपदोपहासादिलक्षणं एनश्च (अव) अवायासिषम् इति सम्बन्धः । त्वया शिक्षिता अनागतेऽनेहसि कदापि तथा नाचरिष्यामः इति प्रतिज्ञानमेव तत्प्रायश्चित्तमिति भावः । (देव) स्वामिन् ! भगवन् ! देवाधिपते ! (मर्त्य) मायामानुष भगवन्, सम्बोधनमेतद्द्वयम् । (रिषः) हिंसकान् दुःसहदुःखप्रदान् (पुरुरावणः) संसारात् पुरु अधिकं रुवन्ति पीडातिरेकेण हा कष्टम्, हा हन्त हता वयं घोरेषु विविध-जन्ममृति-परम्परा-लक्षणेषु अङ्गारेषु, दन्दह्यते चेतः, वेपते शरीरम्, इत्येवं शब्दं कुर्वन्ति अत्र स पुरुरावेति व्युत्पत्तेः । भगवन् तथा अनुगृहाण यथा भवतः सान्निध्यम् निरतिशया-नन्दावाप्तिस्वरूपमासाद्य निवृत्तप्रेत्यभावा भवेम इति भावः । गोलोके त्वत्सेवननिरता निवृत्तयातायाताः सदा हृष्टाः स्यामेति भावः ।

"पूर्णा दर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥ य. ३।४९ ॥

८. साकमेधाऽनुवाकः स्थाल्याश्चरुग्रहणम्

एकोनपञ्चाशयां कण्डिकायां 'पूर्णा दर्वि' इत्येक एव मन्त्रः स्थाल्याश्चरोर्ग्रहणार्थः । अस्याप्यौर्णवाभः ऋषिः, अनुष्टुप् छन्दः, इन्द्रो देवता (शत. २, ५, ३, १७; का. श्रौ. ५, ७, ३०) ।

अधुना चातुर्मास्यस्य तृतीयं पर्व साकमेधाख्यमुपक्रमते । सोमो राजा गायत्र्यादीनि

छन्दांसि चाऽनेन साकमेधपर्वाऽनुष्ठानेन सहैव समैधन्त तस्माद् उच्यते साकमेध इति । 'यत् सोमश्च राजा छन्दांसि च समैधन्त तत् साकमेधानां साकमेधत्वम्' (तै. ब्रा. १ ४, १०, ७-८) इति श्रुतेः । अस्मिन् कर्मणि प्रातरग्निहोत्रं कृत्वा वाऽनेन मन्त्रेण दर्व्यां स्थाल्या ओदनं चर्वाख्यमादत्ते— (दर्वि) हे हविष्यादिसंप्रदानसाधनभूते काष्ठादिनिर्मिते ! भाषायां 'कड्छी' इति दर्वीशब्दाभिधानं प्रसिद्धम् । इह चाहुतिसम्प्रदानसाधनं पात्रं परिगृह्यते । 'वृदृभ्यां विन्' (उ. ४, ५३) इत्यौणादिको दृणातेर्विन् प्रत्ययः । स्थाल्या ओदनं दारयति निष्कासयतीति संप्रत्ययात् ।(पूर्णा)ओदनपरिपूर्णा सती । पूरी आप्यायने(१८०४)चौरादिकः उभयपदी । अस्मान्निष्ठायां 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' (पा. ७, २, २७) इत्यनेनेडागमाभावे पूर्णशब्दो निपात्यते । (परापत) इन्द्रं प्रति याहि । महीधरः 'परा' इति 'उत्कृष्टा' इत्याह । वस्तुतः परोपसृष्टः 'पत्लृ गतौ' इत्यर्थं धातुरिहाभिप्रेतः । (सुपूर्णा) अस्मदभीष्टफलसम्प्रदानायात्यन्तं पूर्णा । निष्ठायां गतिसमासे 'गतिरनन्तरः (पा.६,२,४९) इत्यनेनाऽनन्तरपूर्वस्य गतेः 'सु' इत्यस्योदात्तत्वम् । (पुनः) अनन्तरम् (आपत) अस्मान् प्रत्यागच्छ । अस्माकं श्रद्धाञ्जलिं गृहीत्वा इन्द्रं प्रति गच्छ, इन्द्रप्रसादाद् अभीष्टफल-सिद्धिपरिपूर्णाऽस्मान् प्रत्यावर्तस्वेति भावः दर्वीमुक्त्वाऽधुनेन्द्रमाह— (शतक्रतो) शतं क्रतवो श्रद्धालुजनसमृद्ध्यर्थं विविधानि अनुष्ठेयकर्माणि यस्य स शतक्रतुरिन्द्रः । हे इन्द्र! (वस्नेव) वस्नम् मूल्यम् । मूल्येनेव । 'वस्ना' इति 'सुपां सुलुक्'० (पा. ७,१,३९) इत्यादिना तृतीया-विभक्तेः पूर्वसवर्णः । बस निवासे (१००५) भौवादिकः परस्मैपदी । अस्मात् 'धापॄवस्य-ज्यतिभ्यो नः' (उ ३, ६) इत्यनेन नः प्रत्ययः । प्रत्ययस्वरेण चान्तोदात्तः शब्दः । यथा वस्तुविनिमयेन मूल्येन वा कश्चिद् वणिक् पण्यं ददात्येवं वयमपि (इषम्) इदं हविःस्वरूपम् दर्वीपूर्णमोदनम् । (ऊर्जम्) हविष्यप्रदानफलस्वरूपं चित्ताऽभीप्सितं वरदानरूपं रसं च (विक्रीणावहै) आवाम् अध्वर्युयजमानौ परस्परादानभूतं विक्रयं करवाव । डुक्रीञ् द्रव्य-विनिमये (१४७३) क्रैयादिकः उभयपदी । विपूर्वो द्रष्टव्यः । लोटि आत्मनेपदे उत्तमपुरुषे द्विवचनस्य रूपमिति । वयं तुभ्यं हविष्यान्नं समर्पयामः, त्वं च श्रद्धोपनतोऽस्मभ्यमभीष्ट-फलं देहीति वस्तुविनिमय इति देवयाजिनः

आत्मयाजिनस्तु—(दर्वि) इन्द्रियहव्यसम्प्रदानकारणीभूते प्राणाधिष्ठातृदेवते! (पूर्णा) इन्द्रियशक्तिस्वरूपेण हव्येन सम्पन्ना त्वं (परा) परशक्तिस्वरूपा (पत) मानसात्मानं प्रति गच्छ। (सुपूर्णा) मानसात्मना चात्यन्तं परिपूर्णा सती (पुनर् आपत) ब्रह्माणि पुनर्गच्छ। (शतक्रतो) मन्त्रशास्त्ररूढ्या 'श्' शिवः, 'अः' विष्णुः, 'तः' ब्रह्मा एते त्रयो देवा शतं क्रतवः संकल्पसृष्टिर्यस्य स शतक्रतुर्महाविष्णुः । हे महाविष्णो ! (वस्नेव) मूल्येनेव (इषम्) प्राणं जीवं वा 'अन्नं हि प्राणः' (शत. २, २, १, ७) इति श्रुतेः । 'जीवं वै देवानां

हविरमृतममृतानाम् (शत, १. २, १, २०) इति श्रुतेश्च। (ऊर्जम्) मोक्षरूपं रसं (विक्रीणावहै) परस्परं द्रव्यादानप्रदानस्वरूपं विक्रयं करवावहै। अहं तुभ्यं प्राणं जीवं वा समर्पयामि त्वं मह्यं प्रसन्नो मोक्षं देहीति भाव इति।

दर्वि भोजनपरिवेषणसाधिके! पश्चात् सरलहस्तका अग्रे चतुरङ्गुलनिम्नप्रदेशा काष्ठादिमयी पात्रिका या भोक्तॄणां भोजनसमये परिवेषणायोपयुज्यते। दर्वी दीर्णवती, दीर्णावयवा, दृढावयवाः वा इति हि तन्निरुक्तिः। अपि वा दलनात्। तथा हि बुभुक्षूणां परिवेषणेन क्षुधा दल्यते। (पूर्णा) स्थालीं प्रवेश्य अन्नभृता सती भोक्तृभ्यः (परापत) प्रत्यावर्तस्व। पुनः वारं वारं, वीप्सार्थगर्भितः पुनः शब्दः। (सुपूर्णा) अतिशयेन शोभनान्नादिभृता (आपत) आगच्छ धौम्योपदिष्टयुधिष्ठिरानुष्ठितसूर्याराधनेन सूर्याल्लब्धा अक्षय्यभोजनस्थली यावद् द्रौपदी न भुङ्क्ते कृत्स्नस्यापि विश्वस्य परितर्पणक्षमा। तस्यां दर्व्यां सहस्रशोऽपि ओदनाद्यादाने सा न क्षीयते स्म स्थाली इति भावः। वस्ना वस्नेन विभक्तेराकारः, मूल्येन इव (विक्रीणावहै) विक्रीणीमहे वयं सपत्नीकाः पाण्डुतनयाः। (शतक्रतो) सहस्वन् इन्द्र। (इषम) अन्नम् (ऊर्जं) बलं दध्यादिरसं वा विशेषेण सम्पादयामः विपूर्वकक्रीणातिरत्र सम्पादनकर्मा। यथा मूल्येन किंचिद् आत्मसात् क्रियते तथा भास्कराराधनेन इयम् अक्षय्यस्थाली लब्धेति भावः। वस्नः वसति येन 'धापॄवस्यज्यतिभ्यो नः (उ० ३।६) इति वसेर्नप्रत्ययः।

ओदनहवनम्

'देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा" ॥५०॥

अस्यां पञ्चाशयां कण्डिकायां 'देहि मे' इत्येक एव मन्त्र ओदनहवनार्थः। अस्य और्णवाभ ऋषिः, भुरिग् अनुष्टुप् छन्दः, इन्द्रो देवता (शत. २, ५, ३, १९; का. श्री. ५. ७, २४)

स्थाल्याः सकाशात् दर्व्योदनादानं पूर्वमन्त्रे उक्तम्। तम् हविष्यादानाऽभीष्टफलप्रतिदानकारिणे इन्द्राय जुहोति—तत्र तावत् इन्द्रः प्रतिदाता दातारं यजमानं पूर्वमाह— हे यजमान! (देहि मे) श्रद्धोपनतं हविष्यान्नं पूर्वं मह्यं समर्पय। (ददामि ते) ततः प्रीतोऽहमपि तुभ्यमभीष्टफलं दातास्मि। विक्रयस्यैष एव सामान्यः प्रकारो मूल्यमादाय पण्यदानमिति। यजमानश्रद्धयाऽत्यन्तमनुकूल इन्द्रः पुनराह—(मे) मह्यम् (निधेहि) भो यजमान! स्वहविष्यं नितरां सम्यक् धेहि सम्पादय। अहं (ते) तुभ्यम् (निदधे) अभीष्टफलं सम्यक् सम्पादयितास्मीति। मन्त्रार्धेनोक्तो यजमानो मन्त्रशेषेणेन्द्रं प्रत्याह—हे इन्द्र! त्वं (निहारं

च) देयमभीष्टफलं निहृत्य अवचित्याऽवचित्य । निपूर्वकाद् हरतेर्णमुलन्तस्येदं रूपम् । नितरां ह्रियत इति निहारो घञन्तः क्रेतव्यपदार्थपर्यायः शब्द इतीवाभिमन्यमानो महीधरः स्वरदोषादमान्यः । (मे) मह्यं (हरासि) ददासि । अहमपि कृतज्ञत्वप्रतिपन्नः (ते) तुभ्यम् इन्द्राय (निहारम्) निहृत्य चित्वा चित्वा यत् मत्समोपे सर्वोत्तमं देयं द्रव्यं तत् (निहराणि) निःशेषेण नितरां वा समर्पयानि (स्वाहा) मदोयमिदं हव्यं स्वाहुतमस्त्विति देवयाजिनः ।

अस्मिन्नष्टमे साकमेधाऽनुवाके द्वयोः कण्डिकयोः (एकोनपञ्चाशयां, पञ्चाशयां च द्वावेव मन्त्रौ । तयोः क्रमशः १ स्थाल्या ओदनरूपचरुग्रहणं, २ ओदनहवनं च द्वे कर्मणी वर्णिते । अष्टस्वनुवाकेषु पञ्चाशीं कण्डिकां यावत् समुदिता मन्त्रसंख्या ६४ ।

आत्मयाजिनस्तु—महाविष्णुः प्रत्याह हे योगिप्रवर ! त्वं (मे) मह्यं (देहि) जीवस्वरूपं हविष्यं समर्पय । अहमपि (ते) तुभ्यं भक्तप्रवराय (ददामि) मोक्षसिद्धिं ददामि । (मे) मयि (निधेहि) नितरां स्वात्मानं धारय । (ते) त्वयि (निदधे) अहमपि स्वात्मानं धारयामि । एवमुक्तो योगी प्रत्युवाच (निहारम्) श्रद्धामूल्येन क्रेतव्यं मोक्षाख्यं फलम् (मे) मह्यं भक्तायानुरक्ताय (हरासि) प्रददासि (निहारम्) मोक्षमूल्यं स्वात्मानं च सश्रद्धं (ते) तुभ्यम् (निहराणि) नितरां समर्पयानि । (स्वाहा) 'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन' (बृ. उ. ४, ४, १९) महावाक्येन इदं संपत्स्यत इति ।

सात्वतास्तु—दध्यादिकं विक्रेतुकामो गोपिकागणः वृन्दारण्यात् मधुपुरीं प्रस्थितो मध्येमार्गं सङ्गतेन कृष्णेन दध्यादिकं याचितः कथयति 'देहि' इति । अयि! कृष्ण त्वं प्रथमं (मे) मह्यं (देहि) स्वपादपद्मानुरागं सदा सन्निधिवसनं वा, ततः परं अहं गोपिकागणः (ते) तुभ्यं दध्यादिकं सर्वं (ददामि) प्रयच्छामि । किञ्च त्वं (मे) मम शिरसि स्वकरसरोरुहं (धेहि) स्थापय । ततः परं अहं गोपी-गणः, (ते) तव हस्ते आत्मीयं सर्वस्वं (निदधे) स्थापयामि अर्पयामि आत्मानं निवेदयामि अपि च, (निहारं) नितरां ह्रियते इति निहारः अनन्यभावस्तं (हरासि) हरसि प्रापयसि (मे) माम् । अहं गोपिकागणः (निहारं) नितरां हरणीयं प्रापणीयं सम्पादनीयं वस्तुजातं श्रीचरणयोः (निहराणि) प्रापयामि, धनम् मनः शरीरं वा भवद्हस्ते निवेदयामि । भगवान् अनुमोदते— 'स्वाहेति' गोपीगणः सु आह साधु ब्रूते आ समन्तात् सर्वथेत्यर्थः ।

अपि वा साधकेन गुरुदेवाय देवाधिदेवपरमेश्वराय च तनुमनोधनानि समर्पणीयानि इति साधनाविदां समयः । अत एव जनको भूपतिरष्टावक्राय स्वाचार्याय तत् त्रयमर्पयाञ्चकार । श्रूयते च बृहदारण्यकोपनिषदि 'नमस्तेऽस्त्विमे विदेहा अयमहमस्मि' इति (बृहदा० ४, २, ४) जनपदवाचिविदेहग्रहणं राज्यधनाद्युपलक्षकम् । अहमिति पदेन जीवोपाधिभूते शरीर-

मनसी निर्दिष्टे । लब्धविद्यो राजा जनकः स्वाचार्याय याज्ञवल्क्याय शरीरं मनः धनञ्च गुरुदक्षिणारूपेण ददावित्यर्थः । तदित्थं निश्चीयते अस्मिन्मन्त्रे प्रथमचरणेन धनस्य, द्वितीयचरणेन मनसः, उत्तरार्धेन च शरीरस्य समर्पणमिति भावः ।

६. पैतृकाऽनुवाकः

[1]"अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ।। य. ३।५१ ।।

१. पितृयजनार्थम् आहवनीयोपस्थानम्

अस्यामेकपञ्चाशयां कण्डिकायां 'अक्षन्०' इत्यृगात्मक एक एव मन्त्रः पितृयजनार्थः, अस्य गोतम, ऋषिः विराट् पङ्क्तिश्छन्दः, इन्द्रो देवता (शत. १, ६, १, ३८; का. श्रौ. ५, ६, १६) ।

साकमेधपर्वान्तर्गतपितृयज्ञाख्ये कर्मण्याहवनीयमग्निं द्वाभ्यामिन्द्रदेवत्याभ्याम् ऋग्भ्यामुपतिष्ठन्ते । यज्ञोपवीतिनः सर्वे निष्क्रम्योदञ्चः 'अक्षन्नमीमदन्त' इत्याहवनीयमुपतिष्ठन्ते द्वाभ्याम् (का. श्रौ. ५, ६, १६) इति कात्यायनोक्तेः ।

(हि) यस्मात् कारणात् मम पितरः (अक्षन्) अस्मिन् पितृयज्ञाख्ये कर्मणि श्रद्धया मयोपनतमन्नं आश्नन् । अद भक्षणे (१०११) आदादिकः परस्मैपदी । तस्य लुङि प्रथमपुरुषबहुवचने 'लुङ्सनोर्घस्लृ' (पा. २, ४, ३७) इत्यनेन अत्तेः 'घस्लृ' आदेशः । 'मन्त्रे घसह्वर०' (पा. २, ४, ८०) इत्यादिना च्लेर्लुकि 'गमहनजनखनघसां' (पा. ६, ४, ९८) इत्यनेन घसेर् उपधालोपे 'खरि च' (पा. ८, ४, ५५) इति घस्य चर्त्वेन कुत्वे 'शासिवसिघसीनां च' (पा. ८, ३, ६०) इत्यनेन घसेः सस्य षत्वे, कषयोः संयोगे क्षे अक्षन् इति रूपम् । मदीयं दत्तं कव्यं चाऽशित्वा ते (अमीमदन्त) प्रहृष्टाः । मद तृप्तियोगे (१७०६) चौरादिकः उभयपदी । अस्य प्रथमपुरुषबहुवचने रूपमिदम् । (प्रियाः) प्रीताः च (अव अधूषत) स्वीयानि शिरांसि अधस्तात् कम्पितवन्तः । अवधूननं नाम कव्यस्वीकारार्थमधस्तात् शिरःकम्पनम् । धूञ् कम्पने (१४८७) क्रैयादिकः उभयपदी । अस्मात् लुङि प्रथमपुरुषबहुवचने सिचि छान्दसो गुणाऽभावः । (स्वभानवः) स्वयंप्रकाशाः स्वो भानुः दीप्तिर्येषां ते बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः । (विप्राः) मेधाविनश्च ते पितरः । (नविष्ठया) नवनवोन्मेषशालिन्या । अतिशयेन नवा नविष्ठा । अतिशायने इष्ठन् प्रत्ययः । (मती) मत्या स्तुत्या 'सुपां सुलुक्०' (पा. ७, १, ३९) इत्यादिना

१—ऋग्वेद १, ८२, २ ।

तृतीयायाः पूर्वसवर्णः (अस्तोषत) स्तुतवन्तः । ष्टुञ् स्तुतौ (१०४३) आदादिक उभयपदो, अस्माल्लुङि प्रथमपुरुषबहुवचने रूपम् । पुत्रनप्तृभिः श्रद्धया समर्पितेन स्वादिष्ठेन कव्येन वयं प्रीताश्च तृप्ताश्च स्म सम्पन्ना इत्युक्तवन्त इत्यर्थः । अथवा कव्यदातार एव पितॄन् दृष्ट्वा प्रसन्नतातिशयेन सुदीप्तमुखाः सुप्रज्ञाः नवनवया स्तुत्या तान् स्तुतवन्त इति पितॄन् संतर्प्य अधुनेन्द्रं सम्बोधयन्ति—(इन्द्र) पितृयज्ञसाङ्गतासिद्धचर्थं हे मघवन् (नु) क्षिप्रं अधुनैव 'नु' इति क्षिप्रनाम (निघ. २, १५, १) । (ते) तवात्मीयौ (हरी) हरितौ अश्वौ (योजा) रथे संयोजय । युजिर् योगे (१४४४) रौधादिकः उभयपदी । अस्मात् ण्यन्ताल्लोटि मध्यमपुरुषैकवचने छान्दसं शप आर्धधातुकत्वं तन्निमित्तो णिलोपश्च । 'द्व्यचोऽतस्तिङः' (पा. ६, ३, १३५) इत्यनेन संहितायां दीर्घत्वे योजा इति, पादादित्वाद् अतिङः परत्वा भावात् 'तिङ्ङतिङः' (पा. ८१, २८) इति तिङ् निघातो न प्रवर्तते । भो इन्द्र ! रथे हरी योजय, तृप्तैः पितृभिस्त्वमपि यथास्थानं गच्छेति देवयाजिनः ।

आत्मयाजिनस्तु– (स्वभानवः) स्वः आत्मैव भानुर्दीपको येषां ते (विप्राः) प्राज्ञाः मनोवृत्तयः (अक्षन्) इन्द्रियरूपाणि हवींषि भक्षितवन्तः । (नविष्ठया) नवनवया संस्कृते- न्द्रियहविषा (अमीमदन्त) तृप्तिं प्राप्ताः । (हि) यस्मात् (प्रियाः) तनूः (अवाधूषत) अव- कम्पितवन्तः । तृप्ता वयमिति सूचितवन्तः (अस्तोषत) स्तुतिं च चक्रुः । अतः (इन्द्र) हे समर्थमहाविष्णो ! (नु) क्षिप्रमेव (ते) तव (मती) मन्त्रशास्त्रदृशा मः मानसभास्करः जीव इत्यर्थः बुद्धिरूपमनोऽवच्छिन्नस्यैव चैतन्यस्य जीवत्वात्, तः तस्येशः, जीवेशरूपौ (हरी) स्वांशौ (आ योज) संयोजयेति ।

सात्वतास्तु—इन्द्रेण समाहूतः तदादिष्टमातलिना उपवेश्य दिव्ये रथे स्वर्गं समानीतः तत्र उषित्वा पञ्चवर्षाणि शिक्षिताखिलदिव्यास्त्रविद्यः शक्रानुमतो धनञ्जयः चिरं प्रोषितः स्वं प्रतीक्षमाणान् सभार्यान् भ्रातॄन् उपजगाम । तमवलोक्य ते प्रमोदस्य परां काष्ठाम् ईयुः। तदानीमेव इन्द्रोऽपि युधिष्ठिरादिभिः संगन्तुम् इयेष, तदन्तिकमुपाययौ च । तदिदं वृत्तं व्याहरति मन्त्रोऽयमक्षन्निति ।

(अव) अवधार्य स्वसमीपमागच्छन्तं धनञ्जयं (प्रियाः) प्रिया च प्रियाश्चेति एक- शेषेण प्रिया द्रौपदी प्रियाः भीमादिभ्रातरः । (अमीमदन्त) मोदन्ते स्म । तान् विशिनष्टि (स्वभानवः) शौर्यातिरेकेण स्ववंशभास्कराः, कुलगौरवाधायकं जनमस्य कुलस्य भास्कर इति ब्रुवते लोकाः । प्रवृद्धतेजसा असति च प्रदीपादौ नक्तं तमस्यपि प्रकाशान्तरमनपेक्ष्य भास्वरगात्राः इति वा । 'मूढः परप्रत्ययनेयबुद्धिः' इति कविकुलगुरोः कालिदासस्य सुभा- षितमनुसृत्य परदर्शितमार्गगाः मूढाः अविवेकिनः, इमे तु न तथा किं तर्हि स्वभानवः स्वयं बुद्धया विविच्य कार्यकारिणः विवेवयग्रगण्या इति वा । (अधूषत)आनन्दातिरेकेण शिरांसि

चालितवन्तः । कीर्त्यते हि लोके अस्य प्रवक्तुः साधीयसी कथा । पुनः कीदृशाः (विप्राः) विशेषेण पूर्णाः विशिष्टगुणगणयुक्ताः । (नविष्ठया) नवतमया अति-नवीनया (मती) मत्या स्तुत्या । यामाकर्ण्य श्रोतृवर्गः शिरो धुनोतीति । राजसूयदिग्विजययात्रायां सपत्नान् वेपितवन्तः इति वा । चिरकालानन्तरसङ्गता अद्य सहोपविश्य(अक्षन्)भुक्तवन्तः सहभोजे सुखमनुभूतवन्तः, चिरप्रोषितः भ्राता धनञ्जयः अद्य अस्मदन्तिकमायातः । न केवलं एतावदेव अपितु विश्ववन्दितचरणो देवराजोऽपि निजागमनेन अस्माननुगृह्णाति। निजानुग्राहकं देवराजं मुक्तकण्ठम् (अस्तोषत) प्रशंसितवन्तः । ततः स्वाभिप्रायमाविष्कुर्वाणाः ऊचुः । (इन्द्र) भक्तवत्सल देवराज ! महान् भवदनुग्रहः अस्मासु (नु) क्षिप्रं अत्रागन्तुं (हरी) स्वाश्वौ रथे (योजा) योज युक्तवान् असि । तूर्णगामिभ्यां हयाभ्यां युक्ते रथे उपविश्य अस्मदन्तिकमुपतिष्ठसि इति भावः ।

[1]"सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि ।
प्र नूनं पूर्णबन्धुरः स्तुतो यासि वशाँ अनु
योजा न्विन्द्र ते हरी ॥" य. ३ ॥५२॥

आहवनीयोपस्थानम्

अस्यां द्वापञ्चाशयां कण्डिकायां 'सुसंदृशं त्वा०' इत्यृगात्मक एक एव मन्त्र आहवनीयोपस्थानः । अस्यापि गौतमः ऋषिः, विराट्पङ्क्तिश्छन्दः, इन्द्रो देवता (शत. १, ६, १, ३८; का. श्रौ. ५, ६, १६) ।

इन्द्रं प्रति वदन्ति— (मघवन्) हे अभीष्टफलरूपधनवन् ! पादादित्वात् आमन्त्रितस्याद्युदात्तत्वम् । (त्वा(त्वां (सुसंदृशं) सुष्ठु सम्यक् पश्यति भक्तान् सम्यग् अनुगृह्णाति सुसंदृक् । दृशिर् प्रेक्षणे (९८८) भौवादिकः परस्मैपदी । कर्तरि क्विप् प्रत्ययः । तादृशं (वयम्) (वन्दिषीमहि) स्तूयास्म । वदि अभिवादनस्तुत्योः (११) भौवादिकः आत्मनेपदी । तस्माद् आशीर्लिङि उत्तमपुरुषबहुवचने रूपम् । पूर्ववर्तिनः आमन्त्रितस्य 'मघवन्' इत्यस्याऽविद्यमानत्वात् 'तिङ्ङतिङः' (पा. ८, १, २८) इति तिङ्निघाताप्रवृत्तेः प्रत्ययस्वरेण 'महि' इति प्रत्ययस्याद्युदात्तत्वम् । (स्तुतः) अभीष्टफसिद्धिं कामयमानैः स्तोतृभिरस्माभिर्वन्दितः (नूनम्) निश्चयेन (पूर्णबन्धुरः) बन्धुरशब्दो रथनीडवाचकः । स्तोतृभ्यो भक्तेभ्यः प्रदेयैर्द्रव्यैः सम्पूर्णो बन्धुरो यस्य तथाभूतः (वशान्) उशन्ति कामयन्त इति वशाः । वश कान्तौ (१०८०) आदादिकः परस्मैपदी । 'नन्दिग्रहि०' (पा. ३, १, १३४)

१— ऋग्वेद १, ८२, ३ ।

इत्यादिना कर्तर्यच् प्रत्ययः। 'वृषादीनां च' (पा. ६. १. १३४) इत्यादिनाऽऽद्युदात्तत्वम्। अथवा उश्यते काम्यते इति वशः कामः। 'वशिरण्योरुपसंख्यानम्' (पा. वा. ३, ३, ५८) इति वार्तिकेन वष्टेः कर्मणि अप् प्रत्ययः। प्रत्ययस्य पित्त्वकृतेऽनुदात्तत्वे धातुस्वरेण वशशब्द आद्युदात्तः। कृपादृष्टिं कामयमानान् भक्तान्, भक्तकामनां वा (अनु) अनुलक्ष्य। 'निपाताः' (फिट् सू. ४।८०) इति निपातस्य 'अनु' इत्यस्याद्युदात्तत्वम्। (प्रयासि) प्रकर्षेण अत्यन्तं गच्छसि। 'व्यवहिताश्च' (पा १,४,८२) इति सूत्रेण छन्दसि व्यवहितस्याप्युपसर्गस्य प्रयोगात् 'प्र' इत्युपसर्गस्य व्यवहितस्यापि क्रियया सम्बन्धः। (इन्द्र ते हरी नु योजा) इति व्याख्यातचरम् इति देवयाजिनः।

आत्मयाजिनस्तु—(मघवन्)मन्त्रशास्त्रदृष्ट्या 'मः' ब्रह्मा 'अः' विष्णुः 'घः' शिवः मघैस्त्रिभिर्देवैर्युक्तो महाविष्णुर्मघवान् तत्सम्बोधनम् हे महाविष्णो! (वयं) योगमार्गप्रवृत्ता योगिनः (त्वा) त्वां (सुसंदृशम्) अनुग्रहदृष्ट्या सर्वेषां द्रष्टारं (वन्दिषीमहि) स्तुविषीमहि। (अः) महाविष्णुस्त्वम् (पूर्णबन्धुः) सपूर्णमित्रः सर्वहितः (अः) महाविष्णुः (स्तुतः) वन्दितः (वशान्) कामयमानान् योगिनः (अनु) लक्ष्यीकृत्य (नूनम्) अवश्यं (प्रयासि) प्राप्नोषि। (इन्द्र) इं कामं द्रावयतीति इन्द्रः तत्सम्बुद्धौ। हे कामनाशक महाविष्णो! त्वं (नु) क्षिप्रं (ते) तव (हरी) आभासभूतौ जीवेशौ स्वांशौ (आयोज) स्वात्मनि लीनौ कुरु इति।

सात्वतास्तु—नमस्कारादिना सत्कुर्वन्ति-सुसंदृशमिति 'सु' शोभना हितकरी 'सं' समीचीना स्नेहपरिप्लुता 'दृक्' दृष्टिर्यस्य तथाभूतम्। अथवा 'सु' शोभनेन रूपेण 'सं' समीचीनेन लावण्येन च दृश्यमानं रूपलावण्याभ्यां कमनीयगात्रम्, रूपं गौरादिवर्णः, सर्वाङ्गसौष्ठवं लावण्यमिति तद्भेदः (त्वा) त्वां (वयं) सर्वे (मघवान्) पूजनीय विविधधनसम्पन्न वा इन्द्र (वन्दिषीमहि) सश्रद्धं नमस्कुर्मः। छन्दसि कालानियमात्। नूनं निश्चितं (पूर्णबन्धुरः) पूर्णधनदाता पूर्णधनस्वामी। बन्धुरिति धननाम (निघ० २, १०, २१) तं लाति बन्धुलः ला आदाने'(अदादिः परस्मैपदी) रलयोरैक्यात्। बन्ध-बन्धने(क्रैयादिकः परस्मैपदी) ततः औणादिकः उप्रत्ययः। बध्नात्यनेन भृत्यादीन् इति। यद्वा बन्धुरिव बन्धुरिति देवराजः। (स्तुत) कृतगुणानुवादः। अतएव प्रहृष्टः(वशान्)स्वाधीनान् स्वं कामयमानान् वा स्वोपासकान् वा। (प्रयासि) प्रकर्षेण दयाऽतिरेकेण अनुगृहीतान् यासि गच्छसि तेषामन्तिकम्। योजा इति पादो व्याख्यातपूर्वः। अरण्यपर्वणि महाभारते द्विषष्टितमेऽध्याये वृत्तमिदमनुसन्धेयम्।

[1]"मनो न्वाह्वामहे नाराशंसेन स्तोमेन।
पितॄणां च मन्मभिः ॥" य. ३ ॥५३॥

---

१ ऋग्वेद १०, ५७, ३।

गार्हपत्योपस्थानम्

अस्यां त्रिपञ्चाशयां कण्डिकायां 'मनो न्वाह्वामहे'– इत्यृगात्मक एक एव मन्त्रो गार्हपत्याग्न्युपस्थानः । अस्य बन्धुर्ऋषिः, अतिपादनिचृद्गायत्री छन्दः, मनो देवता (शत. १, ६, १, ३९; का. श्रौ. ५, ६, १७)।

अथानन्तरं तिसृभिः ऋग्भिर्गार्हपत्याग्निमुपतिष्ठन्ते– (मनः) पितृध्यानापन्नं स्वं चित्तं (नु) क्षिप्रं तत्कालमेव वयं (आह्वामहे) आह्वयामः, अथवा मनोऽभिमानिदैवतमाह्वयामः । आह्वयामहे इत्यस्य स्थाने आह्वामहे इति छान्दसं रूपम् । केन साधनेन मन आह्वयामः, (नाराशंसेन) नरान् यूयं पुत्रादिसन्तानवन्तो धनवन्तो दीर्घायुष्यवन्तश्च भूयास्तेति शंसति नराशंसः तत्सम्बन्धिना (स्तोमेन) स्तोत्रेण । स्तोत्रं खलु द्विविधम् । दैवं मानुषं च । येन देवान् स्तुवन्ति तद् दैवं स्तोत्रम् । नरान् येन प्रशंसन्ति तन्नाराशंसाख्यं स्तोत्रम् । (च) तथा (पितॄणाम्) (मन्मभिः) मननीयैः स्तोत्रैः मन्यन्ते ज्ञायन्ते यैस्तानि मन्मानि तादृशैः पितृप्रसादकारिभिः स्तोत्रैः स्वं मन आह्वयाम इति देवयाजिनः।

आत्मयाजिनस्तु– यदि योगोक्तमन्त्राणां प्रयोगो न स्यात् तर्हि योगिनो देहपातः सम्भवेत् । तस्मात् प्रारब्धसमाप्तिं यावत् प्रार्थयते– (नाराशंसेन) नर आत्मा ततो जातं मनो नारं, तस्य आशंसः प्रशंसा, मनोयोग्यः शंसो नाराशंसः तेन (स्तोमेन) स्तोत्रेण (च) (पितॄणाम्) मनोवृत्तीनां 'मनः पितरः' (शत. १४, ४, ३, १३) । (मन्मभिः) आकाङ्क्षिताभिः वाग्भिः (नु) क्षिप्रम् (मनः) मनोऽभिमानिदैवतम् (आह्वामहे) आह्वयाम इति ।

सात्वतास्तु–विदूषिताम्बुपानेन गोभिः सहितान् गोपालान् उद्दिश्य उक्तिरेषा-मनो नु इति। व्रजवासिभिः कृतानुरोधः श्रीकृष्णः विदूषितपयःपानेन मृतान् पुनरुज्जीवयितुकामः कथयति; भो व्रजवासिनो न खिद्यध्वम्, अहम् अधुनैव एतेषु मृतशरीरेषु विषप्रकोपेन निर्गतं (मनः) अन्त.करणम् सप्तदशतत्त्वात्मकं सूक्ष्मशरीरम् । (आह्वामहे) आह्वयामः । 'अस्मदो द्वयोश्चेति बहुवचनम्' आह्वयामि इत्यर्थः । केन (नाराशंसेन) आशंसनं आशसा, आङः शसि इच्छायाम् (भ्वा.आ. ६२९)ततः 'गुरोश्च हलः' इति स्त्रियां 'अ' प्रत्ययः टाप् आशंसा भावि शुभाशंसनं नराणां मनुष्याणां सा नराशंसा तस्या अयं नाराशंसः मनुष्याभिलाषपूरकस्तेन (स्तोमेन) मम अमृतवर्षिदृष्टिपातसमूहेन तन्मात्रेण (पितॄणां) पितृतुल्यानां व्रजौकसां वयोवृद्धानां (मन्मभिः) आकाङ्क्षाभिः ज्ञानवाचिनो मन्धातोः ज्ञानकार्ये अभिलाषे प्रयोगः । मम मृता पुत्राः गावश्च जीवेयुरिति वयोवृद्धानामनुरोधात् दृष्टिपातमात्रेण प्रोषितं तेषां लिङ्गशरीरं समाहूय मृतशरीरेषु चानुप्रविश्य सम्प्रत्येव गोभिः सहितान् तान् गोपान् पुनर्जीवयामि इति भावः ।

वीक्ष्य तान् वै तथाभूतान् कृष्णो योगेश्वरेश्वरः ।
ईक्षयामृतवर्षिण्या स्वनाथान् समजीवयत् ॥ (भा० १०, १५, ५०)

अत्रेदं बोध्यम्, आङः शसि इच्छायां (भ्वा० आ० ६२९) तस्य आशंसते आशंसाते इत्यादि रूपम् । आङः शासु इच्छायाम् (अदा० आ० १०२२) तस्य आशास्ते आशासाते इत्यादि रूपम्, 'शंसु स्तुतौ' (भ्वा० प० ७२८) तस्य प्रशंसामि इत्यादिकं रूपम् । 'आङः शासु इच्छायां' इत्यत्र आङः पूर्वत्वं न सार्वत्रिकं, तथा निर्देशस्तु प्रायिकत्वाभिप्रायेण तस्मात् 'नमोवाकं प्रशास्महे' प्रशासा प्रशासनम् इत्यादिकं सिद्ध्यतीति ।

गार्हपत्याग्न्युपस्थानम्

" 'आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे" ॥ (य० ३।५४)

अस्यां चतुःपञ्चाशयां कण्डिकायाम् 'आ न एतु.' इत्यृगात्मक एक एव मन्त्रो गार्हपत्याग्न्युपस्थानः । अस्य बन्धुर्ऋषिः, विराड् गायत्री छन्दः, मनो देवता (शत० १, ६, १, ३९; का. श्री. ५, ६, १७) ।

(नः) अस्माकं (मनः) चित्तं (पुनः) पौनःपुन्येन (क्रत्वे) यज्ञं कर्तुं संकल्पशक्तिलाभाय, क्रतवे इति प्राप्ते 'तन्वादीनां छन्दसि बहुलम्' (पा. वा. ६, ४, ८६) इति यणादेशः । (दक्षाय) संकल्पशक्तेः समृद्ध्यै ।' स यदेव मनसा कामयते इदं मे स्याद् इदं कुर्वीयेति, स एव क्रतुः, अथ यदस्मै तत् समृध्यते स दक्षः' शत. ४, १, ४, १) इति श्रुतेः । (जीवसे) जीवितुं च । जीव प्राणधारणे । (५६२) भौवादिकः परस्मैपदी । 'तुमर्थे सेसेनसे०' (पा ३, ४, ९) इति सूत्रेण तुमर्थे असे-प्रत्ययः । प्रत्ययस्वरेण मध्योदात्तत्वम् । (च) तथा (ज्योक्) चिराय, ज्योग् इति निपातश्चिरवाची । (सूर्यम्) भास्करं (दृशे) द्रष्टुम् ।' 'दृशे विख्ये च' (पा. ३. ४, ११) इत्यनेन तुमर्थे केप्रत्ययः । प्रत्ययस्वरेणाऽन्तोदात्तत्वं च । अथवा चिरं जीवितुम् अतएव सूर्यं द्रष्टुमित्यन्वयः । (आ एतु) आयातु । उपसर्गक्रियावचनयोर्व्यवहितयोरपि सम्बन्ध इत्याभीक्ष्ण्येन व्याख्यातम् । पितृसंनिधौ गतमस्मदीयं मनः शुभसंकल्पेन देवकर्मनिर्वर्तनाय अस्माकं चिरजीवनाय सुखं सूर्यदर्शनसामर्थ्यलाभाय च पुनरागच्छत्विति देवयाजिनः ।

आत्मयाजिनस्तु—(नः) अस्माकं योगिनां (मनः) चेतः (क्रत्वे) योगयागं सत्संकल्पेन

---

१ ऋग्वेद १०, ५७, ४ ।

निर्वर्तयितुं (दक्षाय) संकल्पस्य समृद्धये (ज्योक्) आ प्रारब्धपरिसमाप्तेः (जीवसे) जीवितुम् (च) तथा (सूर्यं दृशे) समाधौ ब्रह्म द्रष्टुं (पुनः) भूयः (आ एतु) आगच्छत्विति ।

सात्वतास्तु—युधिष्ठिरदत्तस्वप्रश्नोत्तरतुष्टहृदयो यक्षः वरं वृणीष्व इति युधिष्ठिरम् अब्रवीत् । युधिष्ठिरः तत्र गतासून् भ्रातॄन् प्राणयितुकामः यक्षमुवाच, ताम् इमां कथां सूचयत्ययं मन्त्रः- आ न इति । (नः) अस्माकं भ्रातॄणां भवदादेशोल्लंघनकारणात् तच्छरीरविनिर्गतं चैतन्यसम्पादकं (मनः) लिङ्गशरीरं (पुनः) (आ एतु) तत्र प्रत्यागच्छतु, तेषां शरीरेषु पुनः प्रविशतु इति यावत् । (क्रत्वे) क्रतवे पूर्ववत्, दिग्विजयानीत-धनैर्यज्ञसम्पदनाय श्रौतकर्मार्थमित्यर्थः । किञ्च (दक्षाय) स्मार्तपूर्तदत्ताख्यकर्मसमर्थाय परोपकारप्रधानाय (जीवसे) जीवनाय, यथा ते जीविताः सन्तः परेषामुपकाराय श्रौतस्मार्तञ्च कर्मानुतिष्ठेयुः । तदपि जीवनं दीर्घकालिकम् अर्थये तदेतदाह (ज्योक्च सूर्यं दृशे), चिरं सूर्यं द्रष्टुं यावत् चन्द्र-दिवाकरौ जीवेयुर्ममानुजाः इति भावः ।

[1]"पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातं सचेमहि ।।" य. ३।५५ ।।

गार्हपत्याग्न्युपस्थानम्

अस्यां पञ्चपञ्चाशयां कण्डिकायाम्, 'पुनर्नः पितरः'— इत्यृगात्मक एक एव मन्त्रो गार्हपत्याग्न्युपस्थानः । अस्य बन्धुर्ऋषिः, निचृद्गायत्री छन्दः, मनो देवता (शत. १, ६ १, १९; का. श्रौ. ५, ९, १७) ।

(नः) अस्माकं (मनः) चित्तं पितृगतं (पितरः) ददतु प्रत्यावर्तयन्त्विति शेषः । (दैव्यः) देवसंबन्धी 'देवाद्यञञौ' (पा. वा. ४, १, ८५) इति वार्तिकेन सम्बन्धार्थे देवशब्दाद् यञ् प्रत्ययः । ञित्वाद् आद्युदात्तत्वम् । (जनः) पुरुषः अस्मभ्यं मनः (ददातु) प्रत्यावर्तयतु । पितरः स्वात्मगतं अस्मदीयं मनः देवाश्च स्वगतम् अस्मदीयं मनः प्रत्यावर्तयन्त्विति भावः । किमर्थं मनःप्रत्यावर्तनं प्रार्थ्यते । यथा (जीवम्) जीवन्तम् । कर्तरि अच् प्रत्ययः (व्रातम्) पुत्रपौत्रभार्यापश्वादिकं जीवल्लक्षणं संघं (सचेमहि) सेवेमहि । षच सेवने (१६३)भौवादिकः आत्मनेपदी । ष्वञ्ज परिष्वङ्गे (९७६) भौवादिकः आत्मनेपदी इत्यतः 'सचेमहि' इति रूपं सिषाधयिषन् उव्वटश्चिन्त्य इति देवयाजिनः ।

आत्मयाजिनस्तु— (पितरः) मनोवृत्तयः अस्मभ्यम् (मनः) (पुनः) प्रत्यावर्तयन्तु । (दैव्यः) ब्रह्मसम्बन्धी (जनः) नरोत्तमः (नः) अस्मभ्यम् मनः (पुनः) (ददातु) प्रत्यावर्तयतु ।

---

१. ऋग्वेद- १०, ५७ ५ ।

येन (जोवम्) जीवांशभूतम् (व्रातम्) इन्द्रियगणम् (सचेमहि) सेवेमहीति।

सात्वतास्तु—(पितरः) पितः आदरार्थं बहुवचनम्। न त्वं यक्षः किं तर्हि मम पिता धर्म एव अलं गोपनेन इति पितृपदेन व्यज्यते। (दैव्यः) लोकोत्तरः निगूढस्वस्वरूपः (जनः) अन्तर्भावितणिजर्थोऽत्र जनिः, जनयिता इत्यर्थः। भवान् निष्कासितं (मनः) तदुपाधिकं लिङ्गशरीरावच्छिन्नं जोवं मद्भ्रातॄणां (पुनः ददातु) प्रत्यावर्तयतु, मृतेषु तद्देहेषु यथापूर्वं तं स्थापयतु इति भावः। युधिष्ठिरेण तत्स्वरूपेऽवगते धर्मोऽप्यन्ते 'अहं धर्मः' एवेति अभ्युपजगाम। स्पष्टमिदमरण्यपर्वान्तिवर्तिनि यक्षप्रश्नपर्वणि। पश्चात् करुणया उज्जीवितेषु धर्मेण भीमादिषु युधिष्ठिरो ब्रूते। (व्रातं) व्रतमिति कर्मनाम तत्सम्बन्धि व्रातं त्वदनुमतकर्तव्यपथे स्थितं, (जोवं) जीवनं वयं सर्वे भ्रातरः (सचेमहि) सेवेमहि अनुतिष्ठेम। न कदापि धर्म-मार्गात् भ्रंशामहे।

दक्षिणाग्न्युपस्थानम्

[1]"वयं सोम व्रते तव मनस्तनूषु बिभ्रतः।
प्रजावन्तः सचेमहि"। (य० ३।५६)॥

अस्यां षट्पञ्चाशयां कण्डिकायाम् 'वयं सोम०' इत्यृगात्मक एक एव मन्त्रः दक्षिणाग्न्युपस्थानः। अस्य मन्त्रस्याऽग्न्युपस्थानेऽवमार्जने विनियोगः इति सायणः (तै० ब्रा० २, ४, २, ७)। अस्य बन्धुर्ऋषिः, गायत्री छन्दः, सोमो देवता (शत० २, ६, २, १०; का. श्रौ. ५, ६, ५)।

'पितृदेवत्यो वै सोमः' (शत० २, ४, २, १२)। 'सोमाय पितृमते स्वाहा' (यजु० २, २९; शत. २, ४, २, १३) इति दर्शनात् पितृकर्मणि समाराधनीयां सोमाख्यां देवतां सम्बोधयति—(सोम) हे तदाख्य देव! (वयं) यजमानाः (तव) त्वदीये (व्रते) कर्मणि, व्रतमिति कर्मनाम (निघ० २, १, ७)। संलग्नाः (तनूषु) जाग्रत्-स्वप्नसुषुप्तिस्वरूपास्ववस्थासु यद्वा पितृशरीरेषु (मनः) आत्मनश्चित्तं (बिभ्रतः) धारयन्तः, डुभृञ् धारणपोषणयोः (१०८७) जौहोत्यादिकः उभयपदो। शत्रन्ते 'उभे अभ्यस्तम्' (पा. ६, १, ५) इत्यभ्यस्तसंज्ञायां 'नाभ्यस्ताच्छतुः' (पा. ७ १, ७८) इति नुमो निषेधः। 'अभ्यस्तानामादिः' (पा. ६, १, १८९) इत्याद्युदात्तत्वम्। जाग्रत्स्वप्नसुषुप्तिषु तिसृषु दसासु स्वस्थचेतसो यद्वा पितृसेवासमर्पितशरीरक्रियासु मनः सावधानं कुर्वन्त इति भावः (प्रजावन्तः) पुत्रादिसन्तानवन्तः (सचेमहि) सेवेमहि सांसारिकान् भोगानिति देवयाजिनः।

१ ऋग्वेद १०, ५७, ६। प्रजावन्तः अक्षीमहि इति तै० ब्रा० (२, ४, २, ७)

अस्मिन् पैतृके नवमाऽनुवाके षट् कण्डिकाः (एकपञ्चाशीमारभ्य षट्पञ्चाशीं यावत्) तासु षडेव मन्त्राः। ते च षड् ऋचः। तत्र यथाक्रमं द्वाभ्यां मन्त्राभ्याम् आहवनीयाग्न्युपस्थानं, त्रिभिर्मन्त्रैः गार्हपत्याग्न्युपस्थानं, एकेन मन्त्रेण दक्षिणाग्न्युपस्थानम् इति कर्माणि वर्णितानि। नवस्वनुवाकेषु षट्पञ्चाशीं कण्डिकां यावत् समुदिता मन्त्रसंख्या ७०।

आत्मयाजिनस्तु–(सोम) हे आत्मप्रतिबिम्ब ! 'सोमो वै भ्राट्' (शत० ३, २, ४, ६) इति श्रुतेः। (प्रजावन्तः) प्राणवन्तः, 'प्राणः प्रजाः' (शत० १४, ४, ३, १४) (वयं) योगिनः (व्रते) आत्माहुतिकर्मणि (तव) त्वदीयेषु (तनूषू) इन्द्रियेषु (मनः) (बिभ्रतः) धारयन्तः (सचेमहि) प्रारब्धपरिपाकपर्यन्तं इन्द्रियाणि सर्वाणि सेवेमहि इति।

सात्वतास्तु– राज्ञीभिरभ्यर्थितः कृष्णः सद्गुरोः शैवाचार्यादुपमन्योर्गृहीतशैवदीक्षः धृततापसवेष भूतिभूषितगात्रः शंकरं प्रार्थयते वयं सोम इति।

(सोम) उमया पार्वत्या सहित त्रिपुरारे ! (तनूषु) ममताऽतिरेकेण संसर्गाऽध्यासात् गौणात्मसु सन्ततिषु पुत्रपौत्रादिषु (मनो बिभ्रतः) संलग्नचेतसः तत्प्राप्त्युत्कण्ठाभिलाषा वयं राज्ञ्यः अहं च सर्वे (प्रजावन्तः) लब्धप्रशस्तसन्ततयः (सचेमहि) त्वां सेवेमहि। त्वत्प्रसादाद् अस्माकं गृहे वीराः, दातारः, प्रभुभक्ताश्च पुत्रपौत्रादयः समुत्पद्यन्ताम् इति भावः। स्कन्दपुराणे शिवपुराणे च निबद्धा एषा कथा विस्तरेण तत एवावसेया।

अयमात्मा त्रिविधः मुख्यो, मिथ्या, गौणश्चेति, असङ्गसाक्षिसच्चिदानन्दाखण्डैकरसः प्रत्यक्कूटस्थादिशब्दव्यपदेश्यो मुख्यः, तेन तादात्म्याध्यासात् तद्भावभावापन्न इव शरीरेन्द्रियमनःप्राणाद्यन्नमयादिपञ्चकोशात्मा मिथ्यात्मा द्वितीयः। तदीया अनात्मपदवाच्याः गृहपुत्रादयः अतदात्मानोऽपि असंसृष्टा अपि वस्तुतः संसर्गाध्यासेन तत्तामापन्ना इव गौणात्मत्वेन व्यपदेश्या इति।

१० त्र्यम्बकाऽनुवाकः

"एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व।
स्वाहैष ते रुद्र भाग आखुस्ते पशुः ॥" य. ३।५७ ॥

१ अवदानहोमः २. पुरोडाशनिर्वापः

अस्यां सप्तपञ्चाश्यां कण्डिकायां द्वौ मन्त्रौ। प्रथमः 'एष ते' इति मन्त्रोऽवदानहोमार्थः। अपरः 'एष ते०' इति मन्त्रः आखूत्करे पुरोडाशनिर्वापार्थः। उभयोर्मन्त्रयोर्बन्धुः ऋषिः, रुद्रश्च देवता, छन्दसी भिन्ने। पूर्वस्य प्राजापत्या बृहती छन्दः, अपरस्य याजुषी जगती छन्दः (शत. २, ६, २, ९-१०; का. श्रौ. ५, १०, १०-११)।

एकस्या पात्र्यां पुरोडाशान् एककपालान् (एकस्मिन् कपाले संस्कृतान्) रुद्रदेवत्यान् एकाधिकान्, यजमानस्य कुटुम्बे सम्बन्धिषु च यावन्तः पुत्रभृत्यादयः पुरुषाः सन्ति तान् सर्वान् गणयित्वा प्रतिपुरुषं एकैकं पुरोडाशं निर्वापार्थं पृथग् रक्षित्वा तेभ्योऽतिरिक्तं (एकं पुरोडाशं पृथग् रक्षन्ति) एकं रक्षित्वा दक्षिणाग्नेर् एकमुल्मुकमादाय चतुष्पथे गत्वा तत्रोल्मुकं मध्ये स्थापयित्वा तत्र पलाशपत्राणां मध्यमेन पत्रेण जुहूस्थानीयेन पुत्रभृत्यादि-स्वजनानां नामग्राहम् एकैकं पुरोडाशम् 'एष ते०' इति मन्त्रेण यजमानो जुहोतीत्येष त्रैयम्बकहोमः। 'अम्बिका ह वै नामाऽस्य स्वसा। तयाऽस्यैष स्त्रिया सह भागस् तस्मात् त्र्यम्बका नामेति श्रुतेः। (शत. २, ६, २, ९)। महाकालाख्यो रुद्रो देवः स्वविरोधिनो दुराचारांश्च स्वस्राऽम्बिकया शरद्रूपया हन्ति, शरदि हि घातकरोगोत्पत्तेः। अनेन त्रैयम्बकेन हविषा तदीया शान्तिर्भवति। अतएव तैत्तिरीयाः 'एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह। शरद् वा अस्याम्बिका, तया वा एष हिनस्ति। यं हिनस्ति तयैवैनं सह शमयति।' (तै. ब्रा. १, ६, १०, ४)। स्त्री अम्बका इत्यत्र यणादेशे स्त्र्यम्बका पृषोदरादित्वाद् आद्यस्य सकारवर्णस्य लोपे त्र्यम्बका तत्प्रतिपादकत्वात् त्र्यम्बका होमा इति ख्यातिः, अतएव शतपथब्राह्मणभाष्ये सायणाचार्यः— 'स्त्रीरूपाऽम्बिकासंबन्धाद् रुद्रस्यैते पुरोडाशा त्र्यम्बका इत्याख्यायन्ते इत्याह। (रुद्र) हे भगवन् रुद्रदेव ! रोदयति शत्रून् इति रुद्रः। अत्र यास्कः (निरु. १०, ५) 'रुद्रो रौतीति सतः। रोरूयमाणो द्रवतीति वा, रोदयतेर्वा। यद् अरुदत् तद् रुद्रस्य रुद्रत्वम् 'इति काठकम्। 'यद् अरोदीत् तद् रुद्रस्य रुद्रत्वम्' इति हारिद्रविकम्। (एषः) अयं हूयमानः पुरोडाशः (ते) तव स्वभूतः (भागः) भजनीयः अङ्गीकर्तव्यः। भज सेवायाम् (९९८) भौवादिकः उभयपदी। कर्मणि घञ् प्रत्ययः। 'कर्षात्वतो घञोऽन्तोदात्तः' (पा. ६, १, १५९) इत्यन्तोदात्तत्वम्। (स्वस्रा) भगिन्या, भगवत्या। 'या ह वै सा रुद्रस्य स्वसाऽम्बिका नाम सा ह वै भगस्येष्टे इति श्रुतेः (शत. २, ६, २, १३)। अत्र भट्टभास्करः (तै. सं. १, ८, ६, १)—'लक्षितलक्षणया स्वसा भगिनी लक्ष्यते। भगिन्या भगवत्या। यद्वा स्वसृत्वेन सहजत्वं लक्ष्यते, तेन चाऽविनाभावः। यद्वा स्वं आत्मानं सरति भजते इति स्वसा देहार्धभूता। पृषोदरादिः। सुष्ठु वाऽऽत्मना अस्यते प्राप्यत इति स्वसा। 'असु गत्यादि'षु तस्माद् ऋन् प्रत्ययः। (अम्बिकया) अम्बिकाख्यया देव्या (सह) साकं (तं) हवीरूपं पुरोडाशं भागं (जुषस्व) सेवस्व। जुषी प्रीतिसेवनयोः (१२८९) तौदादिकः आत्मनेपदी। लोटि मध्यमपुरुषैकवचने रूपम्। (स्वाहा) इदं हविः सुहुमस्तु।

आखुनिमित्तं पुरोडाशार्पणेन प्रीतः सह स्वस्राम्बिकया रुद्रो यजमानस्य पुत्रभृत्यादीन् पशूंश्च न हिनस्तीति विश्वासेनाऽतिरिक्तं रौद्रं पुरोडाशं मूषिकैरुत्कीर्णे पांशुराशावुप-

किरति- (रुद्र) हे भगवान् रुद्र ! (एषः) अयं आखूत्करे निरूप्यमाणः (ते) त्वत्प्रीत्यर्थं (भागः) पुरोडाशः । (ते) त्वदीयः (आखुः) मूषिकः (पशुः) पशुत्वेन समर्पितः । आखुरूप-पुरोडाशहविषो निर्वापेण त्वं प्रीयस्व मम पुत्रभृत्यादीन् बान्धवांश्च रक्षेति भाव इति देवयाजिनः ।

आत्मयाजिनस्तु— प्राणान् प्रार्थयते- (रुद्र) हे प्राणरूपाग्ने ! 'दशेमे पुरुषे प्राणाः; आत्मैवैकादशः; ते यदाऽस्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तस्माद् रुद्राः'[1] (शत. १४, ६, ६, ५) । (अम्बिकया) अम्बिका परात्मशक्तिः तया (स्वस्रा) भगिनीस्वरूपया (सह), (ते) त्वया (एषः) इन्द्रियशक्तिसमूहरूपः (भागः) भजनीयः, अङ्गीकार्यः । (तम्) (स्वाहा) मन्त्रशक्तिप्रभावेण (जुषस्व) सेवस्व । (रुद्र) हे प्राणाग्ने ! (एषः) आत्मप्रतिबिम्बरूपः (ते) त्वया (भागः) भजनीयः (आखुः) चोरः कामः (ते) तव (पशुः) इति ।

सात्वतास्तु—गिरिमहनाम्नि महोत्सवे यदवः सपरिवाराः रैवतकं गताः । तत्र रैवतकं परिक्रम्य द्वारिकां प्रति निवर्तमानां सुभद्रां श्रीकृष्ण-भगिनीं कृष्णानुमतोऽपजहारार्जुनः । रथेउपवेश्य ताम् इन्द्रप्रस्थं प्रतस्थे । तदुदन्तमाकर्ण्य सयदुः बलरामः रोषारुणनयनो बभूव, पश्चात् कृष्णेन अन्यैश्च सुहृद्भिः विबोधितः शान्तचेताः सकृष्णः भोजवृष्णिस्वजाति-परिवृतः वरवध्वोरुपहारं ज्ञातिदेयं महाधनं यौतुकं, कृष्णपरामर्शेन स्वयमेव इन्द्रप्रस्थमागत्य युधिष्ठिरेण सत्कृतः स्नेहनिर्भरमानसः पार्थं धनञ्जयं स्वभगिनीपतिमर्पयन् व्याहरति एषते इति । (एषः) पुरस्तादुपस्थाप्यमानः (ते) तव (भागः) भजनीयो वरवधूपहारलक्षणः । (रुद्र) ! शौर्यातिरेकेण शत्रुरोदक रुद्रावतार वा । महाभारतसारे बहुभिः वृषभैरनुगम्यमानां गां दर्शं दर्शं गिरिजा जहास, त्वमपि पंचभर्तृका भविष्यतीति सा गवा शप्ता । ततः खिन्नां तां प्रसादयितुं महादेव उवाच, अलं विषादेन, अहमेव द्वापरान्ते पाण्डुतनयपचकवपुषा अवतीर्य यज्ञकुण्डसमुद्भूतां त्वां द्रौपदीनामधेयां परिणेष्ये ततः न ते सतीत्वं विनङ्क्ष्यति मोक्ष्यसे च शापात् इति कथा अनुसन्धेया । तं मयोपहृतं महाधनं स्वस्रा मम पितृ-भगिन्या (सह जुषस्व) सेवस्व 'एषते' इति पुनरुक्तिः आदरातिरेकसूचनाय । (पशुः) पश्यति इति व्युत्पत्त्या अनागतदूरदर्शी मानुषः बुद्धिधरिति यावत् । (ते) तव (आखुः) मूषक इव धराया-माखनेन यथार्थ-तत्त्वे अन्तः प्रविशति । सत्तर्कादिना मीमांसैवात्राखननम् ।

पुरोडाशनिर्वापः

[2]"अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् । य० ३।५८॥"

१—(क) यत् समरुजत् तद् रुद्रस्द रुद्रत्वम् (काठ.२५, १) । (ख) तै. सं. १, ५, १, १ ।
२—तै. सं. १, ८, ६, २ । तै. ब्रा. १, ६, १०, ४ । 'अवाम्ब रुद्रमदीमहि इति पाठः ।

अस्यां अष्टपञ्चाशयां कण्डिकायाम् 'अव रुद्रम्' इत्येक एव मन्त्रः। अस्य बन्धुर्ऋषिः, विराट्पङ्क्तिश्छन्दः, रुद्रो देवता (शत० २, ६, २. ११; का. श्री. ५, १०, १२)।

ततः पुनरावृत्य जपन्ति—(रुद्रम्) कदाचाराणां जीवानां संहारकं देवम् (अव अदीमहि) पुरोडाशहविषां निर्वपेणाऽयं रुद्रः प्रसीदतीत्यवेत्य निश्चित्य तम् अदीमहि पुरोडाशं भोजयामः। अद भक्षणे (१०११) आदादिक. परस्मैपदी। अथवा दो अवखण्डने (११४८) दैवादिकः परस्मैपदी, तस्येदं लुङि रूपम्। रुद्रं पुरोडाशहविषाम् अवदानहोमैस्तोषयामः। अतएव भट्टभास्करः 'अवदानसाध्या देवतातृप्तिरवदानेन लक्ष्यते'—इति (तै. सं. १, ८, ६, २)। 'अदीमहि' इत्यत्र छान्दसे लुङि व्यत्ययेनात्मनेपदम्। (त्र्यम्बकम्) स्त्रिया स्वस्राऽम्बिकया सह वर्तत इति त्र्यम्बकस्तादृशं (देवम्) दीव्यमानम् (अव) अव-अदीमहि निश्चयेन पुरोडाशावदानसमर्पणेन संतोषयाम इति। किमर्थं वयं रुद्रं त्र्यम्बकं देवं अव-अदीमहि, (यथा) येन कारणेन (नः) अस्मान् सः देवः (वस्यसः) वसीयसः। वसतिरिह दीप्त्यर्थः। अतिशयेन वसन्ति दीप्यन्ते पुत्रधनादिसमृद्धिद्वारा जीवने प्रकाशन्त इति वसीयांसः। अतिशयेन वस्तेति विग्रहे 'तुश्छन्दसि' (पा. ५, ३, ५९) इति तृन्प्रत्ययान्ताद् वस्तृशब्दाद् ईयसुनि प्रत्यये 'तुरिष्ठेमेयस्सु' (पा. ६, ४, १५४) इति तृनो लोपे वसीयस् इति, छान्दसे ईकारलोपे वस्यस् इति, तस्य द्वितीयाबहुवचने रूपम्। अथवा वस निवासे (१००५) भौवादिकः परस्मैपदी इत्यस्यैव धातोरिदं रूपम् अतिशयेन स्थितिशीलान् 'करत्' करोतु, डुकृञ् करणे (१४७२) तानादिकः उभयपदी। 'लिङर्थे लेट्' (पा. ३ ४, ७) इति लेटि शपि अडागमः। शपः पित्त्वान्निघाते यद्वृत्तयोगीयः तिङ्निघाताभावानुबन्धनो धातुस्वरः। न केवलं प्रकाशमयजीवनान् स्थितिशीलान् वास्मान् रुद्रः करोतु (यथा) येन (न) अस्मान् (श्रेयसः) प्रशंसातिशयेन यशस्विनः। अतिशयेन प्रशस्य इत्यर्थे ईयसुनि प्रत्यये 'प्रशस्यस्य श्रः' (पा. ५, ३, ६०) इति श्रादेशः 'प्रकृत्यैकाच्' (पा. ६, ४, १६३) इत्यनेन प्रकृतिभावे च निष्पन्नः श्रेयस्शब्दः (करत्) करोतु। जीवनसौख्येऽप्ययशसा ग्लानिर्माभूदिति श्रेयस्त्वमपि प्रार्थयन्ते। जीवनसमृद्धावपि यशस्विनोऽपि पुरुषा अव्यवस्थितचेतसो न साकल्येन साफल्यं प्राप्नुवन्तीति निश्चयदार्ढ्याय प्रार्थयन्ते—(यथा) येन (नः) अस्मान् (व्यवसाययात्) निश्चयदार्ढ्याय प्रेरयेत्। तदनुग्रहेणास्माकं व्यवसायात्मिका मतिः समुदेत्विति। व्यवौ द्वावुपसर्गौ तत्पूर्वकाद् ण्यन्तात् स्यतेः 'षोऽन्तकर्मणि' (११४७) इति दैवादिकात् परस्मैपदिनः धातोः लिङर्थे लेटि 'लेटोऽडाटौ' (पा. ३, ४, ९४) इत्यडागमे 'इतश्च लोपः परस्मैपदेषु' (पा. ३, ४, ९७) इति तिङः इकारस्य लोपे रूपम्। यद्वृत्तीययोगात् धातुस्वरेण मध्योदात्तत्वमिति देवयाजिनः।

आत्मयाजिनस्तु—(त्र्यम्बकम्) पूरकरेचककुम्भकाख्यानि त्रीणि अम्बकानि नेत्राणि यस्य तादृशं (देवम्) द्युतिमन्तम् (रुद्रं) प्राणम् (अव) अवगत्य (अदीमहि) हार्दान्तरिक्षे

धारयामः । (यथा) प्रारब्धक्षये (नः) अस्मान् (वस्यसः) ब्रह्मनिवासशीलान् (करत्) करोतु । (यथा) (नः) अस्मान् (श्रेयसः) जीवन्मुक्तान् (करत्) कुर्यात् । (यथा) (नः) अस्मान् (व्यवसाययात्) अध्यात्मज्ञाने निश्चययुक्तान् करोत्विति ।

सात्वतास्तु— स उपस्पृश्य शुच्यम्भो नमस्कृत्य महेश्वरम् ।
दिव्यान्यस्त्राणि संस्मृत्य सज्यं गाण्डीवमाददे ।।
(भा० १०, ८९ ३७)

इति श्लोकात् परमशिवभागवतोऽर्जुन इत्यवगम्यते, यो यस्य देवस्योपासकः स तं देवं संस्मृत्य समस्तं कार्यं कुरुते । तस्मात् शिवं स्वनिष्ठां विज्ञापयन् प्रणतार्तिहरमाशुतोपं स्वाभीष्टं याचते पार्थः-अव रुद्रमिति ।

मम आराध्यदेव ! अहम् अयं भगवान् रुद्र इति (अव) अवगत्य त्वत्स्मरणपुरस्सरम्, (अदीमहि) बहुत्वमार्षम्, अद्यां भुञ्जीय, स्वभ्रातृतात्पर्यकं वा, वयं सर्वे भ्रातरः (अदीमहि) भोजयामः । 'छन्दस्युभयथा' (पा. ३, ४, ११७) इत्यार्धधातुकत्वात् लिङि णिचो लोपः अपि वा (अव) अवयुत्यान्यदेवताभ्यः पृथक्कृत्य (अदीमहि) (त्र्यम्बकं) त्रिनयनं भगवन्तं महादेवं त्वामेव (देवं)दानादिगुणयुक्तं(अव)अवधारयेम, त्वमेव भक्ताभिलषितप्रदाता नान्य इति भावः । देवो दानाद् वा दीपनाद्वा द्योतनाद् वा इति यास्कः (निरुक्त ७, १५) (यथा) येन प्रकारेण (वस्यसः) वस्तृतरान् अतिशयेन निवासकर्तॄन् स्वयं निवसतः अन्यांश्च निवासयतः (करत्) करोतु, यथा च (श्रेयसः) ज्ञातिषु प्रशस्यतरान् (करत्) कुर्यात्, यथा (नः) अस्मान् (व्यवसाययात्) सर्वेषु कार्येषु व्यवसायबुद्ध्या दृढनिश्चयेन युक्तान् कुर्यात् भवान्, तथा त्वां प्रार्थये । त्वत्प्रसादात् शोभननिवासाः क्षत्रियेषु लब्धप्रतिष्ठा निश्चितकर्तव्याः वयं भवेम इति भावः ।

जपः

"भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् ।
सुखं मेषाय मेष्यै" ।। यज० ३।५९ ।।

एकोनषष्ट्यां कण्डिकायां, 'भेषजमसि०' इति मन्त्र एक एव जपार्थः । अस्य बन्धुऋषिः, स्वराड्गायत्री छन्दः, रुद्रो देवता (शत. २, ६, २, ११) ।

हे रुद्र ! त्वं (भेषजम्) कदाचाराणां निवारणात् सदाचाराणां च नराणां दुःखानामुपशमाद् औषधं (असि) भवसि । (गवे) गवां गृहपशूनाम् (अश्वाय) युद्धोपयोगिनाम् अश्वानां च (भेषजं) औषधम्, कष्टनिवारको भवसि । (पुरुषाय) प्राणिमात्रस्य चासि

(भेषजम्) औषधमिव । (मेषाय) च (मेष्यै) च सुखम् क्षेमङ्करः । सु हितं खेभ्यः प्राणेभ्यः इति सुखम् । सर्वत्र षष्ठ्यर्थे चतुर्थी । अनेनर्षीणां गोपालकत्वं संग्रामेऽश्वसाधनेन विजिगीषुत्वं, प्राणिमात्रस्य कल्याणचिन्तकत्वं, पशूनामपि सुखप्रदत्वं च व्यज्यत इति देवयजिनः।

आत्मयाजिनस्तु—हे प्राण ! त्वं (गवे) इन्द्रियसंघाय (भेषजम्) विश्वव्याधिनाशकम् औषधम् (असि) । (अश्वाय) जाठराग्नये अश्नाति सर्वमित्यश्वः तस्मै (भेषजम्) रोगनाशकं औषधमसि । (पुरुषाय) जीवात्मने च सर्वकष्टपरिहारकम् औषधमसि । (मेषाय) गगनमण्डलमार्गगमनेन सर्वेषाम् इन्द्रियाणां सेक्त्रे मनसे । मिषु सेचने (६९९) (मेष्यै) ज्ञानेन्द्रियाणां सेक्त्र्यै बुद्ध्यै (सुखं) आनन्दरूपमसीति ।

सात्वतास्तु– अक्रूरमुखेन कंसाहूतः कृष्णः यदा वृन्दारण्यात मधुपुरीं प्रतस्थे, तदा स्नेहातिरेकात् नन्दादयोऽपि मधुपुरीं सहायाताः। कंसो नो द्वेष्टि, क्रूरश्चासो देवः, किं भवितेति पर्याकुलमानसा मथुराधिपं भूतनाथं स्तुवन्ति 'भेषजमसि' इति ।

प्रपन्नपारिजात भगवन् भूतनाथ! त्वं (भेषजम्) आधीनां व्याधीनाञ्च (भेषजम्) तद्वन्निवृत्तिहेतुः (असि) भवसि । पशुपालैः सह पशुधनस्य सर्वविधस्य क्षेमं कामयमाना ऊचुः– (गवे) गोधनाय (अश्वाय) हयाय (पुरुषाय) पशुधनपालकाय व्रजवास्तव्यजनाय भेपजमिति द्विरुक्त्या पशुधनक्षेमं, पशुपालजनस्य च क्षेमं पृथक् याच्यते । अस्माकं पशुधनं पशुपालाश्च निरुपद्रवाः सानन्दमासताम् । शीतर्तौ कम्बलादीनामत्युपयुक्तत्वात् तत्साधनमेषदम्पतीक्षेममभिलष्यन्ति-सुखमिति । (मेषाय) पुंसे (मेष्यै) तत्पत्न्यै सुखं भूयात् । 'मेष' शब्देन दम्पतीग्रहणम् । तच्च सर्वेषां पशुदम्पतीनां पशुपालदम्पतीनाञ्चोपलक्षणम्। अत्र मिथः स्निह्यन्तः पशुपशुपालदम्पतयः सर्वाऽपेक्षितप्रदानेन व्रज-जनपदमुपकुर्युरिति भावः । मेषदम्पतिपृथग्ग्रहणम् शीतार्तप्राणिनां कम्बलादिद्वारा तदीयो महानुपकार इति सूचनाय । उत्कृष्टो वा जात्या निकृष्टो वा सर्वोऽपि राष्ट्रस्योपकर्ता समादरणीय इति भावः । त्वत्प्रसादात् अस्माकं कृष्णस्य विजयो भवेत् । अन्यथा कंसोऽस्मान् कृष्णसम्बन्धिनः, पशुधनं च लुण्ठयित्वा कारायां नः सर्वान् निक्षिपेदिति भीतास्त्वां वयम् अर्थयामहे श्रद्धातिरेकात् इति भावः।

[1]"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ।।
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ।।" य. ३।६०।।

१—ऋग्वेद ७, ५९, १२ ।

१. यजमानादिपरिक्रमणम्

२. कन्यापरिक्रमणम्

अस्यां षष्ठ्यां कण्डिकायां द्वौ मन्त्रौ । प्रथमस् 'त्र्यम्बकं यजामहे०' इति मन्त्रो यजमानादीनां परिक्रमणार्थः । अपरः कन्यापरिक्रमणार्थः । द्वयोः वसिष्ठ ऋषिः, विराड् ब्राह्मी त्रिष्टुप् छन्दः, (अनुष्टुप् छन्द इत्युव्वटमहीधरौ) रुद्रो देवता (शत. २, ६, २, १३-१४; का. श्रौ. ५, १०, १३) ।

दक्षिणोरूंस्ताडयन्तो देवकार्यवत्, वामोरूंस्ताडयन्तः पितृकार्यवच्च यजमानसंबन्धिनः पुत्रादयः पुरुषा दक्षिणेन पाणिना सव्यान् उरूंस्ताडयन्तोऽग्निम् अप्रदक्षिणं परियन्तो जपन्ति॰ (त्र्यम्बकं) तदाख्यं भगवन्तं रुद्रं देवं (यजामहे) आराधयामः । यज देवपूजाद्यर्थेषु (१००२) भौवादिकः उभयपदी । कीदृशं त्र्यम्बकम् । (सुगन्धिम्) दिव्यगन्धयुक्तम् । 'गन्धस्येद् उत्पूतिसुसुरभिभ्यः' (पा. ५, ४, १३५)इत्यनेन बहुव्रीहिसमासे समासान्त इकारः । (पुष्टिवर्धनम्) भक्तानां धनधान्यादिसमृद्धेर्वर्धयितारम् । पुष्टिं वर्धयतीति कर्तरि ल्युः प्रत्ययः । 'गतिकारकोपपदात् कृत्' (पा. ६, २,१३९) इति सूत्रेणोत्तरपदप्रकृतिस्वरविधया लित्स्वरः । (उर्वारुकमिव) कर्कन्ध्वादेः सुपक्वं फलमिव । (बन्धनात्) यथा तत्फलं सुपक्वं सत् अनायासेन स्वयमेव व्रततिवृन्ताद् विमुच्यते, एवं अहमपि रुद्राराधनात् (मृत्योः) अपमृत्युभयात् एव न केवलात् अपितु मृत्युभयादपि (मुक्षीय) मुक्तो भूयासम् । मुच्लृ मोक्षणे (१४३०) तौदादिकः उभयपदी । (मा) नैव । निषेधार्थे माङ् इति चाव्ययम् । (अमृतात्) अमरणधर्मणो ब्रह्मसायुज्याद् न मुक्षीय । मङ्गलमयात् शिवपूजनात् मृत्युपरपर्यायात् संसारभयाद् विमुक्तो भूयासम् न ब्रह्मसांनिध्यादिति भावः ।

यजमानस्याऽपरिणीताः कुमार्यः पतिकाम्यया सौभाग्यकाम्यया वाऽग्निं परिक्रामन्त्यः एवं जपन्ति— (त्र्यम्बकं यजामहे सुगन्धिम्) गतार्थम् । (पतिवेदनम्) भर्तुर्लम्भयितारम् पतिं विन्दन्ति लभन्तेऽनेनेति करणे ल्युट् प्रत्ययः । विद्लृ लाभे (१४३२) तौदादिक उभयपदी । यजमानकन्याऽऽशास्ते व्रततिबन्धनाद् उर्वारुकमिवाऽहं (इतः) पितृकुलात् (मा) नैव कदाचित् (अमुतः) अमुष्मात् तस्माद् भविष्यतो भर्तृकुलात् श्वशुरकुलाद् वा मुक्ता भूयासम् । अत एवात्र श्रुतिः—'तदु हाऽपि कुमार्यः परीयुर्भगस्य भजामहा इति । या ह वै सा रुद्रस्य स्वसाऽम्बिका नाम, सा ह वै भगस्येष्टे तस्मादु हापि कुमार्यः परीयुर्भगस्य भजामहा इति । तासाम् उतासां मन्त्रोऽस्ति—'त्र्यम्बकम्०' इति । सा यद् इत इत्याह ज्ञातिभ्यस्तदाह । मामुत इति पतिभ्यस्तदाह, पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ।' शत० २, ६, २, १३) इति देवयाजिनः ।

आत्मयाजिनस्तु—'आत्मा वै यज्ञस्य यजमानः' (शत. ९, ५, २, १६) इति श्रुतेर्

आत्मा यजमानरूपः प्रार्थयते–(पुष्टिवर्धनम्) देहमोक्षसम्बन्धिन्याः पुष्टेर्वर्धयितारं(त्र्यम्बकम्) पूरककुम्भकरेचकाख्यविविधक्रियावन्तं प्राणं (यजामहे) पूजयामहे गगनमार्गेण प्राणातिसारणाद् अहमात्मा (मृत्योः) सांसारिकाद् विषयसेवनात् (मुक्षीय) मुक्तो भूयासम्। (सुगन्धिम्) शोभनगन्धोपेतं पक्वम् (उर्वारुकमिव) कर्कन्ध्वादेः फलमिव (बन्धनात्) स्ववृन्तात् (अमृतात्) विषयनिवृत्तिपूर्वकब्रह्मसाक्षात्कारात् (मा) न मुक्षीयेति शेषः। अनन्तरं यजमानपत्नी बुद्धिः प्रार्थयते–(पतिवेदनम्) आत्मस्वरूपस्य भर्तुरापकं (त्र्यम्बकम्) उक्तगुणविशिष्टं प्राणं (यजामहे) पूजयामः। हे प्राण! (इतः) संसारात् (मुक्षीय) तत्साहाय्येन मुक्ता भूयासम् (मा) नैव (अमुतः) स्वभर्तुर् आत्मनः सकाशादिति।

सात्वतास्तु–द्रोणपर्वणि कृतायाः जयद्रथवधप्रतिज्ञायाः भङ्गमुत्प्रेक्षमाणः द्वारिकायां ब्राह्मणस्य मृतेषु नवसु पुत्रेषु प्रसोष्यमाणस्य दशमस्य कृतरक्षणप्रतिज्ञः रक्षितुमक्षमः पूर्वेषामिव तस्यापि म्रियमाणत्वात्, पार्थो वह्निं प्रविश्य मुमूर्षुः सङ्कटहारिणं त्रिपुरारिं श्रद्धापुरस्सरं स्मरति त्र्यम्बकमिति।

(सुगन्धि) भक्ताभिलषितप्रदातृत्वात् पुण्यकीर्ति 'गन्धोऽत्र कीर्तिवचनः' दातुर्दानगन्धः सर्वत्र प्रसरतीत्यादौ तथा दर्शनात्। अथवा 'गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वकोशात् शोभनसम्बन्धम्। यथा लोके सम्बन्धिनः उपकुर्वन्ति स्वबन्धुम्, तथाऽयं ततोऽपि स्वोपासकं नितान्तमुपकरोतीति भावः (पुष्टिवर्धनम्) पुष्टेर्विविधभोगसम्पत्तेर्वर्धनम् वृद्धिकरम्। (त्र्यम्बकं)त्रिनयनम् त्रयाणां लोकानां जनकं वा। (यजामहे) पूजयामः पुष्पादिभिः, ध्यायामश्च मनसा। (मृत्युः) प्रतिज्ञाभङ्गः अकीर्तिकरत्वात्। गीयते च गीतायां (२, ४४) 'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते' इति। यशोधनस्य अपयशस्तु मृत्योरधिकमिति हि मन्यन्ते यशोधनाः। तदतिरिक्तं प्रतिश्रुतिरक्षणं निरतिशयहर्षरूपत्वात् अमृतं मोक्षोपमम्। तदेतदभिसन्धाय ब्रूते उर्वारुकमिति। बन्धनात् शाखायां स्वस्थानात् (उर्वारुकं) फलविशेषमिव (मृत्योः) प्रतिश्रुतिभङ्गात् (मुक्षीय) मुक्तः स्याम्, अपिच प्रतिश्रुतनिर्वाहको भवेयमिति भावः। पार्थस्तुतितुष्टस्य भगवतो रुद्रस्य प्रसादात् जयद्रथवधसम्पत्त्या, सकृष्णेन पार्थेन महाकालपुरं गत्वा नरनारायणयोः पार्थकृष्णयोर्दिदृक्षया स्वपुरे महाविष्णुना नीतानां विप्रपुत्राणां मृतपूर्वाणां महाविष्णुनिर्देशेन द्वारिकायां प्रत्यानयनेन च प्रतिश्रुतिरर्जुनस्य पूर्तिपथं लेभे। वृतान्तद्वयञ्च इदं क्रमेण द्रोणपर्वणि, भागवते च (१०. ८९) अध्याये सुनिरूपितम्। दिदृक्षुभिः कणेहत्य तत्रैव निरीक्षणीयम्।

सुभद्रा कृष्णभगिनी रैवतकं परिक्रम्य रैवतकोपत्यकायां वर्तमानं शिवमन्दिरमुपगता। स्वाभीष्टपतिप्राप्त्यर्थं भगवन्तं रुद्रं प्रशंसति। द्वितीयकण्डिकांशेन पतिवेदनपदघटितेन। (पतिवेदनं) अभीप्सितपतिप्रापकम्, (इतः) पितृगृहात्, (अमुतः) भर्तृगृहात् शिष्टं समानम्।

१. स्थाणौ वंशयष्टि-आसंजनम् २. उदकोपस्पर्शनम्।

"एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा अहिंसन्नः शिवोऽतीहि" ।।६१।।

अस्यां एकषष्ट्यामपि कण्डिकायां द्वौ मन्त्रौ । प्रथमः 'एतत् ते रुद्र०' इति स्थाण्वादौ वंशयष्ट्यासंजनार्थः । अपरः 'कृत्तिवासाः' इत्युदकोपस्पर्शनः । द्वयोर् वसिष्ठ ऋषिः भुरिग् आस्तारपङ्क्तिश्छन्दः, रुद्रो देवता (शत. २, ६, २, १५-१७; का. श्रौ. ५, १०, १८-१९)।

हुतावशिष्टान् रौद्रान् पुरोडाशान् अञ्जलिनाऽन्तरिक्षे तथा यजमान उत्क्षिपति यथा गौर्न प्राप्नुयात् । अन्तरिक्षाद् अधः पतत एनान् यजमानः स्वयमेव गृह्णीयात् । शिक्याकाररज्ज्वा निर्मितयोश्च मूतयोः(यत्र तृणमय आवपने धान्यं बध्यते तन्मूतम् तत्र)पुरोडाशान् धृत्वा कस्यांचिद् वेणुयष्ट्यां (यज्ञियवृक्षजे तुलादण्डे) कुपे (वेणुनिर्मितपात्रद्वयान्विते बीवधापरपर्याये दण्डविशेषे) तौ मूतौ उभयतः प्रान्तयोर्बद्ध्वा स्थाणुवृक्षवंशवल्मीकानामन्यतस्मिन् अगोःप्रापणे देशे उत्क्षेपणवद् आसजति मन्त्रं चेमं जपति—(का. श्रौ. ५, १०, १३, १६, १८, १९) (रुद्र) हे तदाख्य देव ! (एतत्) इदं पुरस्कृतं (ते) तव (अवसम्) पाथेयं भोजनम् । प्रवसतो मध्येमार्गं भोक्तव्यम् अवसमाचक्षते । (तेन) पाथेयेन सहितस्त्वं (मूजवतः) मूजवान् नाम पर्वतो रुद्रस्य वासस्थानं ततोऽपि (परः) विप्रकृष्टे देशे (अतीहि) अतिक्रम्य याहि । कीदृशस्त्वम् । (अवततधन्वा) अवरोपितधन्वा अवततम् अवरोपितप्रत्यञ्चं धनुर्यस्येति बहुव्रीहिसमासे पूर्वपदप्रकृतिस्वरः । कदाचाराणां विरोधिनां सर्वथा विनाशाद् अधिज्यं धनुरधुनाऽनावश्यकमिति भावः । (पिनाकावसः) पिनाको रुद्राङ्कुशो रुद्रधनुर्वा तेनैवाऽवसं रक्षणं कुशलं वा यस्य तथाभूतः, स्वधनुष्कृतकुशलस्त्वं, समासादिः प्राग्वत्, अतीहीत्यन्वयः । उत्तरपदे वस्त्रापरपर्यायोऽवमशब्दो महीधराभिप्रेतो न मनोज्ञः । उन्नते वृक्षदौ मूतद्वये आसक्तान् पुरोडाशान् कृत्वा ततः प्रत्यावृत्तो वेदिसमीपे समागत्योदकं स्पृशति (कृत्तिवासाः) कृतिः कर्तनादिना निष्पादित वैयाघ्रं चर्म वासोऽम्बरम् उत्तरावरणं यस्य तादृशस्त्वं (नः) अस्मान् (अहिंसन्) अमारयन् अस्मादृशां त्वद्भक्तानामाराधनेन प्रीतः अतएव (शिवः) शान्तः कल्याणस्वरूपः (अतीहि) मूजवन्तं पर्वतमतिक्रम्य गच्छेति देवयाजिनः ।

आत्मयाजिनस्तु—(रुद्र) हे प्राण ! (एतत्) ब्रह्माण्डम् (ते) त्वदीयम् (अवसम्) अन्नम् । 'अन्नं वै विराट्' (शत. १२, २, ४, ५) इति श्रुतेः । (तेन) तत्साधनेन (परः) श्रेष्ठस्त्वं (मूजवतः) नाडीवेष्टितहृदयस्थलस्योन्नतं स्थानम् (अतीहि) अतिक्रम्य भृकुटिं गच्छ । ततः (अवततधन्वा) अवरोपितप्रणवधन्वा (पिनाकावसः) पिनाकः प्रणवोऽवसः अन्नं यस्य तथाभूतः स्वात्मनि प्रणवलयस्य कारकः(कृत्तिवासाः) भृकुटिरूपा कृत्तिर्गृहमेव वासो वस्त्रं यस्य सः (शिवः) कल्याणरूपस्त्वं (नः) अस्मान् योगिनः (अहिंसन्) अविनाशयन् अविचालयन्नित्यर्थः (अतीहि) गगनमण्डलमतिक्रम्य याहीति ।

